गीवगकाविवेकः

श्रीमते रामानुजाय नमः ॐ यस्य निश्वसितं वेदा मायया योऽखिलं जगत् निर्ममे तमहं वंदे विद्या
तीर्थमहेश्वरं १ वक्ष्ये विविदिषान्यासं विद्वन्न्यासं च भेदतः हेतू विदेहमुक्तेश्च जीवन्मुक्तेश्च तौ क्र
मात् २ संन्यासहेतुर्वैराग्यं यदहर्विरजेत्तदा प्रव्रजेदिति वेदोक्तेस्तद्भेदस्तु पुराणतः ३ विर
क्तिस्तु द्विधा प्रोक्ता तीव्रा तीव्रतरेति च सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ४ शक्तो
बहूदके तीव्रतरायां हंससंज्ञिके मुमुक्षुः परमहंसे साक्षाद्विज्ञानसाधने ५ पुत्रदारधनादीनां
नाशे तात्कालिकी मतिः धिक् संसारमितीदृक् स्याद्विरक्तेर्मंदता हि सा ६ अस्मिन्जन्मनि मा
भूवन्पुत्रदारादयो मम ॥ इति या सुस्थिरा बुद्धिः सैव तीव्रा विरक्तता ७ पुनरावृत्तिसहितो लो
केऽयं मास्तु कश्चन इति तीव्रतरत्वं स्यान्मंदे न्यासो न कोपि हि ८ यत्राचारशक्तिशक्तिमांतीव्रे न्या
सं कुर्यं भवेत् कुटीचके बहूदकश्चेत्तु भावेलोत्रिदंडिनो ९ इयं तीव्रतरे ब्रह्मलोकमोक्षविभेदतः त
त्त्ववित्तत्त्वविद्धंसो लोकेऽस्मिन्परमहंसकः १० एतेषां तु समाचारा प्रोक्ता पाराशरस्मृतौ आ

जी० मु० यतेऽनुभूयत इति लोक इति तथा चात्मानुभवमिच्छन्तः प्रव्रजन्तीति श्रुतेस्तात्पर्यार्थः संपद्यते स्मृतिश्च
२ ब्रह्मविज्ञानलाभाय परहंससमाह्वयः शान्तिदान्त्यादिभिः सर्वैः साधनैः सहितो भवेदिति इह
जन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नया विविदिषया संपादितत्वाद
यं विविदिषासंन्यास इत्युच्यते अयं च वेदनहेतुः संन्यासो द्विविधः जन्मापादककर्मादि
2 त्यागमात्रात्मकः प्रैषोच्चारणपूर्वकदण्डधारणाद्याश्रमरूपश्चेति त्यागश्च तैत्तिरीयादौ
श्रूयते न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुरिति अस्मिंश्च त्यागे स्त्रियोऽप्य
धिक्रियन्ते अत एव मैत्रेयीवाक्यमाम्नायते येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भग
वन्वेत्थ तदेव मे ब्रूहीति ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन संन्यासाश्रमस्वीका
रे प्रतिबन्धे सति स्वाश्रमधर्मेष्वनुष्ठीयमानेष्वपि वेदनार्थी मानसः कर्मादित्यागो
न विरुध्यते श्रुतिस्मृतीतिहासपुराणलोकेषु तादृशज्ञानवतां बहूनामुपलम्भात् ॥

राम
२

लोके लोकाभिरतायं यामहं लोकं विविच्यते ११ जिज्ञासुर्नाम वानस्थे ति परहे लोके धामतः प्राहुः ज्ञा
नायजिज्ञासो मां संन्यासमने थिनः १२ प्रव्राजिनो लोकमेतमिच्छन्तः प्रव्रजन्ति हि एतस्यार्थेनु
गद्येन वक्ष्यमंद विवुद्धये. १३ लोको हि द्विविधः आत्मलोकोनात्मलोकश्चेति तत्रानात्म
लोकस्त्रैविध्यं बृहदारण्यके तृतीयाध्याये श्रूयते अथ त्रयो वाव लोकाः मनुष्यलोकः
पितृलोको देवलोकश्चेति सोयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृ
लोको विद्यया देवलोक इति आत्मलोकस्तत्रैव श्रूयते य आह वा अस्माल्लोकात्स्वं लोक
मदृष्ट्वा प्रैति स एनमविदितो न भुनक्तीति आत्मानमेव लोकमुपासीत स य आत्मानमेव लो
कमुपास्ते नहास्यायुः हीयत इति च षष्ठाध्यायेपि किं प्रजया करिष्यामो येषां नोयमात्मायं
लोक इति एवं च संयतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यत्रात्मैव लोको विवक्षित इति
गम्यते स वा एष महानज आत्मेति प्रक्रम्यात्मन एतच्छब्देन परामृष्टत्वाल्लोकत्वे मनुस्मृ

१ जी॰ मु॰ पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति नचैतन्तु कथं वि
३ विदिषासंन्यासपरमिति शंकनीयं पूर्वकालवाचिनो विदित्वेति क्त्वाप्रत्ययस्य ब्रह्मविद्वाचि
नो ब्राह्मणशब्दस्य च बाधप्रसंगात् न चात्र ब्राह्मणशब्दो जातिवाचकः वाक्यशेषे पाण्डि
त्यबाल्यमौनशब्दै [redacted] [redacted] मिधेयैः श्रवणमनननिदिध्या
सनैः साध्यं ब्रह्मसाक्षात्कारस्य अभिप्रेतस्य ब्राह्मणशब्देनाभिहितत्वात् ननु तत्र विविदिषासंन्या
3 सोपेतः पाण्डित्यादौ प्रवर्त्तमानोऽपि ब्राह्मणशब्देन परामृष्टः तस्माद्ब्राह्मणः पाण्डित्यं निर्वि
द्य बाल्येन तिष्ठासेदिति मैवं भाविनीं वृत्तिमाश्रित्य तत्र ब्राह्मणशब्दस्य प्रयुक्तत्वात् अन्यथा
कथमपि ब्राह्मणः इति साधनानुष्ठानोत्तरकालवाचिनमथशब्दं प्रयुंजीत शारीरब्राह्मणेऽपि
विद्वत्संन्यासविविदिषासंन्यासौ स्पष्टं निर्दिष्टौ एतमेव विदित्वा मुनिर्भवत्येतमेव प्रव्राजि
नो लोकमिच्छन्तः प्रव्रजन्तीति मुनित्वं मननशीलत्वं तच्चासतिकर्त्तव्यान्तरे संभवतीत्यर्थो

राम ३

यस्कृदंडधारणादिरूपो वेदनहेतुः परमहंसाश्रमः स पूर्वैराचार्यैर्बहुधा प्रपंचित इह तु स्वा
भिरूपरम्यते इति विविदिषासंन्यासः अथ विद्वत्संन्यासं निरूपयामः सम्यगनुष्ठितैः
श्रवणमनननिदिध्यासनैः परंतत्वं विदितवद्भिः संपाद्यमानो विद्वत्संन्यासः तंच या
ज्ञवल्क्यः संपादयामास तथा हि विद्वच्छिरोमणिर्भगवान् याज्ञवल्क्यो विजिगीषुः
कथायां बहुविधेन तत्वनिरूपणेनाश्वलायनप्रभृतीन्मुनीन् विजित्य वीतरागकथायां संद
पविस्ताराभ्यां अनेकधा जनकं बोधयित्वा मैत्रेयीं बोधयित्वा स्वस्य त्वरया तत्वाभिमुखो
पलब्धकर्तव्यं संन्यासं प्रतिज्ञातत्वं बोधयित्वा संन्यासं चकार तदुभयं मैत्रेयीब्राह्मणस्या
द्यन्तयोराम्नायते अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् मैत्रेयीति होवाच याज्ञवल्क्यः
प्रव्रजिष्यन्वा अरेऽहमस्मात्स्थानादस्मीति एतावदेव खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः
प्रवव्राजेति च कहोलब्राह्मणेऽपि विद्वत्संन्यास आम्नायते एवं वै तमात्मानं विदित्वा ब्राह्मणाः

नी॰मु॰ श्रुतेर्विवरणमस्यते तत्र हि ज्ञानकेन संन्यासे प्रवृत्तस्य तिर्यक्त्वं कोऽधिकारीति विप्रोत्र विधानेनोक्तकाला
४ नुष्ठानेन च सहितं विविदिषासंन्यासमभिधाय पश्चात् त्रिरागाय यज्ञोपवीताविहितस्याहिंसे ब्राह्मणस्येप स
तिपश्चादात्मज्ञानमेव यज्ञोपवीतमिति समाहितो अतो बाह्ययज्ञोपवीताभावात्परमहंसत्वं निश्री
यते तथान्यस्यांके ड्रिकायां तत्र परमहंसो नामेत्युपक्रम्य संवर्तकादीन्बहून्विधान्ब्रह्मविदो ज्ञानंनु व४
कोतुदाहृत्याव्यक्तलिंगा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरंत इति विद्वत्संन्यासिनो
दर्शिताः तथा त्रिदंडं कमंडलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु
परित्यज्यात्मानमन्विच्छेदिति त्रिदंडिनः सत एकदंडग्रहणं विविदिषासंन्यासं विधाय तत्फल
रूपं विद्वत्संन्यासमेवमुदाजहार यथाजातरूपधरो निर्द्वंद्वो निःपरिग्रहस्तत्त्वब्रह्ममार्गे सम्यक्संपन्नः
शुद्धमानसः प्राणसंधारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्नुदरपात्रेण लाभालाभौ समौ भूत्वा
शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगिरिकुह

राम
७

संन्यास एवाभिधीयते एतद्वाक्यशेषे स्पष्टीकृतं एतद्ध स्म वै तत्पूर्वे विद्वांसः प्रजां न कामयंते
किं प्रजया करिष्यामो येषां नोयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकै
षणायाश्च व्युत्थायाथ भिक्षाचर्यं चरंति अयं लोकः इह परो द्वितीयो नानुभूयत इत्यर्थः नन्वत्र मुनित्वे
न फलत्वेन प्रलोभ्य विविदिषासंन्यासं विधाय वाक्यशेषे स एव प्रपंचितः अतो न संन्यासांतरं क
ल्पनीयमेवं वेदनस्यैव विविदिषासंन्यासफलत्वात् न च वेदनमुनित्वयोरेकत्वं शंकनीयं वि
दित्वा मुनिर्भवतीति पूर्वोत्तरकालीनयोस्तयोः साध्यसाधनत्वप्रतीतेः ननु वेदनस्यैव परिपाका
न.५ तिशयरूपं मननस्यांतरं मुनित्वं अतो वेदनद्वारा पूर्वसंन्यासस्यैवैतत्फलमिति चेत् बाढं अत एव सा
धनरूपात्संन्यासादन्यं फलरूपमेनं संन्यासं ब्रूमः यथा विविदिषासंन्यासिना तत्त्वज्ञानाय श्रवणा
दीनि संपाद्यानि तथा विद्वत्संन्यासिना जीवन्मुक्तये मनोनाशवासनाक्षयौ संपादनीयौ १ पा३
न२ तच्चोपरिष्टात्प्रपंचयिष्यामः अनयोः संन्यासयोरवांतरभेदे परमहंसत्वाकारेणैकीकृत्य
चतुर्विधा भिक्षवश्चेति स्मृतिषु चतुःसंख्योक्ता पूर्वोक्तयोरेतयोः संन्यासयोः परमहंसत्वं जाबाल

श्री०मु० धायकौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्योपकाराय चापरिग्रहेदिति दंडादिस्वी
५ कारस्य लौकिकत्वमभिधाय तत्त्वज्ञानमुख्योस्तीति शास्त्रीयत्वं प्रतिपिपादयिषुः कौपीनमुख्यं इतिवेद यंमुख्यो
नदंडं कमंडलुं न शिखां न यज्ञोपवीतं न स्वाध्यायं नाच्छादनं चरति स परमहंस इति दंडादिलिंगा
राहित्यस्य शास्त्रीयतामुक्त्वा ज्ञानशीलेन चोक्षमित्या हि न केन आश्रमान्तरे निर्ममस्कार इत्याहि
मा केन च लोकव्यवहारातीतत्वमभिधायांते यस्मान्नदैवो बोधस्तु स्वाहमस्मीति कृतकृ
त्यो भवतीत्येतेन ग्रंथेन ब्रह्मानुभवमात्रपर्यवसानमाचष्टे श्रुतौ विरुद्धधर्मोपेतत्वादस्योचानयो
र्महान्भेदः स्मृतावप्ययं भेदः दुक्षादिशादुदाहृतः संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्र
व्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः बृहस्पतिः प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्ष
णं तस्माज्ज्ञानं पुरस्कृत्य संन्यासेदिति बुद्धिमान् इत्यादि विविदिषा संन्यासः यदा तु विदि
तं तत्त्वं परं ब्रह्म सनातनं तदैकदंडं संगृह्य सोपवीतां शिखां त्यजेत् ज्ञात्वा सम्यक् परं ब्रह्म
सर्वं त्यक्त्वा परिव्रजेदित्यादि विद्वत्संन्यासः ननु कलाविद्या विवेकरचितोऽस्तु कर्ममात्रेणापि रम
५

रकंदरकोटरनिर्झरस्थंडिलेषु निकेतनवासी नि:प्रयत्नो निर्ममः शुक्लध्यानपरायणो ध्यात्मनि
ष्ठः अशुभाशुभकर्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नामेति तस्माद्
नयोः कश्मयोः परमहंसत्वे सिद्धे सति समानेपि परमहंसत्वे सिद्धे विरुद्धधर्माक्रांतत्वाद्वांत
रभेदोप्यभ्युपगंतव्यः विरुद्धधर्मत्वं चारुण्युपनिषत्परमहंसोपनिषदोः पर्यालोचनाया म
वगम्यते कुटीचकबहूदककर्मारण्यश्रीशतेविसृजामीति शिखायज्ञोपवीतस्वाध्यायगायत्रीजपा
दृष्टादृष्टकर्मप्रागारुप्यविविदिषासंन्यासिप्रैषस्यारुणिना पृष्टे गुरुः प्रजापतिः शिखायज्ञोप
वीतमित्याहिना सर्वत्यागमभिधाय दंडमाच्छादनं कौपीनं च परिग्रहेदिति दंडादिस्वीकारं विधा
य त्रिसंध्यादौ स्नानमाचरेत् त्रिसंध्यासमाधावात्मन्याचरेदिति सर्वेषु वेदेष्वारण्यमावर्त
येदुपनिषदमावर्तयेदिति वेदनहेतून् आश्रमधर्माननुष्ठेयतया विधत्ते अथ योगिनां परमहंसा
नां कोयं मार्ग इति विदुः संन्यासेनारदे प्रपृष्टे सति गुरुर्भगवान् सपुत्रमित्रकलत्रबंध्वादीन् शि
खायज्ञोपवीतस्वाध्यायं च सर्वकर्माणि संन्यस्यायं ब्रह्मांडं हित्वा साहित्वा पूर्ववत् संन्यासमभि

रूपेणाध्यासमानमित्यवकाशो नास्ति तदेतद्दुःखादिकृत्यमविद्यानिर्मितत्वेदाहमदृष्टेन निवर्तते
सत्तावाच्यमेवार्थं उपलभ्यते यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लो
कान्न हन्ति न निबध्यत इति यस्य ब्रह्मविदो भावः सत्ता स्वभावः स्वात्मा नाहंकृतो नाहंकारेण
तादात्म्यापन्नश्च यादृशमविद्विदः बुद्धिलेपः संशयः तदभावे त्रैलोक्यबाधेनापि न बध्यते किमु
तान्येन कर्मणेत्यर्थः न चैवं सति विविदिषासंन्यासफलेन तत्त्वज्ञानेनैवात्मनिश्चितत्वान्निवार
तत्वात् पूर्वमात्रग्रन्थश्चमैवेति सिद्धान्तरीत्या निवारितत्वमशक्यत्वात् कृतमनेन विद्वत्संन्यास
प्रयासेनेति चेन्मैवं विद्वत्संन्यासस्य जीवन्मुक्तिहेतुत्वात् तस्मात् हेतुनायथयथा विविदि
षासंन्यासः एवं जीवन्मुक्तये विद्वत्संन्यासः संपादनीय इति विद्वत्संन्यासः अथ केयं जी
वन्मुक्तिः किंवा तत्र प्रमाणं कथं वा तत्सिद्धिः सिद्धौ वा किं प्रयोजनमिति चेदुच्यते जीव
तः पुरुषस्य कर्तृत्वभोक्तृत्व सुखदुःखादिलक्षणश्चित्तधर्मः क्लेशरूपत्वाद्बन्धो भवति
तस्य निवारणं जीवन्मुक्तिः ननु अयं बंधः किं साक्षिणो निवार्यते किं वा निवार्यते चित्तात्

देहेतु मिष्ठा सं भवत्येव विद्वत्ताप्पायानदर्शिनः पंडितं मन्यमानस्याध्यात्मलोकार्थे नच्चतो प्रवृत्तेरौहृष्टो
ऽप्रतो विविदिषा विद्वत्ते केदृष्टौ वषिलेदृतिचेदुच्यते यथा लौकिक्यां यात्रा मुद्दिश्यागमुमुक्षा गायां मोक्ष
नार्हस्नान वैशेचिते व्यापारः भोजनेच विलंबोपिन सोढुं शक्यते तथाच यदा जन्महेतुभूत कर्मस्य
२४ तोत्तमरुचिः वेदनस्य धनेषु चक्षुर्गा दिषु त्वरमहती संपद्यते तादृशी विविदिषा संन्यासहे
तुः विद्वत्ताया ऽप्रवधिरूपदेशसाहस्यामभिहितः देहात्मज्ञानवत् ज्ञानं देहात्मज्ञानबाधकं
ऽऽत्मन्येवभवेद्यस्य सनेछन्नपिमुच्यते इति श्रुतावपि भिद्यते हृदयग्रंथिः छिद्यंते सर्व संशयाः
क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति परमपि हिरण्यगर्भादिकं यस्मादवरं यस्माद
सौ परावरः हृदयवुद्धेः चिदात्मना तादात्म्याध्यासो ग्रंथिः तेन निर्मितत्वेन व्यथितवद्ध संश्ले
षरूपत्वाद्ग्रंथिरित्युच्यते आत्मा साक्षी कर्ता वा साक्षित्वेप्यस्थूलत्वमस्तिनवा ब्रह्मत्वेपि
तद्ध्यानदृष्टिनुपकर्तिनवापाकालेपितद्दृष्टहनमात्रेणमुक्तिरसितनवेत्यादयः संशयाः कर्मा

गी०मू० प्रयत्ने कृष्यादेः फलपर्यन्तत्वं यत्र न दृश्यते तत्र प्रबलैः कर्मान्तरैः प्रतिबन्धः कल्पनीयः
१ तत्प्रबलं कर्म स्वानुकूलां वृष्ट्यभावरूपां दृष्टसामग्रीं संपाद्यैव प्रतिबध्नाति स च प्रतिबं-
धो विरोधिना प्रबलतरेणान्येन केनचित्कारीरीष्ट्यादिरूपेण कर्मणापनीयते तच्च कर्म स्वा-
नुकूलां वृष्टिलक्षणां दृष्टसामग्रीं संपाद्यैव प्रतिबन्धमपनयति किं बहुना प्रारब्धकर्मणो-
7 ऽप्येतन्मतेन भवता योगाभ्यासरूपस्य पुरुषप्रयत्नस्य वैयर्थ्यमनया विचिन्तयितुमशक्यं
ऽदृष्टवत्प्रारब्धकर्मणा दृष्टसाधनानां प्रवर्तितत्वात् तस्मादपि कर्मणो योगाभ्यासः प्रबलः
तथा च योगिनामुद्दालकप्रभृतीनां स्वेच्छया देहत्याग उपपद्यते यद्यप्यल्पायुषामस्माकं
नातिदृढो योगेन संभवति तथापि कामादिरूपधीवृत्तिनिरोधमात्रे योगेकेनामभ्यासः [illegible]
वृद्धिप्राप्त्या यस्य प्रयत्नस्य प्राबल्यं संतानाभिक्रियते तदा चिरकालाभ्यासेन मनो हस्तगतं पर्यन्तं तानां
सर्वसामानर्थक्यं प्रसज्येत न हि कदाचित्फलविसंवादमात्रेण दौर्बल्यमापादयितुं शक्यं राम
७

मात्: तत्त्वज्ञानेनैव निवारितत्वात् न द्वितीयः । असंभवात् यदा तु ज्ञानात् द्वैतत्वं निवार्यते बद्धैवो
ऽस्तित्वेन तदा चित्तात्मकर्तृत्वादि निवारणे ऽसंभवः । सोऽभावकत्वं तु समाने सर्वत्रैवैवं । आत्यंतिकनि
वारणासंभवेऽपि असिभवसंभवात् । यथा ज्ञानगतं द्वैतत्वं सन्निकामेलनेनाभिभूयते ब्रह्म
स्तत्वं मलिनमेनादिना तथा सर्वाः चित्तवृत्तयो योगाभ्यासेनाभिभवंतु प्राकृते । नन्वाह । एके कर्म
ज्ञा ५ फलोत्पत्तिप्राप्तत्वात्कार्यनाशाने प्रवृत्तस्य तत्त्वं न स्य प्रतिबंधकत्वात्स्वफलं हानायदेहे द्विधा हि कर्म वस्था
ययति नन्वस्तु वेदुः । लोहि योगाभ्यस्तवृत्तिभिर्विनाशंपादयितुं शक्यते ततः कथमभिवदतीदेर भ५
मेवं असिभवसंभवात् यातो जीवन्मुक्तेरपि स्तु वोतिशयोऽपि तेन प्रारब्धफलमेवांत भावात् न हि क
मेव [illegible] जीवन्मुक्तिसंपादयिष्यति माभूत्मुमुक्षुप्रयत्न इति चेत् कृषिवाणिज्यादावपि समानः
पर्यनुयोगः । कर्मणः स्वयमदृष्टफलस्यादृष्टसाधनसंपत्तिमंतरेणाफलजननासामर्थ्यात्
विहितः कष्टोऽपि मुमुक्षुप्रयत्न इति चेत् जीवन्मुक्तावपि समानमाने समाधाने सत्यपि मुमुक्षुस्य

रू४

नी·मु· नाज्ञलिंनियोजयतिमांयथा प्रवृत्तयेवतिस्वामिकृपणं।किंकरोम्यहं वासनाधर्माधर्मरूपाजीवगत
८ संस्काराः वसिष्ठः अतएव हि हे रामसंश्रयः स्वाप्नोसि एवं सुतं स्वप्रयत्नोपनीतेनयोजनस्व पौरुषेणान्य
था यतोवासनापरतंत्रोभवान् अतएवपारतंत्र्यनिवारणाय स्वो सा हि संपादितामनोवांछा
यतन्यः पुरुषव्यापारोपेक्षितः द्विविधोवासनाव्यूहः शुभश्चैवाशुभश्चैते प्राक्तनोविद्यतेराम
द्वयोरेकतरोथवा किंधर्माधर्मानुभावपित्वांनियोजयतः उतैकतरइतिविकल्पः एकतरपक्षेपिशु
४ भोशुभोवेत्यर्थसिद्धोविकल्पः वासनौघेनशुद्धेन तत्रचेदद्यनीयसे तत्क्रमेणाशुभेनैवपदंप्राप्स्य
सिशाश्वतं तत्रतस्मिन्पक्षेतत्रहि तेनैवक्रमेण शुभवासन याप्रापितेनैवाचरणेनप्रयत्नं
तरनिरपेक्षेणाशाश्वतंपदंमोक्षं अथचेदशुभोभावस्त्वांयोजयति संकटे प्राक्तनस्तदसौ
त्वोजेतव्योभवतास्वयं भावोभावनात्तत्रहियत्नोऽशुभविरोधिशास्त्रीयधर्मानुष्ठानं स्वयंजेत
व्यो ननुयुक्तमेतत्पशुत्वेनैवपुरुषांतरप्रयुक्तत्वेनजंतुशाकाः शुभाशुभाभ्यांमार्गाभ्यांवहंतीवासना
सरित् पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि अशुभप्रवृत्तेस्तु शुभमार्गप्रयत्नेनैरपेक्ष्यमशु राम
८

अन्यथा कदाचित् कंपरा नयं दृष्ट्वा सर्वे अर्थ्ये योगीज्ञा ष्मा इति सेनोपेदेत् अत एवानंदबोधाचार्या आहुः
न खलु नीर्णं भयाद्दाहारंपरित्यागो मित्रं कभया दुःस्थाल्पानधिकस्य एं इकामयाद्भुवावर गोपरित्या
गः इति श्रु॰ शीयस्य प्रयत्नस्य प्राव त्संव पिशिष्टराम संवादे विस्पष्टमवगम्यते सर्वमेवेह हि सदेसा
रम्पलदनुलदण्यवमृच्य साधनमिति सिपंते न ग्रंथेन ॥ वसिष्ठः सर्वमेवेह हि सदा संसारे रघुनंदन सं
म्यकुप्रयत्नात्सर्वैः प्राप्यते रुचा समवाप्यते सर्वं पुत्रवित्तस्वर्गलोकादि फलं पौरुषेण पुत्रकामेष्टि
कृषिवाणिज्यादियोतिष्टोमब्रह्मोपासनानुष्ठानादि लक्षणः पुरुषप्रयत्नः उच्छास्त्रं शास्त्रितं
वि॰ चेति पौरुषं द्विधं स्मृतं तत्रोच्छास्त्रमनर्थायपरमार्थाय शास्त्रितं उच्छास्त्रं परस्त्रीगमनपरद्रव्या
पहारादि श्रु॰ शास्त्रितं नित्यनैमित्तिकानुष्ठानादि अनर्थोनैकः अर्थं श्रुस्वर्गादिपरमो मोक्षः ॥ १३
रमार्थः आबाल्यादलमभ्यस्तैः श्रु॰ शास्त्रसत्संगमादिभिः गुणैः पुरुषप्रयत्नेन सोर्थः संपाद्यते हि
तः अत्रं संपूर्ण सम्यगित्यर्थः गुणैर्गैतेनैतदध्याहारः हितः स्नेयोरूपः श्रीरामः प्राप्तनंवास

जी॰मु॰
वे॰त॰
९

विद्धितमसि मर्द्दनं सद्योगाभ्यासाच्छीघ्रमेव सद्गुणमनोहृद्ये सति साफल्यमभ्यासस्यैतद्वं
न त्वल्पकालत्वेनासंभावना शंकनीया संदिग्धायामपि भृशं शुभामेव समाहर ॥ शुभायां वा
सनावृद्धौ तात दोषो न कश्चन ॥ शुभवासनाभ्यस्यमाना संपूर्णा न वेति संदेहस्तदापि शुभा
भ्यासेदेव ॥ तद्यथा सहस्रजपप्रवृत्तस्य हृद्ग्रामी शतसंख्या यदा संदिग्धा तदा पुनरपि शतं
जपेत् ॥ असंपूर्णौ संपूर्तिः संपत्स्यति संपूर्णत्वे तिद्वैतान सहस्रजपो दुष्यति तद्वत् ॥ अ
व्युत्पन्नमना यावद्भवानज्ञाततत्पदः ॥ गुरुशास्त्रप्रमाणैस्तु निर्णीतं तावदाचर ॥ ततः प
क्वकषायेण नूनं विज्ञातवस्तुना ॥ शुभोऽप्यसौ त्वया त्याज्यो वासनौघो निराधिना ॥ यदतिशुभ
गमार्गे सेवितं तच्छुभमनुसत्य मनोज्ञभावबुद्ध्या ॥ अधिगम्य परं यदद्वितीयं तदनु तदप्य
वमुच्य साधु तिष्ठ त्यक्तपूर्वः ॥ तस्माद्योगाभ्यासेन कामाद्युपशमवासनासंभवात् जीवन्मुक्तौ न
विवदितव्यम् ॥ इति जीवन्मुक्तस्वरूपं श्रुतिस्मृतिवाक्यानि जीवन्मुक्तिसद्भावे प्रमाणानि

राम
९

ममागंशस्त्रीयप्रयत्नेन निवार्य अशुभेभ्यस्तस्य स्थाने समाचरेत् ॥ शुभेषु समाविष्टं शुभेष्वेवाव
तारयेत् स्वमनः पुरुषार्थेन बलेन बलिनो वर ॥ अशुभेषु परहीदृसादिषु शुभेषु शास्त्रार्थ
देवताध्यानादिषु पुरुषार्थेन पुरुषप्रयत्नेन बलेन प्रबलेन ॥ अशुभाच्चालितं याति शुभं तस्मा
दपीतरत् ॥ जंतोश्चित्तं तु शिशुवत्तस्मात्तच्चालयेद् बलात् ॥ यथा शिशुर्मेडूदृणोन्निवार्य फल
महलोपोऽस्यते तथा चित्तमपि सत्संगेन च तत्तद्विपरीतविषयान्निवार्य तिष्ठकं समतो
सां त्वनेनाशुनत्यागिति भवेत् शनैः पौरुषेण प्रयत्नेन लालयेच्चित्तबालकं चपलस्वप
शोर्वंधनस्थानेष्ववेशनाय त्नपाशुपायो भवतः हरितरणप्रदर्शनकं उपनादिकं वा कृपा
ह्यपटेंडादिभिर्भर्त्संनं चेति तत्राद्येन सह सावधे सपते द्वितीयेन तत्स्तोधावत् शनैःशनैः प्र
वेश्यते तथा शास्त्रमित्राद्युपमतत्वास्कल्बोधनं प्राणायामप्र[illegible]त्याहारादिपुरुषप्रयत्न
श्चमेलो द्वौ चित्तशास्तूपायौ तत्राद्येन मदृयोगेन शीघ्रं लालयेत् द्वितीयेन हठयोगेन शनैः
तिनलालयेत् किं तु द्वयोरिति द्वागप्यासवशाद्यालियदानेबासनोदये तदाभ्यासस्य साफल्यं

शा१

टी०मु० यो नत्वनुभवतः द्वैतप्रतीतिरूपभयस्याभावात् श्रीराम उवाच ब्रह्मन्विदेहमुक्तस्य जीवन्मुक्तस्य
वे०त० लक्षणं मे ब्रूहि येन तथैवाहं यते शास्त्रगया दृशा वसिष्ठ उवाच यथास्थितमिदं यस्य व्यवहार
१० वतोपि च अस्तंगतं स्थितं व्योम स जीवन्मुक्त उच्यते इदं प्रतीयमानं गिरिनदीसमुद्रादिकं जग टी३
त्प्रतिपन्नं देहेन्द्रियव्यवहारेण सह महाप्रलये परमेश्वरेणोपसंहृतं सत् स्वरूपेणापमर्देना
10 स्तंगतं भवति अत्र तु न तथा किंतु विद्यते एव देहेन्द्रियव्यवहारो गिरिनद्यादिकं च परमेश्वरे
णानुपसंहृतत्वात् यथापूर्वं [illegible] अवतिष्ठमानं सत् सर्वैरन्यैः प्राणिभिर्विस्पष्टमवलोक्य
ते जीवन्मुक्तस्य तत्त्वसाक्षात्कारधीवृत्त्याभावात् सुषुप्ताविव सर्वमस्तंगतं भवति स्वयंप्रकाश
सु१ मानं चिद्व्योम केवलमवशिष्यते ननु सुषुप्तौ तात्कालिकधीवृत्त्यभावस्याप्यभिमानविधी
वृत्तिबीजस्य सद्भावान्न जीवन्मुक्तत्वं नोदेति नास्तमायाति सुखे दुःखे मुखप्रभा यथाप्रा
प्ते स्थितिर्यस्य स जीवन्मुक्त उच्यते मुखप्रभा च हर्षः शोकश्च वदन[illegible] सत्कारादि सुखे प्राप्ते

राम
१०

ता निच कठवल्यादिषु पठ्यंते विमुक्तश्च विमुच्यत इति जीवन्नेव दृढबंधनात्कामादेर्विशेषेण
मुक्तः सन् देहपाते भाविबंधाद्विशेषेण मुच्यते वेदनात्प्रागपि श्रमदमादिसंपादनेन कामादि
भ्यो मुच्यत एव तथाप्यनुत्पन्नवेदनानां कामानां तत्र प्रयत्नेन निरोधः अत्र तु धीवृत्त्यनुदयमा
त्रादनुत्पत्तिरेव ततो विशेषेणेत्युच्यते तथाप्यत्ययेदेहपातेस्ति किंचित्कालं भाविदेहबंधना
न्मुच्यते अत्रत्यात्यंतिको मोक्षाद्यपि प्रेत्य विशेषेणेत्युक्तं वृहदारण्यके च पठ्यते यदा सर्वे
प्रमुच्यंते कामा येस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इति श्रुत्यंतरेऽपि सचक्षु
रचक्षुरिव सकर्णो कर्ण इव समना अमना इवेति एवमन्यत्राप्युदाहार्यं स्मृतिषु जीवन्मुक्त
स्थितप्रज्ञभागवद्गुणातीतब्राह्मणातिवर्णाश्रमादिनामभिस्तत्र तत्र व्यवह्रियते वसि
ष्ठरामसंवादे रणां ज्ञानैकनिष्ठानामित्यारभ्यासत्किंचदत्र प्रोच्यत इत्यंतेन जीवन्मुक्तः पठ्यते
वसिष्ठः नरणां ज्ञानैकनिष्ठानामात्मज्ञानविचारिणां जीवन्मुक्तस्तनो देहात विदेहान्मुक्त ए
वयो ज्ञानैकनिष्ठान्तां लौकिकवैदिककर्मत्यागः देहे द्विविध सदसद्भावमात्रेणामुक्तिरूपस्य विशे

जी॰मु॰
वे॰टी॰-२
११

11

माध्याध्यानुष्ठानसमयेपिचिन्मात्रानुसंधानप्रयासाभावाद्दृष्ट्यावस्थाचारेपि पूर्वाभ्यासेनप्राप्तविश्रान्तचित्तस्यका
लुष्यराहित्यात्तत: स्वच्छत्वं यथाकाशस्य धूलिभिर्घादिषु तेपिनिर्लेपस्वभावत्वात्दलिशयेन
स्वच्छत्वंतद्भुत्_ यस्य नाहंकृतोभावोबुद्धिर्यस्य न लिप्यते कुर्वतोकुर्वतोवापिजीवन्मुक्त: स
उच्यते ६ पूर्वार्द्धं विवृणोति अन्यसमयस्त्वेवमाख्यातं लोकेचयत्नपुरुषप्रयासशास्त्रीयंकर्मकु
र्वतोहं कर्तेति चिदात्माहंकृतोभावो वासनारूपाध्यासोनिवृत्तिहर्षशोकबुद्धिर्लिप्यते अकुर्वतस्तु
त्यक्तवान स्मीत्यहंकृतत्वस्यालाभावविषादादेर्लेप: एवं प्रतिषिद्धकर्मणि लौकिककर्मणि
चययथासंभवं योजनीयंजीवन्मुक्तस्यतुतादृशस्याध्यासाभावात्बुद्धिलेपाभावाच्चनदोषद्वयं
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य: हर्षामर्षभयान्मुक्त: सजीवन्मुक्त उच्यते ७
अभिद्वेषताउद्वेगहेतुनं रौद्रप्रवृत्तत्वात्तस्मात्लोकोनोद्विजते अत एवं तस्मिन् लोकस्याभिद्वेषप्राद्य
प्रवृत्ते: कस्यचित्तदुद्वेगस्य तत्प्रवृत्ताभावेपि न चित्तत्वात्ताद्दृशविकल्पानुदयात्स्वयमपि नोद्विजते ॥

राम
११

पि संसारिणा इव हर्षशोकादेति अत्र त्वमयो देनं धनहानि अधिक ...ादि दुःखे प्राप्तेपि न दीनो भवति इ
दानीं तनस्य प्रयत्नविशेषमंतरेणाप्रारब्धकर्मोपादितपूर्वप्रवाहागतमिष्टान्नादिकं यथाप्राप्तं
तस्मिन्नासक्तिर्दिदृक्षा समाधिदार्ढ्येन सक्चंदनादिप्रतीतिप्रभावात् कदाचित्पुत्रधनादिनाशा २३
र्थमापाततः प्रतीतावपि विवेकदार्ढ्येन हेयोपादेयत्वबुद्ध्यभावात् हर्षादिरहितसमुत्पद्यते
योऽज्ञाननिद्रासुषुप्तिस्थोऽयस्य जाग्रन्न विद्यते यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते चक्रे
रादौ क्रियागोलके ... स्येनोपरमाभावात् जाग्रन्निमनोवृत्तिरहितत्वात्सुषुप्तिस्थः
अत एव द्वैतेतरदर्शोपलब्धिरहितस्य जाग्रत्त्वालोकेऽस्यप्रभावात् जाग्रत्न विद्यते सत्यपि बोधे
जायमाने ब्रह्मवित्वाभिमानादिभिर्भोगार्थायादितकामादिभिश्च बोधे वासनारहितः हितस्ये
न तद्बोधाभावान्निर्वासनत्वं रागद्वेषभयादीनामनुरूपं चरन्नपि योऽन्तर्व्योमवदच्छः स
जीवन्मुक्त उच्यते २ रागानुरूपं भोजनादिप्रवृत्तिः द्वेषानुरूपं बोधकापालिकादिभ्यो विमुखत्वं
भयानुरूपं सर्पव्याघ्रादिभ्योऽपसर्पणं अग्न्यादिदर्शने नमात्सर्यानुरूपेऽस्तर योगिभ्यः अग्निकोन स

मेतिमन्यमानाति न स्वप्नासन्नसुषुप्त्योर्न चाहं न चेतरः ॥ ५ ॥ उद्यास्तमयौ हर्षविषादौ न प्राप्यति न च
तत्परित्यागी लिंगदेहस्यात्रैव लीनत्वात् सुषुप्तिबीजनाशहेतुः विद्यामायोपाधिनेश्वरः ॥ प्र
सुषुप्तिबोधानाभिभूतसौतिकः तद्रूपस्य तत्पुष्यानस्मायातात्ः नचेत्तु स्थूलसूक्ष्म समीपस्थो
पि निषिद्धाते अहं न चेति न स्वप्नविसृष्टेनेतरत्तु तिनव्यतिरिक्त व्यवहारयोग्यो विकल्पः कोपि
नास्तीत्यर्थः ततः स्थितिलंगोपि न तेनैव तस्मात् ॥ जगत्प्रमाणभिन्नं तेन न किंचिदवशि
ष्यते एवं विधया विदेहमुक्त्या सादृश्ये तोकेर्पणादेः जीवन्मुक्तावपि यावद्भावन्निर्विकल्प
कत्वातिप्रायस्तावदुत्तमत्वहृष्टव्यं भगवद्गीतासु द्वितीयाध्याये स्थितप्रज्ञः पठ्यते ॥ अर्जुनः
स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥ १ प्र
ज्ञातत्वानेतत् द्विविधं स्थितमस्थितं चेति यथाज्ञानेनुरक्तो यान्त्यार्थः सर्वेष्वपि व्यवहारेषु
बुद्धिस्थैर्यमेवध्यायेति प्रमाणप्रमितानि क्रियमाणान्यपि विग्रहकर्माणि सर्वएव विस्मर्य

22

शांतसंसारकलनः कलावानपि निःकलः यः सचित्तोपि निश्चित्तः स जीवन्मुक्त उच्यते शत्रुमित्रमाना
पमानादिविकल्पाः संसारकलनाः शांताः यस्य स चतुःषष्टिविद्याः कलास्तासां सद्भावेपि तत्तद्दृष्टि
मानव्यवहारयोरभावान्निःकलत्वं चित्तस्य स्वरूपेणासद्भावेपि वृत्त्यनुदयान्निश्चित्तत्वं सचिंते
तिपाठे वा सत्तायाः स्फुरणात्मध्यानवृत्तिसद्भावेपि लौकिकवृत्त्यभावान्निश्चित्तत्वं यः समस्तार्थजाते
षु व्यवहार्येष्वपि शीतलः परार्थेष्विव पूर्णात्मा स जीवन्मुक्त उच्यते परगृहे विवाहोत्सवादौ स्वयं गतः
तत्र प्राप्ते तदीयेषु कार्येषु व्यवहारेन प्रतिलाभालाभयोर्हर्षविषादरूपं बुद्धिसंतापं न प्राप्नोति यथा
एवमयं मुक्तः स्वकार्येष्वपि शीतलः नैकवत्संतापाभावाच्छीतलत्वं किंतु पूर्णोस्वरूपानुसंधा
नादपि इति जीवन्मुक्तिलक्षणं अथ विदेहलक्षणं जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते
विशत्यदेहमुक्तत्वं पवनोऽस्पंदतामिव ७ यथा वायुः कदाचिच्चलत्वं त्यक्त्वा निश्चलरूपेणाव
तिष्ठते तथा मुक्तात्मापि उपाधिकृतं संसारं त्यक्त्वा स्वरूपेणावतिष्ठते विदेहमुक्तो नोदेति नास्त

जी॰मु॰ द्विविधा ततः प्रतीतावासनारूपाश्चेति समाहितोऽसौ धीवृत्तिसंस्थाया सर्वान्परित्यजति प्र-
वे॰त॰ ११ हितीया स्वमुखप्रसादलिङ्गगम्यः संतोषः स च न कामेषु किं त्वात्मन्येव कामानां त्यक्तत्वात् बुद्धेः पर-
मानन्दरूपे प्रत्यगात्मत्वाभिमुखत्वाच्च नैतावता संप्रज्ञातसमाधिविनाभावमानं हि मनोवृत्त्या लक्ष्यते किंतु
१३ स्वप्रकाशचिद्रूपेणात्मना संतोषस्तु न वृत्तिरूपः किंतु तत्संस्काररूपः एवं विधैर्लक्षणवाचकैः
शब्दैः समाहितो भाष्यते दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थित
धीर्मुनिरुच्यते २ दुःखं रोगादिनिमित्तजन्यान्तःकरणविकाररूपं संतापात्मिका प्रतिकूला
23 चित्तवृत्तिः तान्द्रष्टौ दुःखेषु प्राप्तेष्वहं पापो धिङ्मां दुरात्मानमित्यनुतापात्मिका तमोगुणवृत्तिविका
रत्वेन भ्रान्तिरूपा चित्तवृत्तिरुद्वेगः यद्यप्ययं विवेकरूपा भाति तथापि पूर्वस्मिन् जन्मनि चेत्तत्पा
पप्रवृत्तिप्रतिबन्धकत्वात्सप्रयोजनो भवति इदानीं तु निःप्रयोजनत्वाद्भ्रान्तित्वं द्रष्टव्यं सुखं राज
पुत्रलाभादिनिमित्तजन्या सात्त्विकी प्रीतिरूपानुकूला चित्तवृत्तिः तस्मिन् सुखे सत्यागामिनस्तादृ

ते तथापरं वैराग्येणाभ्यासेन तस्य योगाभ्यासपाटवेनात्यंतवशीकृतचित्तस्योत्पन्नेन तत्त्वज्ञानेन तद्बुद्धिर्नि
२२ रतिशयं स्थैर्यमापन्ना तत्त्वं ध्यायतीति स्थिरं स्थितं ज्ञानं उक्तगुणारहितस्य केनापि प्रकारेण वैराग्यकेदा
चिदुत्पन्नेनापि तत्त्वज्ञानेन गृहकर्मवतस्तत्रैव तत्त्वं विस्मर्यते न स्थिरं स्थितं ज्ञानं एतदेवाभिप्रेत्य वशि
ष्ठः प्राह पारव्यसनिनी नारी व्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतःपरसंगरसायनं एवं त
त्त्वे परे शुद्धे धीरो विश्रांतिमागतः तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि तत्र स्थितप्रज्ञः कालभेदाद्
द्विविधः समाहितो व्युत्थितश्च तयोरुभयोर्लक्षणं पूर्वोक्ताभ्यासमर्जुनः पृच्छति समाधिस्थस्य
स्थितप्रज्ञस्य का भाषा कीदृशं लक्षणं कैः शब्दैरयं भाष्यते व्युत्थितः स्थितप्रज्ञः कीदृशं वा कृत्यव्यव २८
हारं करोति तस्योपवेशनागमनमूढेभ्यो विलक्षणं कीदृशो श्रीभगवानुवाच प्रजहाति यदा कामान्स
र्वान्पार्थ मनोगतान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते १ कामा हि द्विविधाः बाह्याः आंतराः
वासनामात्ररूपाश्चेति उपार्जितमोदकादयो बाह्याः अप्राप्तमोदकादयस्त्वांतराः पश्चितत्तरणा

नान्यथा गृहादयस्तु समाधिमंतरेण निवर्त्तंते आहरणमाहारः उद्योगः निरुद्योगस्य गृहादिविषया नि
वर्त्तंते ४

गी॰ मु॰
वे॰ टं॰
१४

कुतस्तामसत्वशंकेत्यभिप्रायः विषया विनिवर्त्तंते निराहारस्य देहिनः रसवर्जं रसोप्यस्य परं दृष्ट्वा
निवर्त्तते ५९ आरब्धकर्मवशाद्देहः देहेन्द्रियैः कोष्ठिश्रित्यैर्विषयात्प्रवृत्तिर्यदि यो धकामादिरूपान्स्वयमेव संपादय
ति ५९ अन्यांस्तु गृहक्षेत्रादीनुद्योगहारेण तत्र चंद्रोदयादयः पूर्वेंद्रियसंहारलक्षणेन समा
धिनैव निवर्त्तंते रसस्तु न निवर्त्तते ५ रसो मानसीतृष्णा सा विषयानंदरूपस्य परस्य ब्रह्मणो दर्श
नेसति स्वस्यानंदहेतुभ्यो विनिवर्त्तते किं प्रजया करिष्यामो येषां नो यमात्मायं लोक इति श्रुतेः
वि यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ६० तानि सर्वा
24 णि संयम्य युक्त आसीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ६१ उद्योगत्यागप्र
स्मारपूर्वं प्रयत्नं कुर्वतो विकारादिचित्तप्रमादपरिहाराय समाध्यभ्यासः तदेतत् किमासीतेति प्र
श्नस्योत्तरं ध्यायतो विषयान्पुंसः संगस्तेषूपजायते संगात्संजायते कामः कामात्क्रोधोभिजा
यते ६२ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रण
श्यति ६३ असति समाध्यभ्यासे प्रमादप्रकार उपन्यस्तः संगो ध्येयविषयसन्निधिः संमोहो विवे राम
१४

प्राप्तेषु सुखेष्व कारणेऽपि पुण्योपमनस्य ज्ञाय स्पृहैव तदपेक्षा तामसी वृत्तिः स्पृहा तत्र च सुखदुःखयोः प्रा
रब्धकर्मप्रापितत्वात् सुस्थितचित्तस्य वृत्तिसंभवात्तु तदुभयं समनुत्पद्यते उद्वेगस्पृहाहेतुत्वेन विवेकि
नः संभवतः तथा रागभयक्रोधा अपि प्राप्तिसत्वेन कर्मणोऽप्रापितत्वाभावान्नास्य विद्यन्ते एवं लक्षणः
स्थितधीः स्यान्मुनिः प्रकटनेन शिष्यप्रतिज्ञार्थमनुद्वेगनिःस्पृहत्वादिगमकत्वाच्चोऽप्रमाक्षेतेत्यभिप्रा
यः ॥ यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ३
[redacted] य स्मि-सत्यमपदीपेहानिवृत्तीत्वस्मि-ना तेष्वेवेतिताद्रुशोऽन्यविषयस्तामसवृत्ति
विशेषः स्नेहः सुखहेतुर्यः स्वकलत्रादिः शुभं सुखं तच्च लोकस्य नादिप्रवृत्तिका धीवृत्तिरभिनन्दनः
अशुभं तु लोकस्य नस्यपरोचनार्थताभावेन व्यर्थत्वात्तद्धेतुरभिनन्दनस्तामसः अशुभं त्वयोत्यादिनेन
दुःखहेतुः परिक्षीयविद्यादिनैनप्रस्यशुभो विषयः तन्निंदाप्रवर्त्तका धीवृत्तिर्द्वेषः सोऽपि तामसः
तन्निंदायां निवारणार्थत्वाभावेन व्यर्थत्वात् तदेते तामसा धर्माः कथं विवेकिनि संभवेयुः यदा
संहरते चायं कूर्मोऽङ्गानीव सर्वशः इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ४ व्युत्थितस्य
समस्ततामसवृत्त्यभावः पूर्वश्लोकाभ्यामभिहितः समाहितस्य तु वृत्तय एव न संभवंतीति ॥ तौ विंद ॥

जी०मु० धानाभावात् भूस्थितस्य सत्यमुदासीनानुसंधेने हर्षविषादाभावाच्च सुखदुःखसाम्यं एवं वक्ष्यमाणे
वे०त० पि द्रष्टव्यं यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः
१५ १३ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः १४ यो न हृष्यति
न द्वेष्टि न शोचति न कांक्षति शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः १५ समः शत्रौ च मित्रे च तथा
मानापमानयोः शीतोष्णसुखदुःखेषु समः संगविवर्जितः १६ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन
25 केनचित् अनिकेतः स्थिरमतिर्भक्तिमान्यः स मे प्रियः १७ इति अत्रापि पूर्ववद्विशेषो वार्त्तिकका
रैर्दर्शितः उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधनरूपिणः इति गु
अ१४ णातीतस्वरूपं दृष्टाध्यायेवर्णितं अर्जुनः कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो किमाचारः कथं चैतान् २४
त्रीन्गुणानतिवर्तते १ त्रयो गुणाः सत्वरजस्तमांसि तेषां परिणामविशेषात्मकं सर्वसंसारः प्रवर्त्तते अतो
गुणातीतत्वमसंसारित्वं जीवन्मुक्तत्वमिति यावत् लिंगानि परेषामेतदीयगुणातीतत्वबोधकानि
आचारस्तदीयमनःसंचारप्रकारः कथमिति साधनप्रश्नः श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च

राम
१५

कपयाद्य, स्वत्वेस्य तिविभ्रमस्तत्वानुसंधानाभावः बुद्धिनाशो विपरीतभावनोपचयदोषेणाप्रतिबं
धस्यज्ञानस्यमोक्षप्रदत्वे सामर्थ्याभावः रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन् आत्मवश्यैर्विधे
यात्मा प्रसादमधिगच्छति १० विधेयात्मत्वं वशीकृतमनस्त्वं प्रसादो नैर्मल्यं संबंधराहित्यं समा
धयेपायसपुनःस्तद्गुणनावलोकनमुख्यानदशायामिंद्रियैर्व्यवहरन्नपि प्रसादं सम्यक् प्राप्नोति तदेत
त्किं प्रज्ञेतेत्यस्य प्रश्नस्योत्तरं उपरितनेनापि बहुनाग्रंथेन स्थितप्रज्ञः प्रपंचितः ननु प्रज्ञायाः स्थिरत्वं
सति योगप्रागपि साधनत्वेन रागद्वेषाद्विराहित्यमपेक्षितं बाढं न पाम्यस्ति विशेषः सच श्रेयोमा
र्गकारैर्दर्शितः विद्यास्थितये प्राकृये साधनभूताः प्रयत्ननिष्पाद्याः लक्षणभूतास्तु पुनः स्वभाव
तस्तेस्थिताः स्थितप्रज्ञेजीवन्मुक्तिरिति इमामवस्थां वदंति स्थितात्मसंबोधाद्वा चिरतमदप्रतिभाम
बाधितात्मावबोधसमर्थ्यादिति भगवद्गीतायाद्वादशाध्याये भगवतावर्णितः अद्वेष्टा सर्वभूतानां
मैत्रः करुण एव च निर्ममो निरहंकारः समदुःखसुखः क्षमी १ संतुष्टः सततं योगी यतात्मा दृढ
निश्चयः मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः २ इत्यर्पितमनस्त्वेन समाहितस्यान्यानुसं

जी०मु० ध्यानाभ्यासेन परमात्मसेवा गुणोत्तमया साधनं इति प्रश्नस्योत्तरं ब्राह्मणो व्यासादिनिर्वर्णितः अनुत्त
वे०त रीयवसनमनुपस्तीर्णशायिनं बाहूपधानीयं शांतं तं देवा ब्राह्मणं विदुः १ ब्राह्मणश्च द्वौ ब्रह्म
१६ विद्वाची अथ ब्राह्मण इति श्रुत्या वर्णितः ब्रह्मविदस्य विद्वत्संन्यासाधिकाराद्यथाजातरूपधरो ना
च्छादनं चरति सपरमहंस इत्यादि श्रुत्या परिग्रहराहित्यस्य मुख्यत्वाभिधानादनुत्तरीयत्वादिकं तस्य
26 युक्तं येनकेनचिदाच्छन्नो येनकेनचिदाशितः यत्रक्वचनशायी स्यात्तं देवा ब्राह्मणं विदुः २ देहनि
र्वाहायाशनाच्छादनशयनस्थानापेक्षायामप्यशनादिगतो गुणदोषो नान्विष्यते उदरपूरणपुष्ट्या
दिरूपस्य निर्वाहस्य समत्वान्निः प्रयोजनस्य गुणदोषविचारस्य चित्तदोषत्वात् अत एव भागवते
पठ्यते किं वर्णितेन बहुना लक्षणं गुणदोषयोः गुणदोषदृष्टिर्दोषो गुणस्तूभयवर्जित इति कं
थाकौपीनवासास्तु दंडधृग् ध्यानतत्परः एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः ३ ब्रह्मोपदेशा
दिनाधारापनुजिघृक्षायामुत्तमत्वतापनेन श्रद्धामुत्पादयितुं दंडकौपीनादि लिंगं धारयेत् कौपीनं
दंडमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्योपकारार्थाय च परिग्रहेदिति श्रुतेः अनुजिघृक्ष ग्न
१६

मोहमेव च पांडव न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति २ उदासीनवदासीनो गुणैर्यो न विचाल्यते
गुणा वर्त्तंत इत्येवं योवतिष्ठति नेंगते ३ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः तुल्यप्रियाप्रि
यो धीरस्तुल्यनिंदात्मसंस्तुतिः ४ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः सर्वारंभपरित्यागी गु
णातीतः स उच्यते ५ मां च योव्यभिचारेण भक्तियोगेन सेवते स गुणान्समतीत्यैतान्ब्रह्मभूया
य कल्पते ६ प्रकाशप्रवृत्तिमोहाः सत्वरजस्तमोगुणास्तेच यथाक्रमं तत्र यः प्रवर्त्तंते सुषुप्तिसमा
धिस्वप्नादिनैवर्त्तितावस्थासु निवर्त्तंते प्रवृत्तिश्च द्विविधा अनुकूला प्रतिकूला चेति तत्र मू
ढो जागरणे प्रतिकूलं प्रवृत्तिं च द्वेष्टि अनुकूलं प्रवृत्तिं कांक्षति गुणातीतस्य त्वनुकूलप्रतिकू
लाध्यासाभावात् द्वेषकांक्षे न स्तः यथा द्वयोः कलहं कुर्वतोरवलोकयिता कश्चित्तटस्थः स्वयं
केवलमुदास्ते न तु जयपराजयाभ्यामितस्ततश्चाल्यते तथा गुणातीतो विवेकी स्वयमुदास्ते गुणा
गुणेषु वर्त्तंते न त्वहमिति विवेकादौदासीन्यं अहमेव करोमीत्यध्यासो विचलनं न चास्य तदस्तीत्यर्थः इदं
किमाचार इत्यस्य प्रश्नस्योत्तरं समदुःखादीनि लिंगानि अव्यभिचारिभक्तिसहितज्ञान

जी॰ मु॰
वि॰ त॰
१७

27

प्राद् प्रयोगात् । आरंभस्तु सर्वोपि दुःख एव तथाच स्मृतिः सर्वारंभा हि दोषेण धूमेनाग्निरिवावृता इति म
नमस्कारोपि विविदिषासंन्यासिनो विहितः यो भवेत्पूर्वसंन्यासी तुल्यो वै धर्मतो यदि तस्मै प्रणामः क
र्तव्यो नेतराय कदाचनेति तत्र पूर्वत्वे धर्मतुल्यत्वविचारे चित्तं विक्षिप्यते अत एव नमस्कारमात्रेव बहवः
कलहायमाना उपलक्ष्यन्ते तत्र निमित्तं वा किं कारेर्ष्यितं अस्माहिनो वहिर्विताः पिशुनाः कलहो
त्सुकाः संन्यासिनोपि दृश्यन्ते दैवसंदूषिताशया इति मुक्तस्य नमस्काराभावो भगवत्पादैर्दर्शितः ना
माहिम्नः परोक्षमिवात्मनो स्थितो नु ये प्रणमेत्केवलदात्मज्ञानकार्यकर्म साधनेदिति चित्तकालुष्य
हेतोर्नमस्कारस्य प्रतिषेधे विसर्गसाम्यबुद्ध्या प्रसादहेतुर्नमस्कारो भुज्यते तथाच स्मृतिः इष्टरोगी
वकलयात्र विश्वे भगवानिति प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरं इति एकतिर्मनुष्यविषयप्र
तिषिध्यते न त्वश्वरविषया तथाच बृहस्पतिस्मृतिः आदरेणायथा स्तौति धनवन्तं धनेच्छया तथा
चेद्विश्वकर्तारं को न मुच्येत बन्धनात् २ अदीनत्वमदीनत्वं अत एव स्मृतिः अलब्धान विमर्दीस्या
त्कालेकालेषणं चरेत् लब्धानन्दस्ये दूतिमानुषयं दैवतं ब्रितमिति दीनकर्मत्वं विधिनिषेधाती
तत्वे नि ह्रैगुण्ये पथि विचरतां को विधिः को निषेध इति स्मरणात् एतदेवाभिप्रेत्य भगवतात्युक्तं त्रैगु

राम
१७

यापितद्दीयांस्वयंग्रहस्तस्याद्विवार्तां न कुर्यात् किंतु ध्यानपरो भवेत् तमेवैकं विजानीथ आत्मानमन्या वाचो
विमुंचथेति श्रुतेः तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायात् बहून् शब्दान् वाचो विग्लापनं
हि तदिति श्रुतेः ब्रह्मोपदेशस्त्वन्या वाक् भवतीति न ध्यानविरोधी तच्च ध्यानमेकाकित्वेन निर्विघ्नं
संभवति अत एव स्मृत्यंतरेऽभिहितं एको भिक्षुर्यथोक्तः स्यात् द्वावेव मिथुनं स्मृतं त्रयो ग्रामः समा
ख्यातः ऊर्ध्वं तु नगरायते १ नगरं न हि कर्तव्यं ग्रामो वा मिथुनं तथा राज्यादिवार्ता तेषां स्याद् भिक्षावार्ता
परस्परमिति निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं वि
दुः इति श्रुतेः संन्यासिभिः प्रणामस्तावपुरुषार्थमाशीर्वादः न प्रयुज्यते यस्य यद्ध्येयं हितं तं प्रति तद्भि
वृद्धिप्रार्थनमाशीः तथाच पुरुषार्थो न भिन्नरुचित्वात् तदभिमतान्वेषणे व्यग्रचित्तस्य लोकवासना
वर्धते साच ज्ञानविरोधिनी तथाच स्मृत्यंतरे च लोकवासनया जंतोः शास्त्रवासनयापि च देहवासन
या ज्ञानं यथावन्नैव जायते १ एतच्चारंभनमस्कारादिष्वपि द्रष्टव्यं आरंभः स्वार्थपरोपकारार्थं वा गृह
क्षेत्रादिसंपादनप्रयत्नः एतावता चाशीर्वादादिमोक्षेण साध्यो न चाशीर्वादाभावे प्रणामतां नरस्तो
षेद्यः शंकनीयः लोकवासनाविद्योरुभयोः परिहाराय निखिलाशीर्वादादिप्रतिनिषेधेन नारायणा

श्री०मु०
वे०त०
१८

णपदृष्टांतेनात्राभिहितः येन पूर्णमिवाकाशं भवत्येकेन सर्वदा शून्यं यस्य जनाकीर्णं तं देवा ब्राह्मणं वि
दुः संसारिणामेकाकित्वे [illegible] नावस्थानं भयालस्यादिहेतुत्वाद्दुर्जनसमूहस्त्वत
थाविधत्वान्मुक्येवः योगिनस्तु तद्विपरीतत्वं एकाकित्वे सत्यविघ्नेन ध्यानानुवृत्तेः परिपूर्णो
न परमानंदात्मना सर्वमाकाशं पूर्णमिवावभासते एतेन भयालस्यशोकमोहादयो न भवंति
यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति श्रुतेः
जनाकीर्णमिति स्थानं राजवार्तादिना ध्यानविरोधित्वादानंदात्मप्रतीतिरहितं तच्छून्यमिव
चिंतयति जगतो मिथ्यात्वादात्मनः पूर्णत्वाच्चेत्यर्थः अतिवर्णाश्रमीत्यत्र संहितायां मुक्ति
खंडे पंचमाध्याये विष्णुप्रति परमेश्वरवाक्यं ब्रह्मचारी गृहस्थश्च वानप्रस्थोथ भिक्षुकः
इति वर्णाश्रमीते पि क्रमाच्छ्रेष्ठा विचक्षणाः १ अतिवर्णाश्रमी प्रोक्तो गुरुः सर्वाधिकारिणां
न कस्यापि भवेच्छिष्यो यथाहं पुरुषोत्तम अतिवर्णाश्रमी साक्षाद्गुरूणां गुरुरुच्यते तत्समो नाधि
कस्तस्मिंल्लोके स्त्येव न संशयः ३ यः शरीरेंद्रियादिभ्यो विभिन्नं सर्वसाक्षिणं पारमार्थिकं

राम
१८

28

रपविषयावेशानि होगुण्योभवार्जुन निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवानिति नारदोपि स्मर्तव्यः
वि॰२ सततं विष्णुर्विस्मर्तव्यो न जातु चित् सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः इति योहि रविगणाङ्कीतः
सन्मानान्नरकोपि तव कृपाया हियः स्त्रीभक्ष्यं देवब्राह्मणस्वं विदुः राजवार्त्ता हितेषां स्यादिसुकृता
सर्पी वङ्गराजी निरित्युपपद्यते सन्मानस्यास्य किं कारणं तथा पुरुषार्थविरोधित्वान्नरकवद्धेयत्वं
अत एव स्मृतिः असन्मानात्तपोवृद्धिः सन्मानात्तपसः क्षयः अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छति एतदेवाभि
प्रेत्यावमानं उपादेयत्वया स्मर्यते तथा चरेत वै योगी सतां धर्ममनुस्मरन् जना यथावमन्येरन् गच्छे
व५ युर्नैव संगतिमिति साधुर्हि विधोदोषः प्रतिषिद्धं तं गुरु प्रतिषिद्धत्वं चेति नत्र प्रतिषिद्धत्वमात्रं कदाचिद्दोषा
आरध्यवलात्कृष्यते तदेतदभिप्रेत्याह स्मृतिः मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् बलवा
निन्द्रियग्रामो विद्वांसमपि कर्षति तथाच स्मृतिभ्यः जुगुप्सा वाक्लिता स्त्रीपापवाच्यदेषां स्यत्किन्न
नार्यभ्रणास्यच अमेदृषिमनोमेदाजनः प्रायेराबं चेत १ चर्मखण्डं द्विधाभिन्नमपानोद्गारधूपि
तं येरमंतिनमस्तेभ्यः साहसं किमतः परमिति अतः प्रतिषेध जुगुप्सयोरुभयोर्विविदयाकु

जी॰मु॰ वेद॰ यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शनात् स वर्णानाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः
वे॰त॰ इति श्रुतिर्योवेद॰ यस्त्यक्त्वा स्वाश्रमान्वर्णानात्मन्येव स्थितः पुमान् सोऽतिवर्णाश्रमी प्रोक्तः सर्व मी
१९ वेदार्थवेदिभिः न देहो नेन्द्रियं प्राणो न मनो बुद्ध्यहंकृतिः न चित्तं नैव माया च न च व्योमादिकं जगत्
न कर्ता नैव भोक्ता च न च भोजयिता तथा केवलं चित्सदानन्दो ब्रह्मैवात्मा यथार्थतः जलस्य चलनादे
स५ व चंचलत्वं यथा रवेः तथाहंकारसंसर्गादेव संसार आत्मनः तस्मादन्यगता वर्णाश्रमा अपि केवल
व आत्मन्यारोपिता एव भ्रान्त्या ते नात्मवेदिनां न विधिर्न निषेधश्च न वर्ज्यावर्ज्यकल्पना आत्म
७९ विज्ञानिनामस्ति तथा चान्यज्जनार्दन स्वात्मविज्ञानिनां निष्कामी दृश्यमंबुजेक्षण माययामो
घा४ हितात्मानो नैव जानंति सर्वदा न मांसचक्षुर्निरीक्ष्यं ब्रह्मविज्ञानिनामिदं दृष्टुं शक्यं स्वतः सिद्धं वि
दुषां सैव केशव यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी यत्र प्रबुद्धास्ते विद्वान् सुषुप्तस्तत्र केशव
एवमात्मानमद्वन्द्वं निर्विकारं निरञ्जनं नित्यशुद्धं निराभासं चिन्मात्रं परमं ततः यो विजानाति वेदां मा२
तैः स्वानुभूत्या निश्चितं सोऽतिवर्णाश्रमी प्रोक्तः स एव गुरुरुत्तम इति तदेवं विमुक्तश्च विमुच्यते रम
च१ १९

नं २

विज्ञानसुखात्मानं स्वयंप्रभुं ॥ परं तत्त्वं विजानाति सोतिवर्णाश्रमी भवेत् यो वेदांतमहावाक्यश्रव
णेनैव देहभाव ऽआत्मानमीश्वरं वेद सोतिवर्णाश्रमी भवेत् यो वर्णाश्रमविनिर्मुक्तं मत्स्यात्रयमा
त्विरां महादेवं विजानाति सोतिवर्णाश्रमी भवेत् वर्णाश्रमादयो देहे मायया परिकल्पिताः नात्म
नो बोधरूपस्य मम ते संति सर्वदा इति यो वेद वेदांतैः सोतिवर्णाश्रमी भवेत् ॥ आदित्यसंनिधौ लोक
श्चेष्टते स्वयमेव तु तथा मत्संनिधावेव चेष्टते सकलं जगत् इति यो वेद वेदांतैः सोतिवर्णाश्रमी भवे
त् सुवर्णे हारकेयूरकटकस्वस्तिकादयः कल्पिता मायया तद्वज्जगन्मय्येव सर्वदा इति
यो वेद ॥ शुक्तिकायां यथा तारं कल्पितं मायया तथा महदादि जगन्मायामयं मय्येव कल्पितं इ
ति यो वेद ॥ चंडालदेहे पश्वादिशरीरे ब्रह्मविग्रहे अन्येषु तारतम्येन स्थितेषु पुरुषोत्तम व्योमव
त्सर्वदा व्याप्तः सर्वसंबंधवर्जितः एकरूपो महादेवः स्थितः सोहं परामृतः इति यो वेद विन
ष्टदिग्भ्रमस्यापि यथापूर्वं विभाति दिक् तथा विज्ञानविध्वस्तं जगन्मे भाति तन्नहि इति यो वेद
यथा स्वप्नप्रपंचोयं मयि मायाविजृंभितः तथा जाग्रत्प्रपंचोपि मम मायाविजृंभितः इति यो

जी॰मु॰
वि॰त॰
२०

माह तन्मात्रत्शेनाभ्यासात्तावन्मनःसंचारसंस्थितिः साचिराभ्यासयोगेन विना न ज्ञायते ध्रुवमिति
न केवलमेकैकाभ्यासफलाभावः किंतु तत्स्वरूपमपि न सिध्यतीत्याह तत्त्वज्ञानं मनोनाशो वासना
क्षय एव च मिथःकारणतां गत्वा दुःसाध्यानि स्थितानि हीति १ त्रयाणामेतेषामेकैकद्वयोर्द्वयोर्मे
लनेन त्रीणि द्वंद्वानि भवंति तत्र मनोनाशवासनाक्षययोर्द्वंद्वस्यान्योन्यकारणत्वं व्यतिरेकमुखे
नाह यावद्विलीनं न मनो न तावद्वासनाक्षयः न क्षीणा वासना यावच्चित्तं तावन्न शाम्यतीति प्रदी
पज्वालासंतानवद्वृत्तिसंतानरूपेण परिणममाणमंतःकरणं द्रवमननात्मकत्वान्मन इत्यु
च्यते तस्य नाशो नाम वृत्तिरूपपरिणामं परित्यज्य निरुद्धत्वाकारेण परिणामः तथा च पतंज
लिर्योगशास्त्रे सूत्रयामास व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्ता
न्वयो निरोधपरिणाम इति व्युत्थानसंस्काराश्चाभिभूयंते निरोधसंस्काराः प्रादुर्भवंति निरो
धयुक्ताः क्षणाः चित्तेनान्वीयंते सोऽयं मनोनाश इत्यवगंतव्यं पूर्वापरपरामर्शमंतरेण सहसा
समुद्यमानस्य क्रोधादिवृत्तिविशेषस्य हेतुश्चित्तगतसंस्कारो वासना पूर्वपूर्वाभ्यासेन चित्ते वास्यमा

राम
२०

20

ऽस्यादिश्रुत यो जीवन्मुक्तस्थितप्रज्ञ भगवद्भक्त गुणातीत ब्राह्मणो ऽतिवर्णाश्रमी प्रतिपादितः स इति
वाक्यानि जीवन्मुक्तसद्भावे प्रमाणानीति स्थितं इति जीवन्मुक्तिप्रमाणं प्रथमं प्रकरणं १ अथ जी
वन्मुक्तिसाधनं निरूपयामः तत्त्वज्ञानमनोनाशवासनाक्षया एव तत्साधनं अत एव वाशिष्ठ रामयणस्या
वसाने जीवन्मुक्तिशरीरशमाप्तिसमाप्तिं अत्रत्वा वाशिष्ठ आह वासनाक्षयविज्ञानमनोनाशा महाम
ते समकालं चिराभ्यस्ता भवंति फलदायिन इति अन्वयमुक्त्वा व्यतिरेकमाह त्रय एते समं यावन्न
स्वभ्यस्ता मुहुर्मुहुः तावन्न पदसंप्राप्तिर्भवत्यपि समाशतैरिति समकालाभ्यासाभावे बाधकमाह
एकैकशो निषेव्यन्ते यद्येते चिरयत्नतः तन्न सिद्धिं प्रयच्छन्ति मंत्राः संकीर्तिता इवेति यथा संध्या
वंदनमार्जनेनस्य हि नियुक्तानां आपोहिष्ठेत्यादीनां तिसृणामृचामध्ये प्रतिदिनमेकैकस्या ऋचः
पाठे शास्त्रीयानुष्ठानं न सिद्ध्यति यथा वा षडंगमंत्राणामेकैकमंत्रेणान्यासान सिद्धिः यथा वालो
के पाकस्य चोदनादीनामेकैकेनन भोजनसिद्धिः तद्वत् चिराभ्यासस्य प्रयोजनमाह त्रिभिरेतैः
चिराभ्यस्तैर्हृदयग्रंथयो दृढाः निःशंकमेव त्रुट्यंति बिसच्छेदगुणा इवेति तस्यैव व्यतिरेक

ज्ञाते चाद्वितीयब्रह्मतत्वे क्रोधादिनिमित्तस्य सत्यत्वभ्रमस्यापनयनात् न वासना क्षीयते यथोक्तानां त्र
याणां हूनाम न्योन्यकारणत्वमन्वयमुखेन व्यमुदाहृताम: मनसि न हि सति संस्कारोद्बोधकस्यवा
ह्यनिमित्तस्याप्रतीतौ वासना क्षीयते क्षीणायां च वासनायां हेत्वभावेन क्रोधादिवृत्त्यनुदयात् मनो
नश्यतीति तदिदं मनोनाशवासनाक्षययोर्द्वंद्वं दर्श्यते त्वप्रयावबुद्धो तिक्ष्णतेयात्मेवाभिमुखवृत्ते
द्दृष्टनहेतुत्वादितरकेत्स्त्ववृत्तिनाशस्य तत्त्वज्ञानहेतुत्वमवगम्यते सति च तत्त्वज्ञाने मिथ्याभूते जगति
नरविषाणादाविव धीवृत्त्यनुदयात्तत्त्वमनस्क्रहठेत्तेन पुनर्वृत्त्यनुपयोगाल्लिंधनाग्निवन्मनो नश्यति
तदिदं मनोनाशतत्त्वज्ञानयोर्द्वंद्वं तत्त्वज्ञानस्य क्रोधादिवासनाक्षयहेतुतां वार्त्तिककार आह रिपौ बं
धौ स्वदेहे च समैकात्म्यं प्रपश्यतः विवेकिनः कुतः कोपः स्वदेहावयवेष्विवेति क्रोधादिवासनाक्षयस्य
च स्यप्रमादेर्ज्ञानहेतुत्वं प्रसिद्धं वसिष्ठोऽप्याह गुणाः प्रासाद्योज्ज्ञाना ज्ञम्मादिष्वप्यत्वयातातापरस्परं
विवर्द्धते ह्युपयान्मरसाद्वेति तदिदं वासनाक्षयतत्त्वज्ञानयोर्द्वंद्वं तत्त्वज्ञानमादीनां त्रयाणां संपादने सा
धनमाह तस्माद्राघव यत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेतत्समाचरेदिति ॥

21

नत्वात् तस्या अवासनायाः क्षयो नाम विवेकजन्यायां शुद्धायां वासनायां दृढायां सत्यपि बाह्य
निमित्ते क्रोधाद्यनुत्पत्तिः तत्र मनोनाशो भावेष्वपि दृश्यमानासु कदाचित्स्मृतिमिव न क्रोधाद्य
त्पत्तिर्नास्ति वासनाक्षयः शुद्धायां तु वासनायां तथैव बहुत्पादनान्नास्ति मनोनाशः तत्त्वज्ञानम
नोनाशयोः परस्परकारणत्वं व्यतिरेकमुखेनाह यावन्न तत्त्वविज्ञानं तावच्चित्तशमः कुतः यावन्न
चित्तोपशमो न तावत्तत्त्ववेदनमिति इदं सर्वमात्मैव प्रतीयमानं तु रूपरसादिकं जगन्मायामयं न
त्वेतद्वस्तुतोऽस्तीति निश्चयस्तत्त्वज्ञानं तस्यानुत्पत्तौ रूपरसादिविषयाणां सद्भावे सति क्रोधरा
ग्रादिवृत्तयो न निवारयितुं शक्यन्ते यथाग्निरुपशमितोऽपीन्धनादिपूरणे ज्वालान निवार्यन्ते तद्वद्वृत्ति
चित्तोपशमो वृत्तिनिरोधः सामग्र्यां रूपादिषु नेत्रादीनां नास्ति किंचन तिष्ठते यं जनमानः प्रस्तरइत्यादेरि
तरस्य हविरोधकर्त्वाभावात् द्वितीयमिति ताटस्थ्यतत्त्वनिश्चयो न स्यात् वासनाक्षयतत्त्वज्ञानयो
:परस्परकारणत्वं व्यतिरेकमुखेनाह यावन्न वासनानाशस्तावत्तत्त्वागमः कुतः यावन्न तत्त्वसंप्राप्तिः
न तावद्वासनाक्षय इति क्रोधादिवासनास्वनष्टासु शमदमादिसाधनाभावात् न तत्त्वज्ञानमुदेति अ

जी॰मु॰ वि॰ त॰ २२

22

उपसर्जनत्वेऽपि उत्तरकालीनोऽभ्यासः कीदृश इति चेत् केनापि द्वारेण पुनः पुनस्तत्त्वानुस्मरणमिति ब्रूमः
तादृशाभ्यासाभ्यासशालिनो यथा व्याचेरुः तच्चिन्तनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ज्ञानाभ्या-
सं विदुर्बुधाः १ सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत्सदा इदं जगदहं चेति बोधाभ्यासं विदुः परमिति म-
नोनाशवासनाक्षयाभ्यासावपि तत्रैव दर्शितौ अत्यन्ताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः युक्त्या शास्त्रैर्य-
तन्ते ये तेऽप्यत्राभ्यासिनः स्थिताः इति ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाप्यप्रतीतिरत्यन्ता-
भावसंपत्तिः युक्तियोगः सोऽयं मनोनाशाभ्यासः दृश्यासंभवबोधेन रागद्वेषादितानवे रतिर्घनोदिता
यासौ ब्रह्माभ्यासः स उच्यते इति सोऽयं वासनाक्षयाभ्यासः तेष्वेतेषु त्रिष्वभ्यासेषु सामान्येन प्रतीयमा-
नेषु प्रधानोपसर्जनभावेन विवेकः प्रकाश्यते कथमिति चेत् मैवं प्रयोजनानुसारेण विवेकप्रकाशकत्वात्
मुमुक्षोः पुरुषस्य मुक्तिर्द्विविधा जीवन्मुक्तिर्विदेहमुक्तिश्चेति प्रयोजनद्वयं अत एव विमुक्तश्च विमुच्य-
त इति श्रूयते तत्र जीवतः पुरुषस्य दैवसंपदा मोक्षः आसुरसंपदा बन्धः तच्च षोडशाध्याये भगवानभिहि- ना २
तं दैवी संपद्विमोक्षाय निबन्धायासुरी मता इति तत्र संपदौ तत्रैवाभिहिते अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्य-

राम

२२

पौरुषेयत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंविधोत्साहानुरूपो निर्बन्धः विवेकोनाम विमृश्यनि
श्चयः तत्वज्ञानस्यासाधारणं साधनं मनोनाशस्य योगः वासनाक्षयस्य प्रतिकूलवासनोत्पादनमिति
योगेच्छायाः स्वल्पाया अप्यभ्युपगमे हि विषयाक्रान्तं चित्तमेव विमृश्य एवाभिवर्द्धते इति न्यायेनातिप्रसंगस्य
दुर्वारत्वात् दूरतस्तत्यक्ता ननु पूर्वत्र विविदिषासंन्यासस्य तत्वज्ञानं फलं विद्वत्संन्यासस्य जीवन्मुक्तिरि
ति व्यवस्थापिता तथा च सति प्रथमतः तत्वज्ञाने संपाद्य पश्चाद्विद्वत्संन्यासे कृते वा जीवतः स्वस्य
बंधरूपयोर्वासनामनोवृत्त्योर्विनाशः संपादनीय इति भाति अत्र तु तत्वज्ञानादीनां सहैवाभ्यासो नियम्य
ते अतः पूर्वोत्तरविरोध इति चेत् नायं दोषः प्रधानोपसर्जनभावेन व्यवस्थोपपत्तेः विविदिषासंन्यासिनः
तत्वज्ञानं प्रधानं मनोनाशवासनाक्षयौ तु उपसर्जनभूतौ विद्वत्संन्यासिनस्तु तद्विपरीतं अतः सहा
भ्यासस्तूभयत्राप्यविरुद्धः न च तत्वज्ञानोदयमात्रेणाकृतार्थस्य किमुत्तरकालीनेनाभ्यासप्रयासेनेति
शंकनीयं जीवन्मुक्तिप्रयोजनं निरूपयित्वानपरिहरिष्यमाणत्वात् ननु विद्वत्संन्यासिनो वेदनसाध
नश्रवणाद्यनुष्ठानवैफल्यात् वेदनस्य च स्वरूपणाकर्तुमन्यथाकर्तुमशक्यत्वादननुष्ठेयत्वात्

धः तत्र वासनाक्षये तीव्रबंध एव निवर्तते मनोनाशेन तत्प्रयं तर्हि मनोनाशेनैवालं वासनाक्षयस्तु
निरर्थक इति चेत् न मनोनाशहेतुनाप्रबलेन प्रारब्धेन बुद्ध्यापितेमन स्थितीव्रबंधनिवारणार्थत्वाद्योगस्य प्रा
रब्धेन बाधितेनाप्युपपत्तेः तामसवासनाकृतस्तीव्रबंधः सात्विकवासनाकृतस्तु मंदबंधः एतत्प्रदुरवेक्षनुद्विग्न
मनाक् स्यात्तत्राप्यपेक्ष्यते एवं च सति मंदबंधस्याभ्युपेयत्वात्तीव्रबंधस्य च वासनाक्षयेणैव निवृत्तेरनर्थको
मनोनाश इति चेत् न दुर्बलप्रारब्धापादितानवश्यंभाविभोगानां प्रतीकारार्थत्वात् तदाहुः भोगस्य प्रतीकार
निवृत्त्यर्थमभिप्रेत्येदमाहुः अवश्यंभाविभोगानां प्रतीकारो भवेद्यदि तदा दुःखैर्न लिप्येरन्नलराम
युधिष्ठिरादय इति नन्वेवं जीवन्मुक्तिं प्रति वासनाक्षयमनोनाशयोः साक्षात्साधनत्वात्तत्त्वज्ञाने
त्वमयोः कस्मात् ज्ञानेन स्वबहिरत्वादुपसर्जनत्वे तत्त्वज्ञानस्य वासनाक्षयहेतुत्वं बहुधा श्रूयते ज्ञात्वा दे
वं सर्वपाशापहानिः अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति तरति शोकमात्मवित्
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ज्ञात्वा देवं मुच्यते सर्वपाशैरिति मनोनाशहेतुत्वं च तत्त्वज्ञा
नस्य श्रुतिसिद्धं विद्यादशायामभिप्रेत्येदं श्रूयते यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्तत्केन कं

वस्थितिः दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्जवं १ अहिंसासत्यमक्रोधस्त्यागःशांतिरपैशुनं दयाभू
तेष्वलोलुप्त्वंमार्दवंह्रीरचापलं २ तेजःक्षमाधृतिःशौचमद्रोहोनातिमानिता भवंतिसंपदंदैवीमभिजा
तस्य भारत ३ अथेदानीमासुरीसंपदुच्यते दंभेत्यादि दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अ
ज्ञानंचाभिजातस्यपार्थसंपदमासुरीमिति ४ पुनरप्यध्यायपरिसमाप्तिरासुरसंपत्प्रपंचिता तत्रा
शास्त्रीयायाःस्वभावसिद्धायाः आसुरसंपदोदुर्वासनायाः शास्त्रीययापुरुषप्रयत्नसाध्यया दैवसंप
दासद्वासनयाह्यपसर्पतीति जीवन्मुक्तिर्भवति वासनाक्षयवन्मनोनाशाभ्यासपि जीवन्मुक्तिहेतुत्वमुच्यते म तं ३
न एवमनुष्याणांकारणंबंधमोक्षयोः बंधायविषयासक्तंमुक्त्यैनिर्विषयंस्मृतं यतोनिर्विषयस्यास्य
मनसोमुक्तिरिष्यते अतोनिर्विषयंनित्यंमनःकार्यंमुमुक्षुणा निरस्तविषयासंगंसंनिरुद्धंचमनोहृदि
यदायात्युन्मनीभावंतदातत्परमंपदं तावदेवनिरोद्धव्यंयावद्धृदिगतंक्षयमिति एतत् ज्ञानंचध्यानंच
शेषोन्यायस्यविस्तरइति बंधोहिद्विविधः तीव्रोमंदश्च तत्रासुरसंपत्साह्यदैवत्वेऽपिहेतुत्वात्तीव्रोबं
धः दैवमात्रप्रतीतिस्तुस्वयमल्पेऽपिआरूपत्वादासुरसंपदुत्पादकत्वाच्चमंदः बंधः तत्रवासनाक्षयेदानीं

तमेव विदित्वातिमृत्युमेति यस्तु विज्ञानवान्भवति अमनस्कः सदाशुचिः सतु तत्पदमाप्नोति
यस्माद्भूयो न जायते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादीन्यब्रह्मत्वादिवं धनिर्हेतिप
ठितोऽवाक्यान्यत्रोदाहरणीयानि एषां विदेहमुक्तिर्ज्ञानोत्पत्तिसमकालीनत्वेनेति ब्रह्मरूपावि
र्भावोपलक्षणमेतेषां वेदान्तवाक्यानां विषयो विनाशश्चेति पुनरुत्पत्त्यसंभवादननुभवाच्च तदेतद्विद्यासमकाली
नत्वं भाष्यकारः समन्वयसूत्रे प्रपंचयामास तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशा
त् ननु वर्तमानदेहपातानन्तरं भाविनी विदेहमुक्तिरिति बहवो वर्णयंति तथा च श्रुतिः तस्य तावदेव
चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति वाचस्पतिनाप्युक्तं प्रारब्धकर्मवेगेन जीवन्मुक्तो यदा भवेत्
किंचित्कालमनारब्धकर्मबंधस्य संक्षये निरस्तातिशयानंदं वैष्णवं परमं पदं पुनरावृत्तिरहितं कैव
ल्यं प्रतिपद्यत इति सूत्रकारोप्याह भोगेन त्वितरे क्षपयित्वा संपद्यत इति इतरे प्रारब्धपुण्यपा
पे वसिष्ठोप्याह जीवन्मुक्तिपदं त्यक्त्वा स्वदेहे कालसात्कृते विशत्यदेहमुक्तित्वं पवनो स्पंदतामि

जिह्वादिस्यादि गौडपादाचार्यैश्चाहुः आत्मसत्यानुबोधेन न संकल्पयते यदा अमनस्तां तदा याति ग्राह्या
भावे तदग्रहम् इति जीवन्मुक्तेर्वासनाक्षयमनोनाशाविव विदेहमुक्तेः साक्षात्साधनत्वात्तज्ज्ञानं प्रधानं ज्ञा
नाद्विवतुकैवल्यं प्राप्यते येन मुच्यते इति स्मृतेः केवलस्यात्मनो भावः कैवल्यं देहादिरहितत्वं तच्च ज्ञानादे
व प्राप्यते सदेहत्वस्यानेककल्पितत्वेन ज्ञानैकनिवर्त्यत्वात् ज्ञानादेवेति एवकारेण कर्मव्यावृत्तिः नक
र्मणा न प्रजया धनेनेति श्रुतेः वस्तुज्ञानमात्रमनःप्रत्ययप्राप्तेः संस्कारवासनाक्षयमनोनाशावप्यस्य स व॰
गुणं ब्रह्मोपासनेनेत्यत आह तेन तस्यैव कैवल्यस्य प्राप्तिः लिंगदेहस्याऽनपायात् अत एकारेणैतावपि व्यवच्छेदितौ येन
मुच्यते इत्यस्यायमर्थः येन ज्ञानेन प्रापितकैवल्यत्वेन बन्धात् मुच्यत इति बन्धश्चानेकविधः अवि मु ५
द्याग्रन्थिर्ब्रह्मात्मं हृदयग्रन्थिः संशयः कर्मग्रन्थिः कर्माणि सर्वकामत्वं मृत्युः पुनर्जन्म इत्यादिकं घ शब्दे
नेत्येतत्र व्यवहारात् एतेषां धा सर्वेऽपि ज्ञाननिवर्त्याः तथा च श्रुतयः एतद्यो वेद निहितं गुहायां सोऽवि
द्याग्रन्थिं विकिरतीह सौम्येति ब्रह्मवेद ब्रह्मैव भवति भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयंते
चास्य कर्माणि तस्मिन्दृष्टे परावरे यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सहेति॥

सी·मु· निवृत्ते प्रारब्धक्षयेण भोगेन निवृत्तिस्तैलवर्त्तिः हितप्रदीपवत्सामग्री निवृत्त्या लिंगदेहो निवर्त्तते अतो
वे·त· नतन्निवृत्तिर्ज्ञानफलं ननु नैतेन न्यायेन मा विदेहनाशोपि न ज्ञानफलं तथा हि किमनाशमेव फ
२५ लं किं वा तत्प्रतिपालनं नाद्यः तस्य प्रागभावरूपत्वेनानादिसिद्धत्वात् न द्वितीयः अनारब्धक
र्मरूपसामग्री निवृत्त्यैव तस्या विदेहाशं भप्रा भप्रा अप्रतिपालनसिद्धेः न च तन्निवृत्तिः फलं
अविद्या निवृत्त्यैव विद्याफलत्वात् नैष दोषः भाविजन्मानारंभादीनां विद्याफलत्वस्य प्रामाणि
25 कत्वात् भूयोनजायते इत्युदाहृताः श्रु॰ तस्य तत्र प्रमाणं नच ज्ञानमज्ञानस्यैव निवर्त्तकमिति न्या
येन विरोधः अज्ञानसहभावि नियतानामसत्त्वादीनामज्ञाननाशेनापंचपादिकाचार्यैर्विव
क्षितत्वात् अन्यथानुभवविरोधः अनुभूयते ह्यज्ञाननिवृत्तिर्विदेहस्य ता दृ निवृत्तिर्पितस्मा
द्वा विदेहता हित्पतत्त्वणा विदेहमुक्तिर्नासमकालीना तथा च याज्ञवल्क्यवचनं श्रु॰ यत्ते अ
भयं वै जनकप्राप्तोसीति तस्य तावदेव चिरं यावन्न तत्त्वमितिच श्रु॰ यंतरेपि तमेवं विद्वानमृत इह
भवतीति यच्छ॰ सन्नेतत्वज्ञानेतस्फलभूता विदेहमुक्तिः तदानीं न भवेत् कालांतरे च भवेत् तदा

ता। राम
२५

वेति नायं दोषः विवक्षाविशेषेण सत्त्वं यस्याविरोधात् विदेहमुक्तिरित्यत्र ज्ञानेन देहप्राप्तेन कृत्स्नदेह
नाशे विवक्षितत्वात् बहुभिर्द्वीरितेति अस्माभिस्तु भाविदेहाभावमात्रं विवक्ष्यते तेन देहनाशं भावि
वज्ञानसंपादनात् अयं तु देहः पूर्वमेवारब्धः अतो ज्ञानेनापि नाशयितुं भोगं वारयितुं शक्यते एतद्दे
हनिवृत्तिरपि न ज्ञानस्य फलं अज्ञाननिनाशप्रारब्धकर्मक्षयेण निवृत्तेः तर्हि वर्तमानलिंगदेह
निवृत्तिर्ज्ञानफलमस्तु ज्ञानमंतरेण तन्निवृत्तेरिति चेन्न तस्यापि ज्ञानेन जीवन्मुक्तौ तन्निवृत्त्य
भावात् ननु ज्ञानस्यैकं चित्तात्वं प्रारब्धेन कर्मणा प्रतिबंधत्वेन निवर्तकत्वेऽपि प्रतिबंधक्षये
लिंगदेहनिवर्तकत्वं भविष्यतीति चेन्न पंचपादिकाचार्यैरपि एवं ज्ञानमज्ञानस्यैव निवर्तकमित्यु
पपादितत्वात् तर्हि लिंगदेहनिवृत्तेः किं साधनमिति चेत् सामग्रीनिवृत्तिरिति ब्रूमः द्विविधं
हि कार्यनिवर्तकं विरोधिसद्भावः सामग्रीनिवृत्तिश्च तद्यथा विरोधिना वायुना तैलवर्तिसामग्री
निवृत्त्या वा दीपो वर्तते लिंगदेहस्य साक्षाद्विरोधि न तत्पश्यामः सामग्री द्विविधा प्रारब्धमना
रब्धं चेति ताभ्यामुभाभ्यां अज्ञानिनां लिंगदेह इहामुत्र चावतिष्ठते ज्ञानिनां त्वनारब्धं ज्ञानेन

गी·मु· वहितत्वादुपसर्जनत्वं आसुरवासनाह्यपकारिण्यः दैववासनायाः ज्ञानसाधनत्वं श्रुतिस्मृ
वे·न त्योरुपलभ्यते शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतेः स्मृ
२६ तिरपि अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवं आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ७
इन्द्रियार्थेषु वैराग्यमनहंकार एव च जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं ८ असक्तिरनभि
ष्वङ्गः पुत्रदारगृहादिषु नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ९ मयि चानन्ययोगेन भक्ति
१०६ रव्यभिचारिणी विविक्तदेशसेवित्वमरतिर्जनसंसदि १० अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्श
७८ नं एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोन्यथेति अन्यत्रिष्वहंबुद्धिरभिष्वङ्गः ज्ञायतेनेनेति ज्ञा
नमात्मज्ञानसाधनमित्यर्थः मनोनाशस्यापि ज्ञानसाधनत्वं श्रुतिस्मृतिप्रसिद्धं ततस्तु तं पश्यति
निष्कलं ध्यायमान इति श्रुतेः अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति च श्रु
त्यात्मसमाधिप्राप्त्यदर्शनादित्यर्थः यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ज्योतिः पश्य
न्ति युञ्जानास्तस्मै योगात्मने नमः इति स्मृतेः तदेवं तत्त्वज्ञानादीनां त्रयाणां विदेहमुक्तिं जीवन्मुक्तिं व प्रा
ति गुणप्रधानभावव्यवस्थोक्ता ननु विविदिषासंन्यासिनां संपादितानां एतेषां किं विद्वत्संन्यास
राम
२६

ऽपीति चेत् मार्दविकज्ञानजन्यमपूर्वं किं चित्कल्पेत् तथा च कर्मणामुक्त्येव ज्ञानेन शास्त्रमंतरं भ
वेत् ॥ अथ चोच्यते मंत्रादिप्रतिबंधाभाववत् प्रारब्धप्रतिबंधे ज्ञानं कालांतरे विदेहमुक्तिं दास्यतीति चे
वं ॥ अविरोधात् न ह्यस्मदभिप्रेताभावविदेहावस्थाभावलक्षणा विदेहमुक्तिर्वर्तमानदेहमात्र
स्थापकेन प्रारब्धेन विरुध्यते येन प्रतिबध्येत् किं च दृष्टार्थकत्वेन कालांतरे स्वयमविद्यमानं ज्ञा
नं कथं मुक्तिं दद्यात् ज्ञानोत्तरं चरमसाक्षात्कारलक्षणमुक्तत्वस्य तत्त्वसिद्धेः न साधनाभावात्संति
बंधकप्रारब्धनिवृत्त्यैव सहमुक्तिलक्षणविदेहे क्रियाद्यशेषवस्तुगतप्रतिभासनिवृत्तेः किं ते साधनं स्यात् हि
भूयश्चांते विश्वमायानिवृत्तिरित्येतस्याः श्रुतेः कोऽर्थ इति चेत् प्रारब्धांते निमित्ताभावाद्देहेंद्रियाद्य
शेषनैमित्तिकनिवृत्तिरित्येवार्थः ततो भवदभिमता वर्तमानदेहराहित्यलक्षणा विदेहमुक्तिः प्रारब्धा २४
स्तु ॥ अस्मदभिमता तु ज्ञानसमकालीनैव एतदेवाभिप्रेत्य भगवान् भाष्यकृदाह तीर्थे श्वपचगृहे वा
नष्टस्मृतिरपि परित्यजन्देहं ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति तस्माद्विदेहमुक्तौ
साक्षात्साधनस्य तत्त्वज्ञानस्य प्राधान्यमुपपन्नं ॰ वासनाक्षयमनोनाशयोर्ज्ञानसाधनत्वेन

जी॰मु॰ प्रारब्धेनतत्वावधमानत्वाच्च प्रवातप्रदेशस्थप्रदीपवत् सहसा निवर्त्तते तदाह वसिष्ठः पूर्वाभ्यस्तप्रय
वे॰न त्नेभ्यो विषयेभ्यो यः संभ्रमः सततं दुःसाध्यो वासनात्यागः सुमेरून्मूलनादपीति अर्जुनोपि चंचलं हि मनः
२७ कृष्ण प्रमाथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करमिति तस्मादिदानीं तन्नानाविदुषां सं
न्यासिनां ज्ञानस्यानुवृत्तिमात्रं वासनाक्षयमनोनाशौ तु प्रयत्नसंपाद्याविति स्थिते ननु के ते वा
सनाः यासां त्यागः दुःसाध्य इति चेत् तत्स्वरूपमाह वसिष्ठः दृढभावनया त्यक्तपूर्वापरवि
चारणं यदादानं पदार्थस्य वासना सा प्रकीर्तिता १ भाविततीव्रसंवेगादात्मना यत्तदेव सः भवत्याशु
27 महाबाहो विगतेतरसंस्मृतिः २ तादृग्रूपो हि पुरुषो वासनाविवशीकृतः संपश्यति यदैवैतत्स
द्वस्त्विति विमुह्यति वासनावेगवैवश्यात्स्वरूपं प्रजहाति तत् भ्रांतं पश्यति दुर्दृष्टिः सर्वं मदवशा
दिवेति अत्र स्वस्वदेशाचारकुलधर्मभाषाभेदतत्कृतापशब्दसुशब्दादिषु शिष्टाभिमानाभिनिवेशः
सामान्यत उदाहरणं विशेषतस्तु भेदानुदाहरणपश्चादुदाहरामः यथोक्तां वासनामभिप्रेत्य बृहदारण्य
के श्रूयते स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसं

राम
२७

दृष्टमनुवृत्तिमात्रे किंवा पुनरपि संपादनप्रयत्नापेक्षित: नाद्य: तत्वज्ञानसंपादनयोरन्यतरसिद्धत्वे प्राधान्य
प्रयुक्तांतराभावप्रसंगात् न द्वितीय: इतरयोरिव ज्ञानस्यापि यत्नसापेक्षत्वे सत्युपसर्जनत्वप्रयुक्तौदासी
न्याभावप्रसंगात् नायं दोष: ज्ञानस्यानुवृत्तिमात्रमितरयोर्यत्नसाध्यत्वमंगीकारात् तथाहि विद्या
धिकारी द्विविध: कृतोपास्तिरकृतोपास्तिश्चेति तत्रोपास्यसाक्षात्कारपर्यंतामुपास्तिं कृत्वा यदि
ज्ञाने प्रवर्तते तदा वासनाक्षयमनोनाशयोर्दृढतरत्वेन ज्ञानादूर्ध्वं विद्वत्संन्यासजीवन्मुक्ती स्वत
एव सिध्यत: तादृशश्चैव शास्त्राभिहितो मुख्योधिकारी ततस्तं प्रति श्राद्धपूर्वहोमन्यासात् स्वस्व
रूपेण विविक्तावपि विद्वत्संन्यासविविदिषासंन्यासौ संकीर्णाविव प्रतिभासेते इदानींतनास्तु प्रा
येणाकृतोपास्तय एवौत्सुक्यमात्रात्सहसा विद्यायां प्रवर्तंते वासनाक्षयमनोनाशौ च तत्कालि
कौ संपादयंति तेवता श्रवणमनननिदिध्यासनानि निष्पाद्यंते तैश्च दृढाभ्यस्तैरज्ञानसंशय
विपर्ययनिरासात्तत्वज्ञानं सम्यगुदेति तस्य बाधकप्रमाणाभावान्निवृत्ताया अविद्यायाः पुनरुत्पत्ति
कारणाभावाच्च नास्ति तस्य शैथिल्यं वासनाक्षयमनोनाशौ तु दृढाभ्यासाभावात् भोगप्रदेन

धपरायणाः । ईहन्ते कामभोगार्थमन्यायेनार्थसंचयानिति ९ धनाहंकारश्च तत्रैवोदाहृतः । इदमद्य
मया लब्धमिदं प्राप्स्ये मनोरथं । इदमस्तीदमपि मे भविष्यति पुनर्धनं १ असौ मया हतः शत्रुर्हनिष्ये
चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी २ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो
मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ३ अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचाविति एतेन पुनर्दम्भकारकत्वमुदाहृतं भवति तत्र पुनः
प्रपंचितं आत्मसंभाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकं ११
अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः १२ तानहं
द्विषतः क्रूरान्संसारेषु नराधमान् । क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु आसुरीं योनिमापन्ना
मूढा जन्मनि जन्मनि मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति मुमुक्षासनकानुत्तालतेयाते
य स्वरूपं त्रयोदशेऽध्याये भगवानाह ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादिमत्परं ब्र
ह्म न सत्तन्नासदुच्यते १ सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमा

पश्यतइति वासना भेदो वासनी कि नाद र्शितः वासना द्विविधा प्रोक्ता शुद्धाच मलिना तथा मलिना
जन्महेतुः स्यात् शुद्धा जन्म विनाशिनी अज्ञान सुघनाकारा घनाहंकार शालिनी जन्ममृत्युकरी प्रोक्ता
मलिना वासना बुधैः पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभृष्टबीजवत् देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चो
च्यतइति देहादीनां पञ्चकोशानां तत्संस्कारा अविद्यात्मनः प्रमेदा वारक मतानंतेन सुघनीभूतत्वाख्या
रोपस्याः सा ज्ञान सुघनाकारा यथा क्षीरं तक्रमेलनेन घनीभूतं भवति यथा वा विलीनं घृतमसं
तशीतलप्रदेशे चिरमवस्थापितं सुघनी भवति तथा वासनादृष्ट्या घनीभाव आत्रभ्रांतिपरंपरा
तां चासुरसंपद्विरतो भगवानाह प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः न शौचं नापि चाचारो
न सत्यं तेषु विद्यते १ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहैतुकं २
एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ३ काममाश्रित्य
दुःपूरं दंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्तन्तेऽशुचिव्रताः ४ चिंतामपरिमेयां च प्र
लयांतामुपाश्रिताः कामोपभोगपरमा एतावदिति निश्चिताः ५ आशापाशशतैर्बद्धाः कामक्रो

जी·मु· प्राद्रनायनापिजन्मांतरेहेतुधर्माधर्मोत्पादनायथासंभ्रमहाभिन्नीत्या द्वितीयानिकूष्मलपूर्णमात्रायो
वे·त· पयुक्तानिनलुरुचिराञ्जायनाप्रिसस्पनिष्पत्तयेतद्भूत मलिनाचवासनात्रिविधा लोकवासनाशास्त्र
२९ वासनादेहवासनाचेति सर्वजनायथानिंदंतुयथास्यात्तथैवसर्वदाचरिष्यामीत्यभिनिवेशो
लोकवासना तस्याश्चसंपादयितुमशक्यत्वान्मलिनत्वं तथाहि कोन्वस्मिन्लोके सांप्रतंगुणा
वान् कश्चवीर्यवान् इत्यादिनाबहुधावाल्मीकिः पप्रच्छ इक्ष्वाकुवंशप्रभवोरामोनामजनैःश्रुत
23 इत्यादिनाप्रत्युत्तरंनारदोददौ तादृशस्यापिरामस्यपतिव्रतायाश्रीरामपरिभूतायाः जगन्मातुःश्री
तायाश्चश्रोतुमशक्योजनापवादः संप्रवृत्तः किमुवक्तव्यमस्मदादीनां तथादेशभेदेविप्रादीनांपरस्परं निंदाबाहु
ल्यमुपलभ्यते दाक्षिणात्यैर्विप्रैरौत्तरीयावेदविदोविप्रामांसभक्षिणोनिंद्यंते चौत्तरैश्चमातुलकन्याप
रिणयपात्रास्पृष्टभांडवाहिनोदाक्षिणात्यानिंद्यंते बह्वृचाआश्वलायनशाखायाः कात्यसाखायाः
प्रशस्तांमन्यंते वाजसनेयिनस्तद्वैपरीत्येन एवंस्वस्वकुलगोत्रवर्गबंधुलेषुस्वकीयेषुदेवतादि
प्रशंसापरिकीयनिंदाचआविद्वदंगनागोपालं सर्वत्रप्रसिद्धा एतद्देवाभिप्रेत्योक्तं कोलोकमारा राम
२९

मावृत्यतिष्ठति २ सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृच ३
बहिरंतश्चभूतानामचरंचरमेवच सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत् ४ अविभक्तंचभूते
षुविभक्तमिवचस्थितं भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुचः ५ ज्योतिषामपितज्ज्योतिस्तमसःप
रमुच्यते ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यधिष्ठितमिति अत्रतटस्थलक्षणस्वरूपलक्षणाभ्या
२५ मेयंतुसोपाधिकनिरूपाधिकस्वरूपद्वयमुपन्यस्तं ननुत्वयुक्तपूर्वापरविचारत्ववासनालक्ष
णामुक्तं ज्ञेयंज्ञानेचविचारजन्यं अतोनशुद्धायांतत्वाद्गुणामलिमेवं लक्षणोदृ[illegible]ढभावनयेत्यु
क्तत्वात् यथावद्भुक्तान्नस्यदृढभावित्वेनाक्षिनुजन्मनिविनैवपरोपदेशमहंकारममकारकामक्रोधा
दयोमलिनवासनाउत्पद्यंते तथाप्राथमिकस्यबोधस्यविचारजन्यत्वेपिदीर्घकालनैरंतर्यसत्कारैर्भा
वितत्वेपश्चाद्वाक्ययुक्तिपरामर्शमंतरेणैवपरोक्षवद्घटादिवत्सहसातत्वंपरिस्फुरति तादृशबोधा
नुवृत्यासहितइंद्रियव्यवहारः शुद्धवासनासाचदेहजीवनमात्रायोपयुज्यते ननुदंभदर्पाद्यासुरसंपद्

श्री·मु·
वे·न·
३०

ति नेति । अन्यत्राप्युक्तं बहुशास्त्रग्रंथैरीशार्थैः कथाकंथारोमंथेन वृथैव किं । अन्वेष्टव्यं प्रयत्नेन तत्त्व
ज्ञैर्ज्योतिरांतरमिति । अधीत्य चतुरो वेदान् धर्मशास्त्राण्यनेकशः । ब्रह्मतत्त्वं न जानाति दर्वी पाकर
सं यथा ॥ इति च नारदश्चतुःषष्टिकलाविद्याकुशलोऽपि अनात्मवित्त्वेनानुतप्तः सनत्कुमारमुपससा
देति छांदोग्ये श्रूयते । अनुष्ठानव्यसनं विष्णुपुराणे निदाघस्योपलभ्यते वाक्पिष्टसामान्योदा
श्वरस्य निदाघो हि ऋभुणा पुनः पुनः प्रबोध्यमानोऽपि कर्मश्रद्धालुत्वाच्चिरं न जहौ दाशूरश्चात्यंतश्रद्धा
जाड्येनानुष्ठानायश्रद्धः प्रदेशे भस्मौनङ्कापि दुपलेभे । अस्याश्च कर्मवासनायाः पुनर्जन्महेतुत्वान्म
लिनत्वं तथा चाथर्वणिका अधीयंते प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तं अवरं येषु कर्म ए
तच्छ्रेयो येऽभिनंदंति मूढा जरामृत्युं ते पुनरेवापियंति । अविद्यायामंतरे वर्त्तमानाः स्वयं धीराः पंडितं
मन्यमानाः जंघन्यमानाः परियंति मूढाः अंधेनैव नीयमाना यथांऽधाः । अविद्यायां बहुधा वर्त्तमाना
वयं कृतार्था इत्यभिमन्यंति बालाः । यत्कर्मिणो न प्रवेदयंति रागात्तेनातुराः क्षीणलोकाश्च्यवंते
इष्टापूर्त्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयंते प्रमूढाः । नाकस्य पृष्ठे ते सुकृतेनानुभूत्वेमं लोकं ही

राम
३०

धयितुं समर्थ इति विद्यते न खलु कश्चिदुपायः सर्वलोकपरितोषकरो यः सर्वथा स्वहितमाचरणीयं किं
करिष्यति जनो बहुजल्पः इति च अतो लोकवासनायाः मलिनत्वमभिप्रेत्य योगीश्वरस्य तुल्यनिंदास्तु
तित्वं मोक्षशास्त्रेषु वर्णितं शास्त्रवासना च त्रिधा पाठव्यसनं बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चे
ति पाठव्यसनं भारद्वाजेवगम्यते स हि पुरुषायुषत्रयेण बहून्वेदानधीत्य इन्द्रेण चतुर्थायुषि प्रलोभि
मं ५ तस्तत्रापि पुनरपि वेदाध्ययनायोद्योगं चकार तस्यापि पाठस्यापुरुषार्थत्वात् मलिनवासनात्वं तच्चाश्रु
तिसिद्धः प्रतिबोधपाठान्निवर्तिततोऽप्यधिकापुरुषार्थाभावात् बहुशास्त्रव्यसनस्य मालिन्यं कावषेय
गीतायामुपलभ्यते यस्य गुरुणा ब्रह्मविद्यामुपादिदेश प्रातद्देतत्सर्वं तैत्तिरीयब्राह्मणे द्रष्टव्यं तथैवात्यंतिकपु
रुषार्थाभावात् बहुशास्त्रव्यसनस्य मालिन्यं कावषेयगीतायामुपलभ्यते दुर्वासा मुनिर्बहुविधशास्त्रपुस्त
कभारैः सह महादेवं नमस्कर्तुमागतः तत्सभायां नारदेन मुनिना भारवाही गर्दभसाम्यमापादितः कोपा
त्पुस्तकानि लवणार्णवे परित्यज्य महादेवेनात्मविद्यायां प्रवर्तित इति आत्मविद्याचानंतरमुखस्य पुरुषका
रापरहितस्य न वेदशास्त्रमात्रेणोत्पद्यते तथा च श्रुतिः नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुधा श्रु

मा २

गी·मु· विरोचनः प्रजापतिनानुशिष्टोपि स्वचित्तदोषेण देहे आत्मबुद्धिं दृढीकृत्यासुरान्सर्वाननुशशासेति
वे·न· छंदोगास्मिन्नध्याये संस्मरंतेति गुणाधानं द्विविधं लौकिकं शास्त्रीयं चेति समीचीनपुष्टाहारादिसंपादनं लौकि
३१ कं कोमलमलिनांगानुमर्दनं तैलपानमरिचमद्यपानादिना लोकाः प्रयतंते मृदुत्वप्राप्तये लो
काः पुष्टिकरौषधाहारानुपयुंजते लावण्याय अभ्यंगोद्वर्तनदुकूलालंकारानुपसेवंते सौ
गंधाय स्रगनुलेपनं धारयंति शास्त्रीयं तु गंगास्नानं शालिग्रामतीर्थादिकं संपादयंति दो
षापनयनं च चिकित्सकोक्तैरौषधैर्मुखादिप्रक्षालनेन च लौकिके शौचाचमनादिना वैदिकमित्युभय
32 विधं अस्याशुद्धदेहवासनायामालिन्यं दृश्यते देहस्यात्मत्वं तावदप्रामाणिकत्वाद्दोषदुष्टत्वहेतुत्वाच्च
मलिनत्वं अस्मिन्नर्थे पूर्वाचार्यैः सर्वैरपि पराक्रांतं गुणाधानं च प्रायेणानुपपन्नं पूपाभः प्रक्षिप्ता ए
व गायकाः अध्यापकाश्च प्रयतमाना अपि बहवो धनिनः सौष्ठवं न लभंते मृदुस्पर्शपुष्टिश्च न नियता शौ 6
लावण्यं सौगंध्यं अपि दुकूलस्रगादिनिष्ठं न तु देहनिष्ठं अत एव विष्णुपुराणे अभिहितं मांसासृक्पू
स्थि २ यविण्मूत्रस्नायुमज्जास्थिसंहतौ देहे चेत्प्रीतिमान्मूढो भविता नरकेपि सः स्वदेहाशुचिगंधेन न विरज्येत यः
पुमान् वैराग्यकारणं तस्य किमन्यदुपदिश्यते शास्त्रीयगुणः प्रबलेन शास्त्रांतरेणापि हीयते ॥॥ राम

३१

नमस्तरं वा विशंतीति भगवताप्युक्तं यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्ती
तिवादिनः १ कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति भोगैश्व
र्यप्रसक्तानां तयापहृतचेतसां व्यवसायात्मिका बुद्धिः समाधौ न विधीयते त्रैगुण्यविषया वेदा निस्त्रै
गुण्यो भवार्जुन निर्द्वंद्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् यावानर्थ उदपाने सर्वतः संप्लुतोदके ता
वेदेषु वान्सर्वेषु ब्राह्मणस्य विजानत इति दर्पहेतुत्वाच्छास्त्रीयवासनाया मलिनत्वं श्वेतकेतुरपि स्वल्पे
नैव कालेन सर्वान्वेदानधीत्य सदर्प्यो ता पितुरपि पुरतो विनियं न चकारेति छांदोग्ये षष्ठाध्याये पठ्यते वाला
किः कानिचिदुपासनानि भगवत्सद्दृप्तस्तु उशीनरादिषु वत्सकुरुषु देशेषु बुद्धिविजयेन बहून्विप्रानवज्ञाय काश्या
मजातशत्रुं ब्रह्मविच्छिरोमणिं प्रत्युपगम्य प्रोक्तुं धार्ष्ट्यं चकारेति कौषीतकिनो वाजसनेयिनश्चाधीयं
ते देहवासनाप्यात्मत्वे गुणप्रधाने दोषापनयने भ्रांतिस्त्रिविधा तत्रात्मत्वे भाष्यकार उदाजहार देह
मात्रं चैतन्यविशिष्टमात्मेति प्राकृता जनाः लोकायतिकाश्च प्रतिपन्ना इति स वा एष पुरुषोऽन्नर
समय इत्यारभ्य तस्मादन्नं तदुच्यत इत्यंतेन ग्रंथेन तामेव प्राकृतां प्रतिपत्तिं तैत्तिरीयाः स्पष्टीकुर्वंति

सुयात् तदुक्तं पूर्वाचार्यैः न विच्छिद्यते देहे सर्वं ते घटिकाइव वा द्युप्रौ चैर्न प्रश्यंति चांतः
श्रो चेन्न विद्यते अतो देहवासना मलिना तदेतन्मालिन्यमभिप्रेत्य वसिष्ठ आह आपाद
मस्तकमहंमातापितृविनिर्मितः इत्येको निश्चयो राम बंधायासद्विलोकनात् सा काल सू
त्रपदवी सा महावीचिवागुरा सासिपत्रवनश्रेणी या देहेहमिति स्थितिः सा त्या ज्या सर्वयत्ने
न सर्वनाशेप्युपस्थिते स्प्रष्टव्या सा न भव्येन सश्वमांसेव पुक्कसीति तदेतल्लोकशास्त्रदेह
32
वासनात्रयमविवेकिनामुपादेयत्वेन प्रतिभासमानेपि विविदिषोर्वेदनोत्पत्तिविरोधित्वा
द्विदुषो ज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं अत एव स्मर्यते लोकवासनया जंतोः शा
स्त्रवासनयापि च देहवासनया ज्ञानं यथावन्नैव जायते यात्तु दंभदर्पादिरासुरसंपद्रूपा मा
नसवासना तस्या नरकहेतुत्वान्मालिन्यमतिप्रसिद्धं ततः केनाप्युपायेन वासनाचतुष्टय
स्य क्षयः संपादनीयः यथा वासनाक्षयः संपादनीयः तथा मनसोपि न च लौकिकवन्निस्स
द्रूपमरूपपरिमाणो मनो वैदिका अभ्युपगच्छंति येन मनोनाशो दुःसंपाद्यः स्यात् किंतु
हि सावयवम

यथा न हिंस्यात्सर्वभूतानीत्यस्यार्थो भोगार्थं पशुमालभेतेत्यनेनापवादः कृतः एवं लंचशास्त्रमेतत्
ऽप्यपशास्त्रापेक्षया यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इज्यधीः यत्तीर्थबुद्धि
सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव गोखरः अत्यंतमलिनो देहो देही चात्यंतनिर्मलः उभयो
रंतरं ज्ञात्वा कस्य शौचं विधीयते इति च यच्च प्यनेन शास्त्रेण दोषापनयनं प्रतिविधानेन तु गुणा
धानं तथापि सति विरोधे निष्प्रबलदोषे गुणाधानमप्रकांडं समर्थो गुणाधानस्य प्रतिषेधः
अत्यंतमालिन्यं चात्रमेत्रायणीयशाखायां श्रूयते भगवन्नस्थिचर्मस्नायुमज्जामांसशुक्रशो
णिते श्लेष्माश्रुदूषिते विण्मूत्रवातपित्तसंघाते दुर्गंधे निःसारेऽस्मिन्शरीरे किं कामोपभोगे
रिति शरीरमिदं मैथुनादेवोद्भूतं संविद्यपेतं निरय एव मूत्रद्वारेण निःक्रांतमस्थिभिश्चितं
मांसेनानुलिप्तं चर्मणावनद्धं विण्मूत्रकफपित्तमज्जामेदोवसाभिरन्यैश्च मलैः बहुभिः परिपू
र्णं कोशकृद्वदवस्थितं चिकित्स्याश्च रोगाः शांतिर्नियता शांतोऽपि रोगः कदाचित्पुनरुदेति
नवच्छिद्रैर्निरंतरं स्रवत्सु मलेषु रोमकूपैः संस्रवति ईदृशे गात्रे को नाम विद्वान् प्रक्षालयितुं शक्नु

गी॰मु॰ तत्र ह्रलोके व्याख्यायते प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डवेत्यभिधानात् सांख्ये शास्त्रेऽपि प्रकाशप्रवृत्तिनियमार्था
वे॰त॰ इत्युक्तं प्रकाशो नाम सात्त्विक भावे स्वरूपः किंतु ज्ञानं सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च प्रमादमोहौ तमस
३३ तो भवतोऽज्ञानमेव चेत्युक्तत्वात् ज्ञानवत्सुखमपि सत्त्वकार्यं तदप्युक्तं सत्त्वं सुखे संजयति रजः कर्मणि भारत
ज्ञानमावृत्य तु तमः प्रमादे संजयत्युतेति समुद्भूतं रागवान्नित्यं तं परिणामसमानेषु गुणेषु कदाचित्कश्चिदुद्भ
वति इतरावभिभूयेते तदुक्तं रजस्तमश्चाभिभूय सत्त्वं भवति भारत रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथे
३३ ति बाध्यबाधकतां यांति कल्लोलाई सागरे इति च तत्र तमस उद्भवे आसुरसंपदुदेति रजस उद्भवे सति उ
लोकादिवासनास्तिस्रो भवंति सत्त्वस्योद्भवे सति दैवी संपदुपजायते एतदेवाभिप्रेत्योक्तं सर्वद्वारेषु देहे
ऽस्मिन् प्रकाश उपजायते ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत इति यद्यप्यंतःकरणं त्रिगुणात्मकं भा
स्व २ सते तथापि सत्त्वमेवास्य मुख्यमुपादानकारणं रजस्तमसी तूपष्टंभके अत एव ज्ञानिनो योगाभ्यासेन रज
स्तमसी अपनीतयोः सत्त्वमेव स्वरूपं परिशिष्यते तदेवाभिप्रेत्योक्तं तस्य चित्तस्य चित्रं स्यात्तच्चित्तं सत्त्वमुच्य
त इति तत्र सत्त्वं चांचल्यहेतुरजोगुणसंपृक्तत्वादेकाग्र्यं प्राप्नोति कल्पितानानात्मस्वरूपस्थूल पदार्थाकारेण तु

राम
३३

नित्यंसर्वदाजन्तुसुवर्णं द्विवद्ददु विधवणामा हिंदूमंमनस्तत्स्वलक्षणंप्रमाणंचवाजसनेयिनः समाम
नंति कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वंमन एवेत्येतल्लक्षणं कामा
दिवृत्तयः क्रमेणोत्पद्यमाना अर्थं दुःख प्रत्यक्ष घटवत् साक्षिप्रत्यक्षेणोत्पत्तिस्पष्टं भासंते न ह्यनुपादानंमनइत्य
त्यर्थः अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति
इत्येतत्प्रमाणं॥ चक्षुःसन्निकृष्टस्फीतालोकमध्यवर्ती घटः श्रोत्रसन्निकृष्टश्शब्दः पटिष्ठेदश्चयस्यानव
धानेसतिनप्रतीयते अवधानेनुप्रतीयते तादृशं सर्वविषयोपलब्धिसाधारणकारणमन्वयव्यतिरेकाभ्यां
प्रतीयतेइत्यर्थः तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानातीत्येतदुदाहरणं यस्मान्नेलक्षणप्रमाणो
भ्यां सिद्धं मनस्तस्मात्तदेवमुदाहरणीयं पृष्ठभागे व्यन्येनोपस्पृष्टोऽविवक्तो विशेषेणजानाति हस्तस्पर्शो
यमंगुलिस्पर्शोयमिति न हि तत्र चक्षुः प्रसरति त्वगिंद्रियंतुमात्रं वस्तु छिन्नमहोउपलब्धं तस्मान्मन
एवविशेषज्ञानकारणं परिशिष्यते तच्चमनआत्मनइतिचेन्नात्मन इतिचाभिधीयते तच्चित्तं सत्वरजस्तमो
गुणात्मकंप्रकाशप्रवृत्तिमोहानां सत्वादिकार्याणांतत्र दर्शनात् प्रकाशाहीनांचगुणकार्यत्वं गुणानी

जी॰मु॰
वि॰
३४

गृहाणामलवासना: ता अप्यंतः परित्यज्य ताभिर्व्यवहरन्नपि अंतःशांतसमः स्नेहो भव चिन्मात्रवासनः
तामप्यथ परित्यज्य मनोबुद्धिसमन्विता: शेषे स्थिरसमाधानो येन त्यजसि तत्त्यजेति अत्र मानसवास
नाशब्देन पूर्वोक्ता शास्त्रलोकदेहवासना विवक्षिता विषयवासनाशब्देन दंभदर्पाद्यासुरसं
पद्विवक्षिता मदत्वतीव्रत्वेन द्वैविध्याभेदकारतो शब्दस्पर्शरूपरसगंधा विषयास्तेषां काम्यमा
नत्वदशाजन्य: संस्कारो मानसवासना भुज्यमानत्वदशाजन्य: संस्कारो विषयवासना अस्मिन्पक्षे
पूर्वोक्तानां च तस्य णामन्तर्भाव: शास्त्रादीनां व्यतिरेकेण वासनांतरासंभवात् ननु वासनानां
परित्याग: कथं घटते न हि ताम्रनिराक्रियते येन समार्जनीय समाहित धूलिरेव बहुत्वेनाधर्मवहि
स्पष्टाम्य: मैवं उपवासजागरणवत्तदुपपत्ते: स्वभावप्राप्तयोर्भुक्तिक्रियानिद्रयोरभ्यासेऽपि तद्वत्परि
त्यागरूपेषु उपवासजागरणे सर्वैरप्यनुष्ठीयेते न तु दृष्टाप्यस्तु अद्य स्थित्वा निराहार इति मंत्रेण सं
कल्पं कृत्वा सावधानत्वेनैव स्थानगता: इति चेत् अत्रापि न नः इत्यादि रितिप्रैषमंत्रेण संकल्प्य प्रसवेत्

34

राम
३४

तमोगुणोऽप्यस्याल्पत्वात्सूक्ष्मः ततः अथात्मदर्शनयोग्यमतः एव श्रुतिः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्
शिभिरिति न खल्वनया बुद्ध्या ध्यायमानेन प्रदीपेन मलिमुक्तादिलहरा णि भिन्नि द्वार घितं शक्यंते नापि स्थू
लेन वानित्रेण सूक्ष्ममत्र सूक्ष्मपदार्थस्फूर्तिः संभवति तदेवं तदीदृशं सत्त्वमेवात्मयोगियुक्तमागुणत्रयमयेन ज्ञानेन रजोगु
णेनोपष्टब्धवृत्तिविधेहितसंकल्पेन चेतयमानं चित्तं भवति तच्चित्तं तमोगुणाधिकं सत् आसुरीसंपदमुपा
श्रित्यासीनं भवति तथाहि वसिष्ठः अनात्मन्यात्मभावेन देहभावनयातथा पुत्रदारैश्च चेतो गच्छतीति पी कुं ८
नतां २ अहंकारविकारेण ममतामलल्लीलया इदं ममेति भावेन चेतो गच्छतीति पीनतां १ अधिव्याधिविला
सेन समभ्यासेन संसृतौ हेयोपादेयविभागेन चेतो गच्छतीति पीनतां लोभनघनलोभेनालाभेन मरणाबा
तां आयातरमणीयेन चेतो गच्छतीति पीनतां दुराशाक्षीरपानेन भोगानिलवलेनच आस्थादानेन चारुता
चेतो हि यातीति पीनतामिति तदेवं विनाशिनी यथा वासनामनसः स्वरूपं निरूपितं अथ वासनाद्वयमनोना
शोपक्रमेणानिरूप्यते तत्र वासनाद्वयप्रकारमाह वसिष्ठः बंधो हि वासनाबंधो मोक्षः स्याद्वासनाक्षयः वा
सनास्त्वं परित्यज्य मोक्षार्थित्वमपि त्यज मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानाम्नी

यो·सू· दुःखितेषु भावयेत् तदा वैर्यादिद्वेषनिवृत्तौ चित्तं प्रसीदतीति अत एव स्मर्यते प्राणा यथात्मनोऽभीष्टा भूता
वे·त· नामपि ते तथा आत्मौपम्येन भूतानां दयां कुर्वन्ति साधव इति तत्प्रकारं च महात्मानो दर्शयन्ति सर्वे त्र सुखि
३५ नः सन्तु सर्वे सन्तु निरामयाः सर्वे भद्राणि पश्यन्तु मा कश्चित् पापमाप्नुयादिति १ तथा हि प्राणिनः स्व
भावत एव पुण्यं नानुतिष्ठन्ति पापं त्वनुतिष्ठन्ति तदाहुः पुण्यस्य फलमिच्छन्ति पुण्यं नेच्छन्ति मानवाः न पा
पफलमिच्छन्ति पापं कुर्वन्ति यत्नत इति नैव पुण्यपापेषु पश्चात्तापं जनयतः स च तापः श्रूयते किं
अहं साधु नाकरवं किमहं पापमकरवमिति यस्तु सोऽपि पुण्येषु पुरुषेषु मुदितां भावयेत्तदा तद्वासनावा स
35 नावान् स्वयमेवाप्रमत्तः पुण्येषु प्रवर्तते तथा पापिषु उपेक्षां भावयन् स्वयमपि पापान्निवर्तते अतः प
श्चात्तापस्याभावेन चित्तं प्रसीदति सुखितेषु मैत्रीं भावयतो न केवलं रागनिवृत्तिः किन्तु असूयेर्ष्यादि
दोषोऽपि निवर्तते २ परगुणानामसहनमीर्ष्या गुणेषु दोषाविष्करणमसूया यदा मैत्रीं बध्नात् प
रकीयसुखे स्वकीयमेव संपद्यते तदा परगुणेषु कथमसूयादिकं संभवेत् एवं दोषान्तरनिवृत्ति
राम ३५

नावस्थात्वंप्रकाशत्वात् वैदिकमंत्रानधिकारिणांतु भाषयासंकल्पोस्तु यद्वितत्र प्राकृतयोदेनादिसन्निधि
त्यागस्तर्हि मंत्रापिसकर्चंदनवमिनादिसन्निधिपरित्यागोस्तु अथतत्रचतुर्मुद्रानित्रालस्यादिविस्मा
रकैः पुराणोक्तवर्णदेवपूजानत्यागीत्वादिश्राद्धिभिश्चित्तमुपलालयेत् तर्ह्यत्रापि मैत्र्यादिभिस्तदु
पलालयेत् मैत्र्यादयश्चपतंजलिनासूत्रिताः मैत्रीकरुणामुदितोपेक्षाणांसुखदुःखपुण्यापुण्य
विषयाणांभावनातश्चित्तप्रसादनमिति चित्तंहि रागद्वेषपुण्यपापैः कलुषीक्रियते रागद्वेषौ च पतंज
लिरसूत्रयत् सुखानुशयीरागः दुःखानुशयीद्वेषइति स्नेहादनुभूयमानं सुखमनुस्मृत्य कश्चित्तं क
लुषीकरोति यदासुखिविषयंमैत्रींभावयेत् सर्वेप्येतेसुखिनोमदीयादिति तदातत्सुखं स्वकीयमेवसंप
न्नमितिभावयतस्तत्र सुखेरागोनिवर्तते यथास्वस्यराज्याभावेपि पुत्रादिराज्यमेवस्वकीयराज्यंतद्वन्नि
वृत्तेरागेवर्षास्वतीतासुशरत्सरिदिवचित्तंप्रसीदति तथादुःखमनुस्मृत्य कश्चिन्नस्मयः द्वेष्टि शंसर्वेदुः
खेसर्वदामेमाभूदिति तत्र शत्रुव्याघ्रादिषुसत्सुनतिवारयितुंशक्यं नचसर्वेदुःखहेतवोहंतुंशक्यंते अ
तः सद्वेषः सदाहृदयंदहति यदास्वस्यैवपरेषांसर्वेषांप्रतिकूलंदुःखंमाभूदिति अनेनप्रकारेणकरुणां
द्वीवृत्तिविशेषः सुखजातीयंसर्वमेनृपशु[illegible]दितितन्नोहृदयं दृष्टसामान्[illegible]गव्यभावात्तन्नसंपादयतुंशक्यते
स्वतःसरागाभिवृत्तैः ॥ ६

जी.मु.
वे.त.
३६

तुष्टयमुपलब्धं तेनाभयं सत्संगं शुद्धिरित्यादिदैवी संपद् समानित्वमदंभित्वमित्यादि ज्ञानसाधनानि ज्ञी
वन्मुक्तिस्थितप्रज्ञादिवचनोक्तधर्मश्चोपलक्ष्यते सेयं सामेत्यां शुभवासनारूपत्वेन मलिनवासनानि
वर्तकत्वात् [redacted] ननु सत्यनेनः शुभवासनानां चैकेन तां सर्वा शुभवास्यतु प्राक्तं
ते निरर्थकश्चुतदभ्यासप्रयासस्तुतिचेत् तन्न तन्निवृत्यानामनंतानां मलिनवासनानामेकस्यनरस्या
संभवात् न ह्यायुर्वेदोक्ता निखिला रोगौषधानि एकेन मे विनुप्राकांते नापितन्निवर्त्याः सर्वे रोगाए
कस्यदेहे संभवंति एवं तर्हि स्वचित्तं प्रथमतः परीक्ष्य तत्र यावत्यो मलिनवासनाः तदालावतीः
विरोधिनीः शुभवासनाभ्यसेत् यथापुत्रमित्रकलत्रादिभिः पीड्यमानस्तेभ्यो विरक्तस्तन्निवर्त
कं पारिव्राज्यं गृह्णाति तथा विद्यामदधनमदकुलाचारमदादिमलिनवासनाभिः पीड्यमानस्तद्विरो
धिनं विवेकमभ्यसेत् स च विवेकोऽनेन दर्शितः अप्रयोमहतां मत्[illegible]ते दिनेनिपतंत्यधः हेतचित्त
महतां यत्कैव विस्मृतस्ततानवः क्वधनानि महीपानां क्वपलोकाः क्वजगंतिवा प्राकृतानि प्रयातानि कैयंवि
भ्रमस्ततानव २ कोटयो ब्रह्मणां याताः गताः सर्गपरंपराः प्रयाताः पांशुवद्भूपाः का धृतिर्मम जीविते ३

राम
३६

36

त्रिविधमितरेषामिति काम्यकर्मविधेः तत्त्वात् तच्च शुक्लं कृष्णं निषिद्धं मिश्रं च शुक्लकृष्णं तदेतत् त्रिविधमितरेषां
योगिनो ५

रपि च यायोगप्रमनुमेयात् दुःखिसुखकर्मणां भवेयतः शत्रुवधादिकरोऽहं सोऽयथा निवर्तते तथा दुःखित्वप्र
तियोगिकस्वसुखित्वप्रयुक्तोऽदर्शोपि निवर्तते स च दर्पः आसुरसंपद्व्यहंकारप्रस्तावे पूर्वमुदाहृतः ई
श्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मयेति ननु पुण्यात्म
सुखमुदितो भावयतः पुण्यप्रवृत्तिः फलत्वेनोक्ता सा च योगिनो न युक्ता मलिनायां शास्त्रवासनायां पुण्य
मतः भोग्यत्वमुदाहृतत्वात् नैवं पुनर्जन्मकरस्य काम्यस्य पुण्यादेस्तत्र मलिनत्वेनोदाहरणात् इह तु यो
गाभ्यासजन्यमशुक्लकृष्णत्वेन जन्मानापादकं पुण्यं विवक्षितं अशुक्लकृष्णत्वं पतंजलिः सूत्रयामास
कर्माशुक्लकृष्णं योगिनां संपद्यते तच्च त्रिविधं जन्मप्रयच्छतीति तदाहुर्विश्वरूपाचार्याः शुभैराप्नोति
देवत्वं निषिद्धैर्नारकीं गतिं उभाभ्यां पुण्यपापाभ्यां मानुष्यं लभतेऽवशः इति ननु योगस्यानिषिद्धत्वात्
काम्यत्वेऽपि विहितत्वाच्छुक्लत्वमिति चेन्नैवं अकाम्यत्वाभिप्रायेणाशुक्लत्वाभिधानात् अतोऽशुक्ल
कृष्णपुण्यप्रवृत्तिर्योगिनोऽपेक्षिता नन्वनेन न्यायेन योगिनो विषयोचितपुण्यात्मसुखमुदितो भावपि तत्पु
ण्यप्रवृत्तेर्मलिनत्वेन प्रवर्तमानामयमैत्र्यादिभिश्चित्तप्रसादयेति तथापि योगित्वात् मैत्र्यादि च

ना·सु· मुख्यापरोक्षविषयत्वेन विशेषतः प्रक्षोपलंभात् नचात्मज्ञानिनो विद्यामदृष्टाचार्यैर्नाभ्युपग
वे·न· म्यते न त्वाचउपदेशसाहस्यामभिहितं ब्रह्मवित्त्वं तथा मुक्तो लक्ष्यात्मज्ञोनचेतरदृति नैष्कर्म्यसिद्धा
३१ वपि नचात्माभिमानो पि विदुषो स्यास्तु त्वेतः विदुषो व्यासुरश्रेत् स्यात् निःफलं ब्रह्मदर्श
नमितिचेन्नायं दोषः जीवन्मुक्तिपर्यंतस्य तत्त्वज्ञानस्य तत्र विवक्षितत्वात् नखलु वयमपि जीवन्मु
क्तानां विद्यामदृष्टमभ्युपगच्छामः ननु विजिगीषोरात्मबोध एव नास्ति रागो हिंगमबोधस्य चिन्न
न्यायामभूमिषु कुतः प्राकृतलनात्स्वेव स्यात्त्रिः कोदरेतरो रित्याचार्यैरभ्युपगमाद्दितिचेन्न रागा
37 दयः संतु कामं न तद्भावोपराध्यतेउदृत्वान्तदृश्शीरगवद् विद्या किं करिष्यति तस्मात्तैरेव रागाद्यभ्यु
पगमात् नचात्रपरस्याप्याहृतिः स्थितप्रज्ञस्य ज्ञानमात्रेण वचनद्वयस्य व्यवस्थापनीयत्वात् ननु
ज्ञानिनो रागाद्यभ्युपगमे धर्माधर्मद्वारेण जन्मांतरप्रसंगइतिचेत् मैवं दग्धबीजवद् विद्या
पूर्वककारणमेव मुखरागादिवत्वेन पुनर्जन्महेतुत्वात् ज्ञानिनस्तु दग्धबीजवदाभासा एव राम
३१

येषां निमेषमात्रेणैवोज्जगतः प्रलयोदयौ तादृशाः पुरुषाः संति साक्षात् शंकरा नैव केति नन्वयं विवेकस्तत्व
ज्ञानोदयात्प्राचीनो नित्यानित्यवस्तुविवेको हि साधनव्यतिरेकेणात्र तत्त्वज्ञानासंभवात् इह तु उत्पन्नब्रह्म
साक्षात्कारस्य जीवन्मुक्तस्यैवास्मिन्नाह्वया हि साधनवत्त्वमुपक्रांतं अतः किमिदमकांडे तांडवमिति चेत्
नायं दोषः साधनचतुष्टयसंपन्नस्यापश्चादुत्पन्नज्ञानमिति सर्वपुरुषसाधारणः प्रोक्तो राजमार्गः ननु
कस्यचित्पुरुषस्य पुण्यपरिपाकेनाकस्मात् फलपातवदकस्मादेव गीताश्रवणमात्रेणैव तत्त्वज्ञानमुत्पन्नं
तत्र किं तत्त्वविश्रांतये विवेकोऽयं क्रियते इति कांडे एवेदमुचितं तांडवं ननु एवमप्यस्य विवेकस्य ज्ञानसम
नंतरभाविदेहमलिनवासनानुवृत्त्यभावात् मुमुक्षुवासनाया अभ्यासेनापेक्षितत्वादिति चेन्न जनकस्य
तदनुवृत्त्यभावेऽपि याज्ञवल्क्यभार्याद्यादेस्तदनुवृत्तिदर्शनात् अस्ति हि याज्ञवल्क्यस्य तत्र प्रतिवा
दिनामुमुक्षुत्वं कहोलादीनां च भयात् विद्यामदः तेषामपि विजिगीषुकथायां प्रवृत्तत्वात् ननु तेषामवि
द्यांतरमेवास्ति न तु ब्रह्मविद्येति चेन्न कथागतयोः प्रश्नोत्तरयोः ब्रह्मविषयत्वात् ननु ब्रह्मविषय
त्वेऽपि तेषामायातं ज्ञानमेव न तु सम्यग्वेदनमिति चेन्न तथा सत्यस्माकमपि तदीयवाक्योत्थस्य न्याया
विद्या वा असम्यक्त्वप्रसंगात् ननु सम्यक्त्वेऽपि परोक्षज्ञानमेवेति चेन्न यः साक्षादपरोक्षाद्ब्रह्मेति

गी·मु·
वे·ल·
३८

ट्टीनामस्येव मलिनवासनानुवृत्तिः भगीरथप्रयत्नेन विहितापि पराङ्मुखतालयन् मलिनवासनाभिभ्रि
न्नविश्रान्त्येभावेस्मति सर्वथापि मनाग्‌प्यश्री छिन्नातनाभिनितिवृत्तिष्टेनोपालभ्यते अतः स्वकीयं वर्तमानं मलिन
वासनादोषं प्रकीयदोषंच सम्यगनुसृत्य फलस्वीकारं समर्पयेत् अनेनैवाभिप्रायेण संधदे यथा मुनितु
णः सम्यकृत्य दोषेण शिरतः तथाञ्चे त्रिपुरा खेमुकोनमुच्यतेबंधनात् ननु आदोलावद्विद्यामरस्य
कः प्रतीकारं कृतिचेत् किं स्वनिष्टमुद्दस्य किं वास्य विषयस्य परनिष्टस्य आद्येऽमेनोवरूपंक्त विट्ठवि
ष्टातीति निरंतरं भावयेत् तद्यथा श्वेतकेतुर्विद्यायामतः प्रवाहपतितस्य रागः सम्भोगत्वातेन पंचाग्निवि
द्यायां प्रश्नोपि स्वयमज्ञानानालो निरुक्तरोरागाभावद्धामर्सितः पितुः समीपमागतस्य निर्वेदमुद्दाग्निहार
यितानुनिर्मदं स्वमेव राजानमनुसृत्यलं विद्यालेभे इत्यत्र वालाभिश्रानात पुत्रस्तुभागोराज्ञा भर्त्सितो हर्षो
मेमनस्य रागानमुपसमाद् उपसनक होलादयश्च मर्देनकथांकलापराजिताः यहा स्वविषयः परनिष्टस
दः प्रवत्तेन तद्दामनः सपरो मनिंदत्यवसन्नलोवा सर्वथापि तमस्मा निरतिभावयेत् अतएव वाक्: आत्मा
नं यदि निंद्रं तिस्वात्मानं स्वयमेव हि रोपदि निंदेति सहायास्तेजनामसमेति उक्तत्वादतश्चाहुः निंद्र
वमानावस्थितेन धरणां यस्य योगिनः धीविक्षेपः कथं तस्य बाधाद्यैः क्रियतामिहेति निष्कर्मसिद्धौ संस

38

राम
३८

रागाद्वय: एतद्देवाभिप्रेत्योक्तं उत्पद्यमाना रागाद्या विवेकज्ञानेन हिनाँतरालेदेवदत्ते कृतस्य संप्र
रोहणमिति नहिं स्थितप्रज्ञस्यापि तेसंति किंचेन्न तत्कालेमुख्यवदेवाभासमानानां बाधकत्वात् र
ज्जुसर्पोपिमुख्यसर्पवदेव तद्गाने भीषयन् उपलभ्यते तद्वत् ननु तर्हि अभ्यासत्वानुसंधानाननुष्ठ
नौनको पि बाधइतिचेत् चिरंजीवन्नु भवा नियमेवहि अस्मदभिमता जीवन्मुक्ति: याज्ञवल्क्यस्य वि
जिगीषुदृशायानतादृशा: चित्तविश्रांतये विद्वत्संन्याससंपत्तेनक रिष्यमाणत्वात् नचैवंतस्याऽपि
जिगीषा किन्तु धनतृष्णापि महती जाता बहुमोनत्वविद्वापुरत: स्थापितं सालंकारं गोसहस्रमपहृत्य स्व
यमेवेदमाह नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयं स्मेति तदातान् ब्रह्मविदो विज्ञानु मियं को वि
द्वेषो मंगीकृतिचेन्न अयमपि तत्त्वविद्भिरादोष: इतरेचब्रह्मविद: स्वकीयधनसमेनेनापहृतमिति मत्वा चुक्रु
धु: स्वयं च क्रोधपरवशा: शाकल्यं शापेन मारयामास नचास्य ब्रह्मघ्नो मोहाभाव: शंकनीय: कोपी
तविन: समामनंति नास्य केनापि कर्मणा लोको हीयते न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणा
हत्ययेति शौषोपि त्वकृतनायामापि पंचाग्निस्यामिदमाह हयमेधशतसहस्राण्यपि कुरुते ब्रह्मघा
तलक्षाणि परमार्थविन्नपुण्यैर्नच पापै: स्पृश्यते विमल इति तस्मात् किं बहुना ब्रह्मविदो याज्ञवल्क्या

जी॰मु॰ इहामुत्र हितोपायः सतां मनसि रोचयेः ॥ समुपायोऽत्र कथमिति तद्विषयेष्वेवमारितं नमेयपायः कि
वे॰ न॰ मकारते न तोऽमद्धमप्यसूयेत्पपिनैव चिंतयेत् नयत्कृतान्यन्यवबंध निह्न ति तत्तोपराधः परमानु
३६ चिंतता नमो ऽत्र केऽपरैवाय त्वाश्रय स्त्रालिने इञ्ज कोऽप्यसमर्थे रागपरदा यिने दोषबोधने इति ध
ना मिलाषाक्षोधव रोक्षिपुत्रामिलाषाव यि विवेकेन निवर्तनीयो तत्र योमिद्विवेको वशिष्ठेन द
र्शितः मांसपांचालिकायास्तु यंत्रलोलेंगपंजरे स्नाय्वस्थिग्रंथिशालिन्याः स्त्रियाः किमिव शोभनं दृ४
39 नं १ त्वङ्मांसरक्तबाष्पांबु पृथक्कृत्वा विलोचने समालोकय रम्यं चेत् किं मुधा परिमुह्यसि २ मेरु
शृंगतटोल्लासि गंगाजलरयोपमा दृष्टा यस्मिन् स्तने मुक्ताहारस्योल्लासशालिता ३ श्मशानेषु दि
गंतेषु स एव ललनास्तनः श्वभिरास्वाद्यते काले लघुपिंड इवांधसः ४ केशकज्जलधारिण्यो दुःस्प
र्शा लोचनप्रियाः दुःकृताग्निशिखा नार्यो दहंति तृणवन्नरान् ५ ज्वलतामतिदूरेपि सरसा अपि नी
रसाः स्त्रियो हि नरकाग्नीनामिंधनं चारु दारुणं ६ कामनाम्ना किरातेन विकीर्णा मुग्धचेतसां ना
र्यो नरविहंगानामंगबंधनवागुराः ७ जन्मपल्वलमत्स्यानां चित्तकर्दमचारिणां पुंसां दुर्वासनार

राम
३६

पारिकरे दोषश्चापश्यति यदि दोषं वदेत्तस्मै किं तेनाक्षरितुर्भवेत् ४ तद्वत्स्थूलेन यावत् दृष्टे देहे तत्तेजो विवेकतः
यदि दोषं वदेन्नान्यः किं तत्र विदुषो भवेत् शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्म
मृत्युश्च नात्मनः निरायामे भ्रमणेत्वेतानां कुशेषु प्रीति मन्निष्ठ्यायदि जनः परितोषमेति नन्वप्रयत्नजनि
तोयमनुग्रहो मे श्रेयोर्थिनो हि पुरुषाः परतुष्टिहेतोः दुःखार्जितान्यपि धनानि परित्यजन्ति सततं सुलभदैन्ये
निःसुखे जीवलोके यदि मम परिवादात् प्रीतिमाप्नोति कश्चित् परिवदतु यथेष्टं मत्समक्षं तिरो वा जगति हि ब
हुदुःखे दुर्लभः प्रीतियोग इति सहमानस्य भ्रमणेत्वं समर्थते तथा चरेत् वै योगी सतां धर्ममदूषयन् जना
यथावमन्येरन् गच्छेयुर्नैव संगतिमिति यान्तत्त्वं क्रोधस्य लोकानां योस्य विप्रा निष्ठो विद्यामदेन योर्थपा
विवेकेन प्रतीकारस्तथा धनाभिलाषक्रोधयोरव्यवसायितव्यः अर्थानामर्जने दुःखं रक्षणे चैव परिपालने नाशो
दुःखं व्यये दुःखं विधाः पान्ति क्लेशकारिणोऽर्थानिति धनविषमो विवेकः क्रोधो द्विविधः स्वनिष्ठः परविषयः
परनिष्ठः स्वविषयश्चेति तत्र स्वनिष्ठः परस्येवमुक्तं अपकारिणि कोपश्चेत् कोपे कोपः कथं न ते धर्मार्थ
काममोक्षाणां प्रसह्य परिपन्थिनि फलान्विता धर्मयशःप्रार्थनाशान्तः स्वचेतः पापः स्वशरीरतापनः नचे

गी·मु· प्रमाथीनि हरंति प्रसभं मनः १ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते तदस्य हरति प्रज्ञां वायुर्ना
वे·ग· वमिवांभसीति एवं हि उत्पन्नविवेकस्यार्थे इंद्रियाणि निरोद्धव्यानि तदर्पितचित्तेनैव ... कामभो
६० गप्रीतिं ना निसर्गारोहं यस्य युक्त्यासीत मत्परः वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता इति स्थितं
२पि नपाणिपादचपलो न नेत्रचपलो यतिः न च वाक्चपलः श्रोत्रमिति शिष्टस्य लक्षणं मिति एतेभ्यो
40 न्यत्र संग्रहविवरणं भो स्यचीकृतं ज्ञानिनः पंडकः पंगुरंधो बधिर एव च मुग्धश्च मुच्यते भिक्षुः षड्भि
रेतैः संशयः इष्टमिष्टं मिष्टं नेति यो भुञ्जन्न विषसज्जते हितं सत्यं मितं वक्ति तमजिह्वं प्रचक्षते १ अद्यजा
तां यथा नारीं तथा षोडशवार्षिकीं शतवर्षां च यो दृष्ट्वा निर्विकारः स षंडकः २ भिक्षार्थं गमनं यस्य
विण्मूत्रकरणाय च योजनान्न परं याति सर्वथा पंगुरेव सः ३ तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूर
गं चतुर्युगां भुवं त्यक्त्वा परिव्राट् सोऽन्ध उच्यते ४ हितं सत्यं मनोरमं वचः शोकावहं च यत् श्रुत्वा यो
न शृणोतीव बधिरः संप्रकीर्तितः ५ सान्निध्ये विषयाणां च समर्थो विकलेंद्रियः सुप्तवद्वर्तते

राम
६१

२

क्ष. नीरीवदृतिस्थापिंरुका ८ सर्वं कांदोषरलाना क. समुद्रिकयानया दुःखं बेह यानितसमलम लुमस
स्त्रिया ९ कृतोमांसमिनोरक्त मितो स्थानी तिवा सरैः ब्रह्मन्कतिपयैरेवं यातिलो विषयास्ता १०
यस्य ज्ञातस्य भोगेच्छा निः शेषकस्य क भोगः दः स्त्रियं स्य कारणगत्यक्षेत्रगस्य स्वा सु ली भवेत् ११
पुत्रविवेको ब्रह्मानंददर्शितः प्रकृस्य मान तानयः विरतो तैः पाये विरं लओ विगर्भ धानेन प्रसवेन
नवाधते १ जातस्य ग्रहं गा दिकुमारस्य चमूर्खता उपनीते प्यविद्यत्वमनुद्वाहस्वरूपं इति २ धूनस्य
परदारादिदारि द्रं च कुटुंबिनः पत्रोर्दुःखस्य न स्य तो धनी चेत्स्रियते तत्र हेति ३ यथा विद्या धनक्षे
य योषिन् पुत्र विषया तां मलिन वा सनानां विवेकेन प्रतीकारः तथा-न्य का मामविवा सना नाथ था
यो गं प्राह्ये: लघु स्वाच दोषं विचिन्त्य प्रतीकारं कुर्यात् कृतेच प्रतीकारे जीवन्मुक्ति लक्ष तां परसंप
दं लभते तथाहवसिष्ठः वासनातानव मित्यादौ यदायलेन करोद्भूतं तं तैरिधिपिलतां यांति सर्वाधि
साधयः इत्यादि वीरुथेरा प्रयत्नेन बला संसार वासनाः स्थितिवद्धा स्थिचित्त हि पदमासाद्य
स्यलमिति नन्वत्र वीरुथः प्रयत्नो नाम पूर्वोक्तो विषयदोषविवेकः सच पुनः पुनः क्रियमाणो विप्र
वलेंद्रियस्याचारे तां मिन्भयते तद्युक्तं भगवता यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः इंद्रियाणि सू ५

ज्ञी॰मु॰
वे॰न॰
८१
४२

निश्चयात्तत्स्वरूपे स्वचैतन्यमात्रं चिन्तयेत् एतच्च वलिशुक्रयोः प्रश्नोत्तराभ्यां विस्पष्टमवगम्यते किं।
दिहास्तीह किंमात्रमिदं किंमयमेव च कस्त्वं कोहं क एते वा लोका इति वदाशु मे चिदिहास्तीह चिन्मा
त्रमिदं चिन्मयमेव च चित्त्वं चिदहमेते च लोकाश्चिदिति संग्रह इति २ यथा सुवर्णकामः कटकं वि
क्रीणन् विवलयाकारस्य गुणादौ यावुपेक्ष्य गुरुत्ववर्णयोरेव मनः प्रणिधत्ते तथा चिन्मा
त्रे मनः प्रणिधातव्यं यावता कालेन जडं सर्वथैवोपेक्ष्य चिन्मात्रे मनसः प्रवृत्तिर्निश्वासादिवत्स्वा
भाविकी संपद्यते तावत्कालं चिन्मात्रवासनां प्रयतेत् ननु वादावेव चिन्मात्रवासनास्तु तयैवम
लिनवासनानिवृत्तिः किमनेनान्तर्गडुना मे प्राणायामेनेति चेत् न चिद्वासनायाः प्रतिष्ठितत्वप्रसं
गात् यथा कुट्टिमदार्ढ्यमन्तरेणैव क्रियमाणमपि स्तम्भकुड्यात्मकं गृहं न प्रतितिष्ठति यथा वा वि
रेचनेन प्रबलदोषमनिःसार्य सेवनमपि औषधं नारोग्यकरं तद्वत् ननु तामप्यपरित्यजेदिति
चिन्मात्रवासनायाः प्रतिपरित्याज्यत्वमवगम्यते तदयुक्तं चिन्मात्रेऽपि रागाद्यात्मकस्य चिद्
वादियस्याभावात् नायं दोषः द्विधा चिन्मात्रवासना मनोवृत्तिसमन्विता तद्रहिता चेति कस्तं
मनःकर्तृत्वोपाधिर्द्वितीया च समस्तप्रशमेनाहमेकाग्रेण मनसा चिन्मात्रं भावयिष्यामीति एतादृशो

राम
८१

सिद्धं मिद्धार्थं मुग्ध: समुच्यते ६ न निंदां न स्तुतिं कुर्यान्न किंचिन्मर्मणि स्पृशेत् नातिवादी भवेत्तद्व
त्सर्वत्रैव समो भवेत् ७ न संभाषेत स्त्रियं कांचित्पूर्वदृष्टां च न स्मरेत् कथां च वर्जयेत्तासां न पश्ये
ल्लिखितामपि ८ यथाकश्चित् व्रतीनक्तैकभुक्तोपवासैर्मौनादिव्रतसंकल्पमात्रधारी मंत्रसम
कं तास्समवक्तु पालयति तथैवानिहं त्वाद्विशेषतः सावधानो विवेकं पालयेत् तदेवं विवे
के द्रियन्निरोधामांदीनां यैकाल्ये निरंतरं सर्वेस्मात् सेविताभ्यामेत्ताद्विवासना सुप्रतिष्ठिता वा
सुरासेपद्रूपासा हिमवासना: क्षीयते ततो निष्प्रासो च्छ भवेत् निमेषो न्मेषवर्जं पुरुषप्रयत्न
म: तोलोप्रवर्तमानानि: श्वासादिवासनामि: लौकिकव्यवहार कोपितदीयमाकं लयं करुणानुस
धानं चित्रेयपरित्यागः निस्तुलतत्त्वमनोरागपानिष्क्रिया: समस्तिचेष्टा: प्रयत्नेन शांता: कृत्वा चिन्मा
त्रवासनामभ्यसेत् स्वतस्तावद्दृहेंद्रियाणिस्तत्तोमयात्मकं भासते यद्यपि स्थूलसूक्ष्मादिजडवस्तु
भासनार्थं देहद्रियाणि हस्तादि पदार्थं चितोनिमत्तं स्वयं भूरितिश्रुते: तथापि चैतन्यस्योपाधावतया
भासनायै वेंद्रियाणि स्वानि पराञ्चिखानि व्यतृणत् स्वयंभूरितिश्रुते: तथापि चैतन्यस्योपाधावतया व
जितुमशक्यत्वाच्चैतन्यपूर्वकमेव जडं जगद्भासते तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभा
तीतिश्रुते: तथा प्रतिपक्षाद्रुष्टा समानस्यजडस्य प्रथमतो भासमाने चैतन्यमेव वास्तवंस्वरूपमिति

जी·मु· जाग्रति येन चेतसा कलाच्छिन्नो विधुरिवायं सदा बुधैर्निरीक्ष्यते मुक्त इ... तीह संमत इति हृदयात्संपरित्यज्य
वे·न· सर्वमेव महामते यस्तिष्ठति गतव्यग्रः स मुक्तः परमेश्वरः समाधिमथ कर्माणि मा करोतु करोतु वा
४२ हृदयेनास्तसर्वास्थो मुक्त एवोत्तमाशयः नैष्कर्म्येण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः न समाधानजप्याभ्यां
यस्य निर्वासनं मनः विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं
मन५ इति च न च निर्वासनस्य जीवनहेतुर्व्यवहारो लुप्येतेति शंकनीयं किं चक्षुरादिव्यवहारस्य लोपः
42 किं वा मानसव्यवहारस्य लोपः तत्राद्यमुद्दालको निराचष्टे वासनाहीनमप्येतच्चक्षुरादीन्द्रियं स्व
तः प्रवर्तते बहिः स्वार्थे वासना नात्र कारणमिति द्वितीयं वसिष्ठो निराचष्टे अयत्नोपनतेष्वक्षि दृग्
द्रव्येषु यथा पुनः नीरागमेव पतति तद्वत्कार्येषु धीरधीरिति तादृश्या धिया सारथ्योपभोगः स एवोपपा
दयति परिज्ञायोपभुक्तो हि भोगो भवति तुष्टये विज्ञाय सेवितश्चोरो मैत्रीमेति न चोरतां अशंकितापि
संप्राप्ता ग्रामयात्रा यथाध्वगैः प्रेक्ष्यते तद्वदेव ज्ञैर्भोगश्रीरवलोक्यत इति भोगकालेऽपि स्ववासनेभ्यो ति

राम
४२

नकर्तृकरणानुसंधानेन समन्विता प्राथमिकी या चिन्मात्रवासना ध्यानशब्दाभिधेया तां परित्यजेन्नु याव
भ्यासपाटवेन कर्तृकरणाद्यनुसंधानव्यवधानरहिता समाधिशब्दाभिधेया तामुपाददीत् ध्यानसमाध्योर्ल
क्षणं पतंजलिः सूत्रयामास तत्र प्रत्ययैकतानता ध्यानं तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधि
रिति तादृशे समाधौ दीर्घकालनैरंतर्यसत्कारैः सेविते स्थैर्ये लब्धे पश्चात् कर्तृकरणानुसंधानपरि
त्यागार्थो यः प्रयत्नस्तमपि परित्यजेत् नन्वेवं सति तत्त्यागप्रयत्नोपि परित्याज्यः स्यादनवस्था स्यात् मैवं
कतकरजोन्यायेन स्वपरनिवर्तकत्वात् यथा कलुषितजले प्रक्षिप्तं कतकरजः इतररजसा सह स्वात्मानम
पि निवर्तयति तथा त्यागार्थप्रयत्नः कर्तृकरणानुसंधाने निवर्तयन् स्वात्मानमपि निवर्तयिष्यति नि
वर्तेतस्मिन्मलिनवासनावत् शुद्धवासनानामपि क्षीणत्वान्निर्वासनं मनोवतिष्ठते एतदेवाभिप्रेत्य
वसिष्ठः प्राह तस्मात् वासनया बद्धं मुक्तं निर्वासनं मनः राम निर्वासनीभावमाहराशु विवेकतः सम्य
गालोचनात्सत्याद्वासना प्रविलीयते वासनाविलये चेतः शममायाति दीपवत् यो जागर्ति सुषुप्तिस्थो
यस्य जाग्रन्न विद्यते यस्य निर्वासनो बोधः स जीवन्मुक्त उच्यते इति सुषुप्तवत्प्रशमितभाववृत्तिना स्थितं सदा

ज्ञा·मु· नष्टेमनसि निग्रहसिद्धत्वादीनामर्थसिद्धत्वेनाभ्यासप्रयासाभावात् ननु मनोनाशाभ्यासप्रयासस्तत्राप्यस्तीति चे
वै·त· त् अस्तु नाम तस्यावश्यकत्वाद्यतस्तेन मनोनाशाभ्यासस्तावदपि निग्रहसिद्धत्वाद्यत्न स्थिरा भवंति अत एव मनसो
४३ नाशनीयत्वं जनक आह सहस्रांकुरशाखात्मफलपल्लवशालिनः अस्य संसारवृक्षस्य मनो मूलमिति स्थि
तिः संकल्पमेव तन्मन्ये संकल्पोपशमेन तत् शोषयामि यथा शोषमेति संसारपादपः प्रबुद्धोस्मि प्रबु
द्धोस्मि दुष्टश्चोरो मयात्मनः मनोनाम निहन्म्येनं मनसास्मि चिरं हतः इति वसिष्ठोपि आह अस्य संसारवृ
क्षस्य सर्वोपद्रवदायिनः उपाय एक एवास्ति मनसः स्वस्य निग्रहः मनसोभ्युदयो नाशो मनोनाशो महोद नो॰
यः ज्ञमनोनाशमभ्येति मनोज्ञस्य हि शृंखला तावन्निशीथवेताला वल्गंति हृदि वासना एकतत्वदृ
ढाभ्यासाद्यावन्न विजितं मनः प्रक्षीणचित्तदर्पस्य निगृहीतेंद्रियद्विषः पद्मिन्य इव हेमंते क्षीयंते भोग
वासना हस्तं हस्तेन संपीड्य दंतैर्दंतान्विचूर्ण्य च अंगान्यंगैः समाक्रम्य जयेदादौ स्वकं मनः एतावति ध
रणीतलेसु भगाः स्ते साधुचेतसाः पुरुषाः पुरुषकथासु च गण्या न जिता ये चेतसा स्वेन हृदयविलेश
५१ यकुंडलितउल्बणकलनाविषमो मनोभुजंगः उपशांतिमागतस्तु हितं तमस्य पूर्णचंद्र इति चिंतनाभिः कि

राम ४३

र्वासनानां विनाशमाह नायदि ग्ला निमाया त्तिहेमपर्यंपप्रानिष्ठि नेहस्ते प्रकृतादन्यद्रमते धीसवर्त्ती
नि नित्यमापूर्णतामंतरहुश्रामिंदुसुंदरी अपथ्यपिनमुंचंति प्राज्ञाः प्राज्ञाः शीततामिव अधिवहतमर्या
दा भवंति वितताशयाः निपतंति विमुंचंति महंतो भास्करादिवेति जनकस्यापि समाधेरुत्थितस्य
दृश्यमेवाचरंतं पठंति तूष्णीमथ चिरं स्थित्वा जनको जननीवते मुहूर्तं चिंतयामास चित्तेन प्रशमशा
लिना किमुपादेयमस्तीह यत्नात्संसाधयामि किं स्वतः स्थितस्य विशुद्धस्य चितः कामि लोकस्य न
नाभिवांछाम्यसंप्राप्तं न संप्राप्तं त्यजाम्यहं स्वस्थ आत्मनि तिष्ठामि यन्ममास्ति तदस्तु मे इति संचिंत्य
जनको यथाप्राप्तक्रियामसौ असक्तः कर्तुमुत्तस्थौ दिनं दिनपतिर्यथा भविष्यं नानुसंधत्ते नातीतं चिंतय
त्यसौ वर्तमाननिमेषं तु सहसैवानुवर्तत इति तदेवं यथोक्तेन वासनाक्षयेन यथोक्ता जीवन्मुक्तिर्भवि
ष्यतीति सुस्थितं इति जीवन्मुक्तिविवेके वासनाक्षयनिरूपणो द्वितीयप्रकरणं २ अथ जीवन्मुक्तिसाध
नं मनोनाशं निरूपयामः यद्यप्यशेषवासनाक्षये सत्यर्थात् मनोनाश एव तथापि सत्यांतरेण मनोना
शो सम्यगभ्यस्तो सति वासनाक्षयो द्रढो भवति नचाजितेन्द्रियत्वप्रकृत्याद्यभ्यासेनैव लब्धा इत्यसिद्धमिति वाच्यं

जी.मु. मनिग्रह एवात्र योगः क्रमनिग्रहे चाध्यात्मविद्याप्राप्त्यादय उपायाः सा च विद्या दृश्यस्य मिथ्यात्वं दृग्वस्तुनः स्व
वि.त. प्रकाशकत्वं च बोधयति तथा सत्येतन्मनः स्वगोचरे दृश्ये प्रयोजनाभावं प्रयोजनवति दृग्वस्तुन्यगोचर
३४ त्वं च बुध्वा निरिंधनाग्निवत्स्वयमेवोपशाम्यति तथा च श्रूयते यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति त
था वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति योनिरात्मायस्तु बोधितमपीहतत्वं सम्यक्नबुध्यते यश्च विस्मरति
तयोरुभयोः साधुसंगम एवोपायः साधवो हि पुनः पुनः बोधयंति स्मारयंति च यस्तु विद्यामदादिदुर्वा
सनया पीड्यमानो न साधूननुवर्तितुमुत्सहते तस्य पूर्वोक्तविवेकेन वासनापरित्याग उपायः वासनाना
44 मतिप्राबल्येन तत्कर्तुमशक्यत्वे प्राणस्पंदनिरोधनमुपायः प्राणस्पंदवासनयोश्चित्तप्रेरकत्वात् तयोर्निरो
धे चित्तं शांतिरूपपद्यते प्रेरकत्वं च वसिष्ठ आह द्वे बीजे चित्तवृक्षस्य वृत्तिव्रततिधारिणः एकं प्राणपरि
स्पंदो द्वितीयं दृढभावना सती सर्वगतासंवित्प्राणस्पंदेन बोध्यति संवेदनादनंतानि तेदुःखानि चित्तसः
यथा भस्मछन्नमग्निं लोहकारा दृतिभ्यां धमंति तत्र च दृतिस्थयन्त्रवायुना सोग्निर्ज्वलति तथा चित्तोपादानेन
काष्ठस्थानीयेन ज्ञानेनावृत्तासंवित्प्राणस्पंदेन बोध्यमाना चित्तवृत्तिरूपेणाप्रज्वलति तस्माच्चित्तवृत्ति

राम
३४

लास्येदं मयि चक्रस्य सर्वतः स्थीयते चेत्तदा कस्य तन्न किं चित्सबाधत इति गौडपादाचार्यैरप्युक्तं मनसो निग्रहा
यत्तमभयं सर्वयोगिनां दुःखक्षयः प्रबोधश्चाप्यक्षया शांतिरेव च यत्त्वर्जुनेनोक्तं चंचलं हि मनः कृष्ण प्र
माथि बलवद्दृढं तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरमिति एतद्वचनं हठयोगविषयं अतएव वसिष्ठ
आह उपविश्योपविश्यैकचित्तकेन मुहुर्मुहुः न शक्यते मनो जेतुं विना युक्तिमनिंदितां अंकुशेन विना मत्तो
यथा दुष्टमतंगजः विजेतुं शक्यते नैव बलात्पायुक्त्या विना मनः मनो विलयहेतूनां युक्तीनां सम्यगीरितां वसि
ष्ठेन कृतं तावत्तन्निष्प्रयोगयो मनः हठतो युक्तितश्चापि द्विविधो निग्रहो मनः निग्रहो धीविक्रियात्तो हठ
गोलकनिग्रहात् कदाचिज्जायते क्वचिन्मनस्तेन विलीयते अध्यात्मविद्याधिगमः साधुसंगम एव च वासनासं
परित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्तयः पुष्टाः संति चित्तजये किल सतीषु युक्तिष्वेतासु हठान्नियमयं
ति ये चेतसो दीपमुत्सृज्य विनिघ्नंति तमोंजनैः विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयं ते निबध्नंति नागेंद्रमु
न्मत्तं बिसतंतुभिः निग्रहो द्विविधः हठनिग्रहः क्रमनिग्रहश्चेति तत्रेंद्रिः श्रोत्रादिज्ञानेंद्रियाणि वाक्
पाण्यादिकर्मेंद्रियाणि च तत्तद्गोलकोपरोधमात्रेण हठान्निगृह्यंते तद्दृष्टांतेन मनोऽपि तथा निगृहीष्यामी
ति मूढस्य भ्रांतिर्भवति ननु तथा निगृहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अतः क

श्री·सू· प्राणिनबंधबाः प्राक्कुर्वन्ति परित्यक्तुं युक्तो न च समानवमिति आसनाख्यानयोगांगेनेति यदुक्तं तत्रासनस्य ल
वै·त· क्षणमुपायं फलं च त्रिभिः सूत्रैः पतञ्जलिः सूत्रयामास स्थिरसुखमासनं प्रयत्नशैथिल्यानन्तसमाप
४५ मि·२ त्तिभ्यां ततो द्वन्द्वानभिघात इति पद्मकस्वस्तिकादिनायाद्युपेन देहस्थापनरूपेण यस्य पुरुषस्यावयव
व्यथानुत्पत्तिलक्षणं सुखं देहचलनराहित्यलक्षणं स्थैर्यं च संपद्यते तस्य तदेव मुख्यमासनं तस्य च
प्रयत्नशैथिल्यं लौकिकउपाय अलौकिकश्च गमनगृहकृत्यतीर्थयात्रास्नानयागहोमादिविषयो
यः प्रयत्नो मानसउत्साहः तस्य शैथिल्यं कर्तव्यं अन्यथा सउत्साहो बलाद्देहमुत्थाप्य यत्र क्वापि प्रेरयति
फणासहस्रेण धरणीं धारयितास्थैर्येणावस्थितोयमनन्तः सएवाहमस्मीति ध्याने चित्तस्यानन्तसमा
पत्तिः तया यथोक्तासनसंपादकमदृष्टं निष्पद्यते सिद्धे चासने शीतोष्णसुखदुःखमानापमानादिद्वन्द्वैर्य
था पूर्ववन्नाभिहन्यते तथाविधस्य चासनस्य योग्योदेशः श्रूयते विविक्तदेशे च सुखासनस्थः शुचि
समग्रीवशिराः शरीर इति समे शुचौ च शर्करवह्निकवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनो
नुकूले न तु चक्षुपीडके गुहानिवाताश्रयेण प्रयोजयेदिति सोयमासनयोगः अथ प्राणयोगस्तुमिता

राम
४५

नामका संवेदनात् दुःखोनुत्पद्यंते सेयंप्राणस्पंदेनप्रेरिताचित्तोत्पत्तिः अन्यांचसएवाह भावसंवित्त
कटितामनुभूतांचराघव चित्तस्योत्पत्तिमपरांवासनाजनितांशृणु दृढाभ्यस्तपदार्थैकभावनादतिचं
चलं चित्तंसंजायते जन्मजरामरणकारणमिति नकेवलंप्राणवासनयोश्चित्तप्रेरकत्वं किंतुपरस्परप्रे १
रकत्वमस्ति तदाह वशिष्ठः वासनावशतःप्राणस्पंदस्तेनचवासना जायतेचित्तवृक्षस्यतेनवीजांकु
रक्रमइति अतएवान्यतरनाशेनोभयनाशमप्याह द्वेवीजे चित्तवृक्षस्यप्राणस्पंदनवासने एकस्मिंश्च
योःक्षीणेक्षिप्रंद्वेअपिनश्यतइति नमोनीत्रोपायं नाशफलंचाह प्राणायामदृढाभ्यासैर्युक्त्याचगु
रुदत्तया आसनाशनयोगेन प्राणस्पंदोनिरुध्यते असंगव्यवहारित्वात् भवभावनवर्जनात् श
रीरनाशदर्शित्वाद्वासनानप्रवर्त्तते वासनासंपरित्यागात्चित्तंगच्छत्यचित्तताम् प्राणस्पंदनिरोधाच्च यथे
च्छसितथाकुरु एतावन्मात्रकंमन्येरूपंचित्तस्यराघव यद्भावनंवस्तुनोंतर्वस्तुत्वेनरसेनच यदानभा
५२ व्यतेकिंचिद्धेयोपादेयरूपयत् स्थीयतेसकलंत्यक्त्वातदाचित्तंनजायते अवासनत्वात्सततंयदानमनते
मनः अमनस्तातदोदेतिपरमोपशमप्रदेति अमनस्त्वानुदयेशांतभावमाह चित्तयदहदृढाक्रांतेनमि

जी·मु· प्राणस्पंदश्च प्रयत्नः कर्तव्यो धीमतोऽखिलैरिति मनोवाक्चक्षुरादीन्द्रियदेवताः स्वस्व आधारे निरंतरं करिष्याम
वे·त· इति व्रतं धृत्वा श्रमरूपेण मृत्युना ग्रस्ताः स च मृत्युः प्राणं नाश्नोति ततो निरंतरं मुख्यः स निश्वासोच्छ्वासौ कुर्वन्नप्य
४६ यं प्राणो न श्राम्यति तदृष्ट्वा विचार्य देवताः प्राणरूपं प्राविशन् सोऽयमर्थो वाजसनेयिभिराम्नायते अयं वै नः
श्रेष्ठो यः संचरंश्चासंचरंश्च न व्यथते अथो न रिष्यति हन्तास्यैव सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवंस्तस्मा
देत एतेनाख्यायते प्राणा इति अतएवेन्द्रियाणां प्राणरूपत्वं नाम प्राणाधीनचेष्टावत्वं तथान्तर्यामिब्राह्म
णे सूत्रात्मप्रस्तावे श्रूयते वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वा
46 णि च भूतानि संदृब्धानि भवंति तस्माद्वै गौतम पुरुषं प्रेतमाहुः व्यस्रंसिषतास्याङ्गानीति वायुना हि गौतम
सूत्रेण संदृब्धानि भवंतीति अतः प्राणमनःस्पंदनयोः सहभावित्वात् प्राणनिग्रहे मनो निगृह्यते
ननु सह स्पंदनं न युक्तः सुषुप्तौ चेष्टमानेऽपि प्राणे मनसोऽचेष्टमानत्वात् न विलीनत्वेन तदानीं मनस
एवाभावात् ननु तर्हि प्राणमनसोः सहक्रिययोः स्वसीतेति माहतं न हि द्वितायाः प्राणस्पंदस्य मनःस्पंदस्य च संबंधि
त्वरूपाम: नापि सुसतो जीवतः पुरुषस्य प्राणान्वयोऽस्तीति मैवं अनुल्लंघ्यास्पंदनयनेनात्र विवक्षितत्वात्
यथा स्वनन्तरोच्छ्वासना हि सुप्तस्य म्रियमाणस्य पर्वतमारोहतः शीघ्रं धावतो वा श्वासवेगोऽयावान् भवति राम
४६

ताहारत्वं अत्याहारमनाहारं नित्यं योगी विवर्जयेदिति श्रुतेः भगवताप्युक्तं नात्यश्नतस्तु योगोऽस्ति नचै
कांतमनश्नतः नचातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्त
स्वप्नावबोधस्य योगो भवति दुःखहेति जितासनस्य प्राणायामेन मनोनाशः श्वेताश्वतरैराम्नायते त्रि
रुन्नतं स्थाप्य समं शरीरं हृदींद्रियाणि मनसा संनिवेश्य ब्रह्मोडुपेन प्रतरेत विद्वान्स्रोतांसि सर्वाणि भया
वहानि प्राणान्प्रपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोः श्वसीत दुष्टाश्वयुक्तमिव वाहमेनं विद्वा
न् मनो धारयेताप्रमत्त इति योगो द्विविधः विद्यामदाद्यासुरीसंपद्रहितस्तत्सहितश्चेति तयोराद्य
ऊँ५ स्य ब्रह्मध्यानेन मनसि निरुद्धे सति तन्नांतरीयकतया प्राणो निरुध्यते तं प्रति त्रिरुन्नतमिति मंत्रः पठतः
द्वितीयस्याभ्यासेन प्राणो निरुद्धे सति तन्नांतरीयकतया मनो निरुध्यते तं प्रति प्राणान्प्रपीड्येति मंत्रः प्र
कृतः प्राणापीडनप्रकारो वक्ष्यते तेन च पीडनेन युक्तचेष्टो भवति मनश्चापि विद्यामदादयो निरुध्यंते प्रा
णनिरोधेन चित्तदोषनिरोधे दृष्टांतोऽप्यत्र श्रूयते यथा पर्वतधातूनां दह्यंते धमतां मलाः तथेंद्रियकृ
ता दोषा दह्यंते प्राणनिग्रहात् अत्रोपपत्तिर्वसिष्ठेन दर्शिता यः प्राणपवनस्पंदश्चित्तस्पंदः स एव हि

ह्री·प्र· तत्सत्काकुंभकावस्थायां योगिभिर्योनुभूयते बहिरस्तंगते प्राणो यावन्नायात्यनुद्गतः तावत्तु तत्समावस्थां
वे·त· बहिःस्थं कुंभकं विदुरिति तत्रोक्तासप्रांतरकुंभकविरोधीनिःश्वासोबाह्यकुंभकविरोधीगात्रचा
४७ लनमुभयविरोधीत स्मिन्सतिनिःश्वासोच्छ्वासयोरन्यतरस्याप्यभावित्वात् यतस्तर्हिरपि श्वा
सनानंतरभाविनं प्राणायामसूत्रयामास तस्मिन्सति निःश्वासोच्छ्वासयोर्गतिविच्छेदः प्राणा
47 यामइति ननु कुंभके गत्यभावेपि रेचकपूरकयोरुच्छ्वासनिःश्वासगतीत्वेयेनेइति चेन्न अधिक
मात्राभ्यासेन स्वभावसिद्धायाः सम्प्रागागतेर्विछेदात् तमेवाभ्यासं सूत्रयति बाह्याभ्यंतरस्तंभवृत्ति
देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मइति रेचको बाह्यवृत्तिः पूरको अभ्यंतरवृत्तिः कुंभकस्तंभवृत्तिः
तत्रैकैको देशादिभिः परीक्षणीयः तद्यथा स्वभावसिद्धे रेचके हृदयान्निर्गत्यनासाग्रसन्मुखे द्वाद
शांगुलिपर्यंते श्वासः समाप्यते अभ्यासेन तु क्रमेणनाभेराधाराद्वायुर्निर्गछति चतुर्विंशत्यंगुलि
पर्यंते षट्त्रिंशदंगुलिपर्यंते वासमाप्तेः अत्र रेचके प्रयत्नातिशयेसत्तिनाभ्यादिप्रदेशज्ञो भेरणो
न निश्चेतुं शक्यो बहिस्तु सूक्ष्मंतूलं धृत्वा तच्चालनेन निश्चेतव्यं सेयं देशपरीक्षा रेचककालेप्र राम
४७

[illegible] नतावान् स्थितस्यासीनस्य वा श्वासो विद्यते तथा प्राणायामपादयोपे
तस्येतरस्माद्दल्पश्वासो भवति एतदेवाभिप्रेत्य श्रूयते मत्वा तत्रायतप्राणः शनैरेव समुच्छ्वसेदिति प
था दूरेण भेद्रूपेणोरचोमांसस्थायत्रक्षापिनीयते सन्नसारथिनाहू हमश्वरंतु वाजा ध्रास्तु समांगपुलि
धार्यते तथैव हि वैदासनादिभिश्च नस्यानीयमानं मनः प्राणस्त्रैर्हृदि भत्तार्यधार्यते प्राणेन सर्वोदु
येनियच्छत् तत्र प्राणापीडने प्रकारोऽन्यत्र श्रूयते सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह त्रिः पठेदाय
तप्राणः प्राणायामः स उच्यते प्राणायामास्त्रयः प्रोक्ता रेचकपूरककुंभकाः उत्क्षिप्य वायुमाकाशं शू
न्यं कृत्वा निरात्मकं शून्यभावेन युंजीयाद्रेचकस्येति लक्षणं वक्त्रेणोत्पलनालेन तोयमाकर्षयेन्नरः
एवं वायुर्ग्रहीतव्यः पूरकस्येति लक्षणं नोच्छ्वसेन्नच निश्वासेन्नैव गात्राणि चालयेत् एवं ता
वन्नियुंजीत कुंभकस्येति लक्षणमिति अत्र शरीरांतर्गतं वायुं बहिर्निःसार्य उत्क्षिप्य शरीरमाका
शं शून्यं निरात्मकं वायुरहितं कृत्वा स्वल्पमपि वायुमप्रवेश्य शून्यभावेनैव नियमयेत् तादृशं रेचकं भ
वति कुंभको द्विविधः अंतरो बाह्यश्च तदुभयं वशिष्ठः प्राह अपाने संगते प्राणे पावक्राम्युदितो हृदि

गी॰सु॰ देशबंधश्चित्तस्य धारणेति स्मरणात् । अत्र लिंगं मनः संकल्पकं ध्यात्वा संहृत्यात्मनि बुद्धिमन्

वे॰त॰ धारयित्वा तथात्मानं धारणा परिकीर्तिता प्राणायामेन योगस्याङ्गानि यानि च तानि योगस्य

५८ काश्चित्कालमात्मदेशनिवारितं मनस्तस्यां धारणायां योग्यं भवति प्राणायामस्य दृढाभ्यासे युक्तस्य च

गुरूक्तदृढयत्नेन मुक्तिप्रदेन योगिनां प्रसिद्धं शिरोपरि मेरुमालनं नि हृदग्राग्रे दृढैकाग्रमतीनां

मित्रकहृदये ज्योतिर्ध्यानं विरमति प्रत्येय धीसेवाचेत्येवमादिकं गृह्यते तदेवमध्यात्मविद्यासा

48 धकेनाभ्यासेनाहृत्य प्राणनिरोधाश्चित्तनाशोपायाः दर्शिताः अथ तदुपायभूतं समाधिं दर्शया

मः पंचभूम्युपेतस्य चित्तस्य भूमित्रयपरित्यागेनावशिष्टभूमिद्वये समाधिः भूमयश्च योगभाष्यकृता द

र्शिताः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः इति अत्रासुरसंपल्लोककशास्त्रदेहवासना

नुवर्तमानं चित्तं क्षिप्तं निद्रातन्द्र्यादिग्रस्तं मूढं कदाचित्कध्यानयुक्तं क्षिप्ताद्विशिष्टतया विक्षिप्तं तत्र क्षि

प्तमूढयोः समाधित्वशंकैव नास्ति विक्षिप्ते तु चेतसि विक्षेपोपसर्जनीभूतः समाधिर्योगपक्षे न व

र्तते विक्षेपान्तर्गततया दहनान्तर्गतबीजवत्स एव विनश्यति यस्त्वेकाग्रे चेतसि सद्भूतमर्थं

णेव स्याभ्यन्तरस्योदशविंशतित्रिंशदादिस्यादिकालपरीक्षा अस्मिन्मासे प्रतिदिनं दशरेचकाः अस्मि
न्मासे विंशतिरुत्तरमासे त्रिंशदित्यादिकालपरीक्षाभिः संख्यापरीक्षाय योक्तदेशकालविशि
ष्टाः प्राणायामा एकस्मिन्नु दिने दशविंशतित्रिंशदित्यादिभिः संख्यापरीक्षा पूरकेप्येवं यो
जनीयं यद्यपि कुंभके देशदिशानावगम्यते तथापि कालसंख्याभ्यामवगम्यत एव यथा घनी
भूतस्तूलपिंडः प्रसार्यमाणो विरलतया सूक्ष्मो भवति तथा प्राणोपि देशकालसंख्याधि
केनाभ्यस्यमानो दीर्घो दुर्लक्ष्यतया सूक्ष्मश्च संभवति रेचकादिभ्यस्त्रिभ्योन्यस्तत्प्रकारं सूत्रयति बा
ह्याभ्यंतरपूर्वसूत्रयापेक्षोपि चतुर्थ इति यथाशक्ति सर्ववायुविरेचनानंतरं क्रियमाणो बाह्यः कुंभको
यथाशक्ति वायुमापूर्यानंतरं क्रियमाणोंतः कुंभक इति रेचकपूरकाभावेनाद्यस्तु केवलकुंभकोभ्यस्य
मानः पूर्वसूत्रयापेक्षया चतुर्थो भवति निद्रालस्यादिप्रबलदोषप्रयुक्तानां रेचकादित्रयं दोषरहिता
नां चतुर्थ इति विवेकः प्राणायामफलं सूत्रयति ततः क्षीयते प्रकाशावरणमिति प्रकाशस्य स
त्वस्य आवरणं तमो निद्रालस्यादिहेतुस्तस्य क्षयो भवति न्यं समतिफलांतरं सूत्रयति धारणासु च
योग्यता मनस इति आधारनाभिचक्रहृदयपद्मभ्रूमध्यब्रह्मरंध्रादिदेशविशेषे चित्तस्थापनं धारणा

ऽसर्वज्ञानयोग्यत्वानि च भवंतीति संतोषादनुत्तमः सुखलाभः कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः स्वाध्याया ५

जी. मु. नियमयोरनुष्ठानवैलक्षण्यं स्मर्यते यमान् सततं सेवेत न नित्यं नियमान् बुधः यमान् पतत्यकुर्वा-
वे. न. णो नियमान् केवलान् भजन् पतति नियमवान् यमेष्वसक्तो न तु यमवान् नियमालसोऽवसीदति इति ३२
यमनियमयोः समीचीनत्वबुद्ध्या यमवत्कुलेऽप्यनुसंदधीत बुद्धिमिति यमनियमफलानि सूचयति अहिंसाप्रति-
५६ ष्ठायां तत्संनिधौ वैरत्यागः क्रियाफलाश्रयत्वं सर्वरत्नोपस्थानं वीर्यलाभः जन्मकथंतासंबोधः
शौचात् स्वांगजुगुप्सा परैरसंसर्गः सत्वशुद्धिसौमनस्यैकाग्र्येंद्रियजयात्मदर्शनयोग्यत्वानि च इष्टदेवतासंप्रयोगः समाधि-
49 सिद्धिरीश्वरप्रणिधानादिति आसनप्राणायामौ आख्यातौ प्रत्याहारं सूत्रयति स्वस्वविषयासंप्रयो-
गे चित्तस्वरूपानुकार इवेंद्रियाणां प्रत्याहार इति शब्दस्पर्शरूपरसगंधादिविषयेभ्यो निर्वृत्ताः श्रो- ४६
त्रादयश्चित्तस्वरूपमनुकुर्वंतीवावतिष्ठंते श्रुतिश्च भवति शब्दादिविषयान् पंचमनश्चैवातिचंचलं चि-
तं द्वात्मनो रश्मीन् प्रत्याहारः स उच्यते इति शब्दादिविषया येषां श्रोत्रादीनां ते श्रोत्रादयः एवं मनः स्वस्था-
प्येषामनात्मरूपेभ्यः शब्दादिभ्यो निवर्तमाना नामात्मरूपे चित्ते चित्तनं प्रत्याहार सूत्रार्थः प्रत्याहार-
फलं सूचयति ततः परमावश्यतेंद्रियाणामिति धारणाध्यानसमाधीन् सूत्रैस्त्रिभिः सूत्रयति देश-
बंधश्चित्तस्य धारणा तत्र प्रत्ययैकतानता ध्यानं तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समा-

रम
५८

प्र२

प्रद्योतयति क्षिणोति च क्लेशान् कर्मबंधनानि श्लथयति निरोधमभिमुखीकरोति संप्रज्ञातो
योगाङ्गत्वायोच्यते सर्ववृत्तिनिरोधे त्वसंप्रज्ञातसमाधिः तत्र संप्रज्ञातसमाधिभूमिमेकाग्रतां सू
त्रयति शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणाम इति शान्तोऽतीत उदितो वर्तमानः प्रत्य
यश्चित्तवृत्तिः अतीतः प्रत्ययो यं पदार्थं गृह्णाति तमेव चेदुदितोपि गृह्णीयात् तदा तावुभौ तुल्यौ
भवतः तादृशश्चित्तस्य परिणाम एकाग्रतेत्युच्यते एकाग्रताभिवृद्धिलक्षणं समाधिं सूत्र
यति सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणाम इति रजोगुणेन चाल्यमाने
चित्ते क्रमेण सर्वानर्थान् गृह्णाति तस्य रजोगुणस्य निरोधाय क्रियमाणेन योगिनः प्रयत्नविशेषेण
दिने दिने सर्वार्थता क्षीयते एकाग्रता चोदेति तादृशश्चित्तस्य परिणामः समाधिरित्युच्यते त
स्य समाधेरङ्गेषु यमनियमासनप्राणायामप्रत्याहाराः पंचबहिरंगाणि तत्र यमान् सूत्रयति अ
हिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः इति हिंसादिभ्यो निषिद्धकर्मभ्यो योगिनः यमयंतीति नि
वर्तयंतीति यमाः नियमान् सूत्रयति शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः इ
ति जन्महेतोः काम्यधर्मात् निवर्त्य मोक्षहेतौ निष्कामधर्मे नियमयंति प्रेरयंतीति नियमाः यम

जी॰मु॰ अध्यापको निरवधानस्तद्द्रक्ष्यकुर्वन्नपि न स्खलति तथा विषयेष्वेवापि परिपाकतारतम्येन ध्यानसमाधि संप्रज्ञातानां
वे॰ न॰ सर्वांतरभेदो बोद्धव्यः ध्यानधारणासमाधित्रयं मनोविषयत्वात् संप्रज्ञातसमाधेरंतरंगं यमाद्यं पंचकं तु बहि
रंगं तदेतत्सूत्रयति त्रयमंतरंगं पूर्वेभ्य इति ततः केनापि पुण्येनांतरंगे प्रथमं लब्धेऽपि न तु बहिरंगलाभाय नाति
५० प्रयासः कर्तव्यः यद्यपि पतंजलिना भौतिकभूततन्मात्रेन्द्रियाहंकारादिविषयाः संप्रज्ञातनिर्विकल्पसमा
धयो बहुधा प्रपंचितास्तथापि तेषामंतर्भूतानां सिद्धिहेतुतया मुक्तिहेतुसमाधिविरोधित्वात् नास्माभि
स्तत्रादरः क्रियते तथा च सूत्रितं ते समाधावुपसर्गा व्युत्थाने सिद्धय इति स्थान्युपनिमंत्रणे संगस्मयाकरणं पु
50 नरनिष्टप्रसंगादिति स्थानिनो देवाः उद्दालको देवैरामंत्रितोऽप्यवज्ञाय देवान्निर्विकल्पसमाधिमेवच
कारेत्युपाख्यायते प्रश्नोत्तराभ्यामप्येवमेवावगम्यते श्रीरामः जीवन्मुक्तशरीराणां कथमात्मविदांवर श
क्तयो नेह दृश्यंते आकाशगमनादिकाः वसिष्ठः अनात्मविदमुक्तोऽपि सिद्धिजालानि वांछति द्रव्यमंत्रक्रि
याकालयुक्त्याप्नोत्येव राघव नात्मज्ञस्यैष विषयः आत्मज्ञो ह्यात्ममात्रदृक् आत्मनात्मनि संतृप्तो नाविद्यामनु
धावति ये केचन जगद्भावास्तानविद्यामयान्विदुः कथं तेषु किलात्मज्ञस्त्यक्ताविद्यो निमज्जति द्रव्यमंत्रक्रि
याकालशक्तयः साधुसिद्धिदाः परमात्मपदप्राप्तौ नोपकुर्वंति काश्चन सर्वेच्छाजालसंशांतावात्मलाभो

राम
५०

धीरिति आधारादिँशः पूर्वमुक्तादेशांतरं श्रूयते मनःसंकल्पकं ध्यात्वा संक्षिप्यात्मनि बुद्धिमान् धारयित्वा
तथात्मानं धारणा परिकीर्तितेति यत्सर्ववस्तु संकल्पकं मनस्तदात्मानमेव संकल्पयतु नत्वन्यदिति एवंविधः
प्रयत्न आत्मनि संक्षेपः प्रत्ययस्यैकतानतात्वेकविषयप्रवाहः सचद्विविधः विच्छिद्याविच्छिद्य जायमानः
संततश्चेति तावुभौ क्रमेण ध्यानसमाधी भवतः तदुभयं सर्वानुभवयोगिना सूचितं चित्तैकाग्र्यतो ज्ञानमुक्तं
समुपजायते न तत्साधनमतो ध्यानं यथावदुपदिश्यते विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् परिशिष्टं
च सन्मात्रं चिदानंदं विचिंतयेदिति ब्रह्माकारमनोवृत्तिप्रवाहोहंकृतिं विना संप्रज्ञातसमाधिः स्यात् ध्याना
भ्यासप्रकर्षज इति तं च भगवत्पादा उदाजह्रुः उपदेशसहस्र्यां दृश्यप्रकरणे दृशिस्वरूपं गगनोपमं परं सकृद्वि
भातं त्वजमेकमक्षरं अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तः ओं दृशिस्तु शुद्धोहमविक्रियात्मको न
मेस्ति कश्चिद्विषयः स्वभावतः पुरस्तिरश्चोर्ध्वमधश्च सर्वतः संपूर्णभूमा त्वज आत्मनि स्थितः अजोमरश्चैव
तथाजरोमृतः स्वयंप्रभः सर्वगतोहमद्वयः नकारणं कार्यमतीव निर्मलः सदैव तृप्तश्च ततो विमुक्त ओं इति ७३
ननु संप्रज्ञातसमाधिर्योगस्य कथं ध्यानानंतरभाविनोष्टांगस्य समाधेः स्थाने उदाह्रियते नायं दोषः असंतभेदा
भावात् यथा वेदमधीयानो माणवकः पदे पदे स्खलन्पुनः पुनः समादधाति अधीतवेदस्सावधानोनस्खलति

जी·सु·
वे·न·
५१

लीने सोपप्लवन हृदयांबरे तमः छन्नं विवेकार्के लोलकजुलमेचकं तमप्युत्सादयामासमस्यकृत्तानविरक्त
ता तमस्युपरते स्वांते तेजः पुंजे रदर्शासः तत्र तुलाव स्थेला ज्ञानां वनं वालइव द्विपः तेजस्युपरते तस्य घूर्णमाने
मनोमुने निश्वासवदगानिद्रांतामप्याश्रुतुलावसः निद्रामुपगमितस्य व्योमसंवित्समुद्ययो व्योमसंवित्तिनष्टायो
मृष्ठेतस्याभवन्मनः मोहमप्येषमनसस्तममार्ग महाशयः ततस्तेजः तमो निद्रामोहादिपरिवर्जितो कामप्यवस्थामा
साद्य विश्राममनः क्षणामिति ते एते व्युत्थानसंस्कारा निरोधिहेतुना योगिप्रयत्नेन प्रतिदिनं चाभिभूयंते तद्विरोधि
नश्च निरोधिसंस्काराः प्रादुर्भवंति तथा सति निरोधरूपैकैकक्षिनक्षणो चित्तमनुगच्छति सोयमीदृशश्चित्तस्य निरोधप
52
रिणामो भवति ननु प्रतिक्षणपरिणामिनो हि भावाः ऋते चितिशक्तेरिति न्यायेन चित्तस्य सर्वदा परिणामेप्रवाहो विच्छिद्य
ति चेन्न वाढं तत्र व्युत्थितस्य चित्तस्य वृत्तिप्रवाहः स्फुट एव निरुद्धचित्तस्य तु कथमित्याशंक्योत्तरं सूत्रयति ततः प्रशांत
वाहितासंस्कारादिति यथा समिदाज्याहुतिप्रक्षेपेण वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये प्रथमक्षणे किंचि
च्छाम्यति उत्तरोत्तरक्षणेषु निर्वृत्ते तथा निरुद्धचित्तस्योत्तरोत्तरो धिकः प्रशमो प्रवहति तत्र पूर्वप्रशमजनितः संस्का
र एवोत्तरोत्तरप्रशमस्य कारणं तामेतां प्रशांतवाहितां भगवान् विस्पष्टमुदाजहार यदा विनियतं चित्तमात्मन्येवावतिष्ठ
ते निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा यथा दीपो निवातस्थो नेंगते सोपमा स्मृता योगिनो यतचित्तस्य युंजतो योग

राम
५१

दयो हिय: सकथं सिद्धिं वांछाद्यांसम चित्तेनलभ्यतेइति नकेचनजगद्भावास्तत्त्वंतरं जैस्तमी नागरंनागरीकांतंकु
ग्रामललिनाइवेति अपिपीतरुचावकेसिसुनीहतो योरुमंरले अथध: प्रसरत्यभ्रोजीवन्मुक्तोनविश्रा
यी चिदात्मनइमाइस्थंप्रस्फुरंतीह शक्तय: इत्यस्याश्चर्यजालेपुनामुदेतिकुतुहलमिति च अनात्म
विषयस्तसंप्रज्ञातसमाधिर्वासनाक्षयस्य निरोधसमाधेश्चहेतुत्वस्योत्पादर:कृत: अथपंचमभूमि
रूपो निरोधसमाधिर्निरूप्यते तंच निरोधं स्वरूपति व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ
निरोधक्षणचित्तान्वयो निरोधपरिणामइति व्युत्थानसंस्कारा: समाधिविरोधिनस्तेचोद्दालकस्यसमाधावु
दाहृता: कदाहंमुक्तमननेपदेपरमपावने चिरं विश्रांतिमेष्यामिमेरुशृंगइवांबुद: इति चिंतापरच
शोवलादुद्दालकोद्विज: पुन:पुनस्तपविष्टध्यानाभ्यासंचकारह विषयैर्नीयमानेनुचित्तेमर्कटचं
चले नसलेभेसमाधानेप्रतिष्ठांप्रीतिदायिनी कदाचिन्नात्मसंस्पर्शपरित्यागाइनंतरं नत्यागाद्
चित्तकपिरंतरस्पर्शसंचयान् कदाचिदंतरस्पर्शाद्बाह्यं विषयमादृतस्योडायमनोयातिकदाचित्त्र
स्तपक्षिवत् कदाचिदुदितार्कांभंतेज:पश्यतिविस्तृते कदाचित्केवलं व्योमकदाचिन्निविडंतम: आग
कृतोयथाकामंप्रतिभासान्पुन:पुन: अच्छिद्दन्मनसाश्रूर: खंडेनेवरसोरिपून् विरक्तस्योधेसमा

गी·सु· तथाच स्मर्यते संकल्पमूलः कामो वै यज्ञाः संकल्पसंभवाः । काम जानामि ते मूलं संकल्पात् किल जायसे न त्वां संक-
वे·त· ल्पयिष्यामि समूलस्त्वं विनंक्ष्यसीति तत्र विवेकेन विषयदोषेषु साक्षात्कृतेषु सुनावांतपायसवत् कामास्त्यज्यंते
५२ स्रक्चंदनवनितादिविषयेष्विव ब्रह्मलोकादिष्वणिमाद्यैश्वर्येषु च कामास्त्याज्या इत्यभिप्रेत्य सर्वानित्युक्तं मायो-
पवासव्रतिनाप्यसिन्नासेऽप्यस्पृष्टेऽपि कामः पुनः पुनरुदेतीति तद्व्यासार्थमशेषत इत्युक्तं कामत्यागे मनःपूर्वक
प्रवृत्त्यभावेऽपि च चक्षुरादीनां रूपादिग्रहणस्वभावसिद्धाया प्रवृत्तेः सा विषयचलयुक्तेन मनसैव नियंतव्या हेव
52 तादृशेनादिसमनुसरणोपाराणाय समंतत इत्युक्तं भूमिकाजयक्रमेणोपरमेद्विवृद्धित्वात् शनैः शनैरित्युक्तं ताश्च
वं६ भूमिकाः स्मृताः कठवल्लीषु श्रूयंते नचिकेतं प्रति यम यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेज्ज्ञान आत्मनि ज्ञानमात्मनि
महति नियच्छेत्तद्यच्छेच्छांत आत्मनीति वाक्व्यापारोऽपि द्विविधः लौकिको वैदिकश्च तत्र लौकिकस्य बहुविक्षेपक-
त्वात् व्युत्थानकालेऽपि योगी तं परित्यजेत् अत एव स्मर्यते मौनं योगासनं योगस्तितिक्षैकांतशीलता निःस्पृहत्वं
समत्वं च सप्तैतान्येकदंडिनडुति वैदिकं जपादिकं निरोधसमाधौ परित्यजेत् सेयं वाग्भूमिः प्रथमा तां भूमिं प्रय-
त्नमात्रेणोक्तियैर्दिनैर्वा मासैर्वा वत्सरैर्वा दृढं विजित्य पश्चात् द्वितीयायां मनोभूमौ प्रयतेत् अस्यथावहुभूमिकाप्रया-
सात् प्रथमभूमिकापातेनैवोपरितनयोगभ्रमयः सर्वा विनश्येयुः यद्यपि च चक्षुरादयो निरोद्धव्यास्तथापि तेषां वाग्भूमौ

मात्मनः यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति सुखमात्यंतिकं यत्तद् बुद्धिग्रा
ह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्वतः यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन्स्थितो न दुःखेन
गुरुणापि विचाल्यते तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं स निश्चयेन योक्तव्यो योगो निर्विण्णचेतसेति निरोध
समाधेः साधनं सूत्रयति विरामप्रत्ययाभ्यासपूर्वकः संस्कारशेषोन्य इति विरामो वृत्त्युपरमः तस्य प्रत्ययः कार
णं वृत्त्युपरमार्थः पुरुषप्रयत्नः तस्याभ्यासः पौनःपुण्येन संपादनं तत्पूर्वकस्तज्जन्यः अनंतरातीतसूत्रे संप्रज्ञातसमा
धेरुक्तत्वात् तदपेक्षोयमन्योऽसंप्रज्ञातसमाधिः तत्र वृत्तिरहितचित्तस्य दुर्लक्ष्यत्वात् संस्कारस्येयाचित्तं शिष्यते
विरामप्रत्ययजन्यत्वे भगवान् विस्पष्टमुदाजहार संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः मनसैवेंद्रियग्रामं
विनियम्य समंततः शनैःशनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् यतो य
तो निश्चरति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेदिति काम्यमानाः स्रक्चंदनवनितापु
त्रमित्रगृहक्षेत्रादयोमी दृष्टाः कुशलाविवेकिजनप्रसिद्धेः बहुभिर्दोषैरुपेताः अनाद्यविद्यावातान्दोषाना
च्छाद्य तेषु विषयेषु सम्यक्संकल्पयति तस्माच्च संकल्पाद् [illegible] हि इदं मे स्यादित्येवंरूपाः कामाः प्रभवंति

गी॰सु॰ वक्ष्यमाणलक्षणो तद्विनाशप्रयोजनयोऽन्तर्मंतरं त्वं विविविनश्चिस्कृतिः इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं
वे॰ त॰ मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न
५३ परं किंचित्सा काष्ठा सा परा गतिः एवं सत्यपि नानाविधसंकल्पविकल्पसाधनकारणरूपं मनो हंक
नीति नियच्छेन्मनो प्राणानां रिपोऽपाहंकारमात्रं परित्यज्यैतत् न चैतदशक्यमिति वाच्यं तस्माद्धि नि
ग्रहं मन्ये वायोरिव सुदुष्करमिति वदन्तमर्जुनं प्रति भगवद्वचनाभिधानात् असंशयं महाबाहो
मनो दुर्निग्रहं चलं अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते असंयतात्मना योगो दुष्प्राप इति मे
53 मतिः वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः इति अभ्यासवैराग्ययत्नेन हि सद्गुरोरुपदेशेनैव
आत्म्यासिते पूर्वपूर्वभूमिदार्ढ्यरहितोऽसंयतात्मा तत्सहितो वश्यात्मा च उपायतः प्राप्नोति
उपायाद्याचार्याः एवं शांतमाहुः उत्सेक उदधेर्यद्वत् कुशाग्रेणैकबिंदुना मनसो निग्रहस्तद्वद्भवेदप
रिखेदतः इति अत्र संप्रदायविद आख्यायिकामाचक्षते कस्यचित्किल पक्षिणोऽण्डानि तीरस्था
न्युदधिः स्वेच्छयापजहार ततः समुद्रं शोषयामीति प्रवृत्तः स्वमुखाग्रेणैकैकं जलबिन्दु राम
५३

मनोऽस्माभिर्बाह्यो दृश्यः ननु बाह्यं मनः कथं नियच्छेत् इत्यनुपपन्नं नहीन्द्रियस्येन्द्रियान्तरे प्रवेशोऽस्ति
मेवं प्रवेशस्याविवेचितत्वात् नानाविशेषकारेण वीक्षणसमर्थयोर्मध्ये प्रथमतो बाह्यव्यापारनि
यमनेन मनोव्यापारमात्रपरिशेष इह विवक्षितः लोके हि बाह्यादीनामिन्द्रियाणां निश्चयमेव तावत् विवे
केन पश्चात् ततो ज्ञानात्मनि मनो नियच्छेत् आत्मा त्रिविधः ज्ञानात्मा महानात्मा शान्तात्मा चेति ज्ञानात्मन्यत्र
स्थित आत्मेति तिलात् स्वोपाधिरहंकारो ज्ञानशब्देन विवक्षितः करणस्य मनसो नियम्यत्वेन त
दनुपातत्वात् अहंकारो द्विविधः विशेषरूपः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं
व्यक्तमभिमन्यमानो विशेषरूपः अस्मीत्येतावन्मात्रमभिमन्यमानः सामान्यरूपः स च स
र्वव्यक्तिषु व्याप्तत्वान्महानित्युच्यते तस्माद् द्विरूपादहंकारादुपाधेरुपहितो द्विविधात्मनो निरूपा
ना३ धिकः शान्तात्मा तेन सर्वमेतद्धि भावेन वर्तते शान्तात्मा सर्वान्तरश्चिदेकरसः तस्मिन्ना
श्रितं तु शक्तिरूपमव्यक्तं मूलप्रकृतिः सा च प्रथमं सामान्याहंकाररूपं महत्तत्त्वं नाम घ
त्वाव्यक्तं भवति ततो विशेषाहंकाररूपेण ततो बहिर्मनोरूपेण ततोऽपि बहिर्वागादीन्द्रि

ज्ञा॰मु॰ द्विनाना योगमुहूर्त्ताननुगणयेत् ततः परे द्व्यब्दाव रपक्षे वापर मासे वा योगमुहूर्त्तान्वर्द्धयेत् तथा चैकैकस्मि
वै॰त॰ न्मुहूर्त्ते एकैकक्षणे योगोपि संवत्सरमात्रेण भूयान् योगकालो भवति नचैवं योगेकृपर कृत्वे अपारांतराणि
लुंठयन् लुंठनरक्षणत्व अपारस्यैव योगोधिकारात् अत एव विभूतिसंभ्यासोपेक्ष्यते तस्मात्तदेकनिष्ठः पु
५४ मान् ध्येयत्वरितगति इव क्रमेण योगारूढो भवति यथा ध्येता भारावहः पादांगुष्ठपादमर्द्धमस्तचमस्ककूर्मयंव
र्गं चक्रमेणोपरठन्नदप्राद्वादप्राग्वर्षे व्यापको भवति यथा च नारोप्यंकुर्वन्नेक निष्कद्वि निष्कादिक्रमेणाल
क्ष्यतिः कोटिपतिर्भवति तथाता भावविरोधेल भ्यांसहैवोपक्रम्य मत्सरग्रस्त इव भुंजानस्तावत्ताका
54 लेन कुलीन योगमारोहेत् तस्मात्पुनः पुनः आप्यमानान् संकल्पविकल्पानुद्दालकवद्योरुस्थप्रयत्नेन परि
त्यज्याहंकारं परिरक्षात्मनि मनो नियच्छेत् तामेतां द्वितीयां भूमिकां वितिसबालमूकादिवन्निर्मनस्कतावस्था विके
सतितततो विशेषाहंकाररूपं विस्पष्टं ज्ञानात्मानं अप्रस्पष्टे सामान्याहंकारे महतत्त्वे नियच्छेत् यथाखल्वांतद्रा
माप्लवतो विशेषाहंकारः स्वत एव संकुचिति विनैवतं द्रांतथा विस्मरणे प्रयत्नमानस्याहंकारसंकोचो भवति से
यं लोकप्रसिद्धयातद्रुयाता किंचिमिमत निर्विकल्पकज्ञानेन च समानामहत्त्वमात्रपरिशेषावस्थात्तृतीया भू
मिः अस्यां चाभ्यासपाटवेन वशीकृतायां तमेतं सामान्याहंकाररूपं महांतमात्मानं निरुपाधिकतया शांते चिदेकर राम ५४

दुर्वहिः प्रक्षिप्तलितव्यावहृतिः पहिल्लिनिर्विघ्नं योगीवर्यो मा लो व्यनुपरतः प्रत्युत्तलान पिसहकारिलो
चक्रेतो श्वपत्तनोत्पतनात्पांव हृ धाक्लिं पुंपतः सर्वानवलो कवलपाल्लुनीरक्षोग रूढं समीपेप्रेषया
मास ततो गरूढं पहृचातेन भुग्न समुद्रो मीनत्ला नेत्रा मानीयपक्षिरो प्रददौ एवम विदेनम
नो निरोधेयात्मधर्मप्रवर्तमानयोगिनमीश्वरोनुगृह्णाति एवं विदश्रमधैलदनुकूल मा पारमि
श्रलोन संपद्यते यथोदनं भुंजान स्तत्र ग्रासानंतरे चोष्य लेह्यादीनां स्वाद्यत्वेन दूर इदमेवा
भिप्रेत्यव शिष्यः प्राह चित्तस्य भोगेष्टौ भागो शुष्क तृतीयांकं प्रपूरयेत् गुरुशुश्रूषया भागमथुल
न्नस्य संक्रमः किंचित् भुक्त्वा तियुक्तस्य भागं भोगेन पूरयेत् गुरुशुश्रूषया भोगे भागं प्राणाय्यार्थचिंतया
भुक्त्वा निमनुयात स्य पूरयेद्वेतस्वोन्वहं द्वौ भागौ प्राणवैरागेष्टौ ध्यानगुरुपूजयेति भोगश्चेनात्र जीवनहे
तुर्भिक्षा दि व्यापारो वर्णाश्रमो चितव्यापारश्चोच्यते घटिकामात्रं मुहूर्तमात्रं वायया ग्रक्रियामभ्यस्यतेतो
मुहूर्तं प्राणायाम तोनव क्षिचर्यावा गुरूनुपगम्य मुहूर्तं स्वदेह मनुस्मृत्य मुहूर्तं योगशास्त्रं पर्यालोच्य
पुनर्मुहूर्तं योगमभ्यसेत् एवं योगस्याधीनेन व्यापारांतरात्कालं यं स्तानिद्रा गमस्य शयनकालेनतत्

म१

श्री॰मु॰ कारतया तिरस्कृतानात्मेद्धृश्यं विदधीतेति यथा घट उत्पद्यमानः सात्मश्रोत्रस्वतो वियत्पूर्ण एवोत्पद्यते जलतंडुला
वे॰त॰ दिपूर्णत्वं तु तन्निक्षेपश्चात्पुरुषप्रयत्नेन भवति यथा तत्र जलादौ निःसारितेपि न वियन्निःसारयितुं शक्यते मुख
५५ पिधानेप्यंतर्वियदवतिष्ठत एव तथा चित्तमुत्पद्यमानं आत्मचैतन्यपूर्णमेवोत्पद्यते उत्पन्नेपि चित्ते पश्चान्मृषा
निमित्तकुलालवत् घटपटरूपरससुखदुःखादिरूपत्वं भोगहेतुधर्मादिवशाद्भवति तत्र रूपरसाद्यना
त्माकारे निवारितेपि निर्निमित्तः चिदात्माकारोन निवारयितुं शक्यते ततो निरोधसमाधिनाऽवृत्तिकेन
संस्कारमात्रशेषतयासूक्ष्मत्वेन चिदात्ममात्राभिमुखत्वादेकाग्रतां चित्तेन निर्विघ्नमात्मानुभूयते अनेनैवाभि
55 प्रायेणावार्तिककारः सर्वानुभवयोगिनावाहतुः सुखदुःखादिरूपत्वं धियो धर्मादिहेतुतः निर्हेतुत्वात्मसंवो
धरूपत्वं वस्तुवृत्तितः प्रशांतवृत्तिकं चित्तं परमानंददीपकं असंप्रज्ञातनामायं समाधिर्योगिनां प्रिय इति आ
त्मदर्शनस्य स्वतःसिद्धत्वेपि अनात्माकारत्यागाय निरोधाभ्यासः अत एवोक्तं आत्मसंस्थं मनः कृत्वा न किंचिदपि
चिंतयेदिति योगशास्त्रस्य चित्तचिकित्सकसमाधिमात्रे प्रवृत्तत्वात्तया निरोधसमाधावात्मदर्शनं साक्षादुक्तं
मंतरेणात्वमुपगम्यते योगश्चित्तवृत्तिनिरोध इति सूत्रयित्वा तदा द्रष्टुः स्वरूपेणावस्थानमिति सूत्रयणात्

राम॰
५५

सत्वभावे नियच्छेत् महत्तत्वं तस्य चिन्मात्रं परिशोधयेत् अत्रापि पूर्वोक्तविरक्तिप्रयत्न एव तत्तो व्याप्तिधैर्येनोपा
यतामायद्यते यथा शास्त्राभ्यासप्रवृत्तस्य मुमुक्षोरापि प्रतिग्रंथमभ्यासेनापि ज्ञायमानमपि सुसंपन्नस्य तत एवोत्तरग्रं
थार्थः प्रतिभाति तथासंप्रज्ञवशीकृतपूर्वभूमेर्योगिनः उत्तरभूम्युपायः स्वत एव प्रतिभाति तदाह योगभाष्यकारः
योगेन योगो ज्ञातव्यो योगो योगात्प्रवर्त्तते योऽप्रमत्तस्तु योगेन स योगी रमते चिरमिति ननु महत्तत्वशांतात्मनोर्मध्ये
महत्तत्वोपादानमव्यक्तं व्यक्ततत्वं शांतात्मशब्देनोदाहृतं तत्र कुतो नियमनं नाभिधीयत इति चेत् तत्र विलयप्रसंगादिति ब्रू
३६ मः यथा घटो पादाने जले निरुध्यमानो न विलीयते उपादानभूतायां तु मृद्विलीयते तथा महत्तत्वं नात्मनि लीयते अ
व्यक्ते तु लीयते न च स्वरूपलयः पुरुषार्थः आत्मदर्शनानुपयोगित्वात् दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभि
रिति पूर्ववाक्ये मिधाय सूक्ष्मत्वसिद्धये निरोधस्याभिधानात् लयस्य प्रतिदिनं सुषुप्तौ स्वतः सिद्धत्वेन प्रयत्नवैयर्थ्या
च्च ननु धारणाध्यानसमाधिभिः साध्यस्य संप्रज्ञातस्यैकाग्र्यस्य निरूपत्वेन दर्शनहेतुत्वेऽपि शांतात्मन्यवरुद्धस्यासं
प्रज्ञातसमाधिमापन्नस्य चित्तस्य वृत्तिरहितत्वेन सुषुप्तिवन्न दर्शनहेतुत्वमिति चेन्न स्वतः सिद्धस्य दर्शनस्य नि
वारयितुमशक्यत्वात् अत एव श्रुतिमार्गेऽभिहितं आत्मानात्माकारं स्वभावतोऽवस्थितं सदा चित्तं आत्मैका

त्व१

जी॰मु॰ कारित्वयावहिरंगत्वमवरुद्धं तदेवोपकारित्वं विशदयितुं सूत्रयति श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापू
वे॰वृ॰ र्वक इतरेषामिति केषांचिद्देवादीनां पूर्वसूत्रेणानन्तरेव समाधिमुक्त्वा मनुष्याणां प्रत्येतदुच्यते समाधे
५६ योगस्यैव परमपुरुषार्थसाधनमिति प्रत्ययः श्रद्धा सा चोत्कर्षे श्रवणेनैवोपजायते तदुत्कर्षश्च स्मर्यते
तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुनेति उत्त
मलोकसाधनत्वात् कृच्छ्रचान्द्रायणादितपसोऽन्योऽतिशयोमादिकर्मिणश्च योगोऽधिको ज्ञानं प्रत्यन्तरंगत्वा
56 च्चित्तविश्रान्तिहेतुतया ज्ञानाद्प्यधिकत्वमिदं जानतो योगे श्रद्धा जायते तस्यां च श्रद्धायां वसितायां वीर्यमुत्सा
हो भवति सर्वथा योगं संपादयिष्यामीति एतादृशेनोत्साहेन तदा तदनुष्ठेयानि योगाङ्गानि स्मर्यन्ते तथा
च स्मृत्या सम्यगुपतिष्ठतः समाधेरध्यात्मप्रसादे सति ऋतंभरा प्रज्ञेति तत्प्रज्ञापूर्वकस्तत्प्रज्ञाकारणा
कोऽसंप्रज्ञातसमाधिरितरेषां देवादिभ्यो वैदीनानां मनुष्याणां सिद्ध्यतीति तां च प्रज्ञां सूत्रयति ऋतंभरा
तत्र प्रज्ञेति ऋतं सत्यं वस्तुयाथात्म्यं बिभर्ति प्रकाशयतीति ऋतंभरा तत्र तस्मिन्समाध्युत्कर्षजन्येऽध्यात्म
प्रसादे सतीत्यर्थः ऋतंभरत्वोपपत्तिं सूत्रयति श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति सूक्ष्म

र॰म॰
५६

यद्यपि निर्विकारो द्रष्टा सदा स्वरूप एवावतिष्ठते तथापि वृत्तिषूत्पद्यमानासु तत्र चित्स्वच्छायायां प्रतिबिंबितायां तद
विवेकादस्वच्छ इव द्रष्टा भवति एतदप्यनंतरसूत्रेणोक्तं वृत्तिसारूप्यमितरत्रेति अन्यत्रापि सूत्रितं चित्तपुरुषयो
रत्यंतासंकीर्णयोः प्रत्ययोरविशेषो भोगः परार्थत्वादिति चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेद
नमिति च निरोधसमाधिना शुद्धीभूते त्वंपदार्थे साक्षात्कृतेपि तस्य ब्रह्मत्वं गोचरयितुं महावाक्येन ब्रह्मविद्यानामकं
वृत्त्यंतरमुत्पाद्यते नच शुद्धत्वंपदार्थसाक्षात्कारे निरोधसमाधिरेक एवोपायः किंतु चित्तद्रष्टृविवेकेनापि पृथक्कृ
तेत साक्षात्कारसंभवः अत एव वसिष्ठेनोक्तं द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव योगस्तद्वृत्तिनिरोधो हि ज्ञानं
सम्यगवेक्षणमिति असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमेश्वर इति
ननु विवेकोपि योगे पर्यवस्यति दर्शनवेलायामात्ममात्रगोचराया एकाग्रवृत्तेः ह्याधिकसंप्रज्ञातरूपत्वात् बाढं
तथापि सति संप्रज्ञातासंप्रज्ञातयोः स्वरूपतः साधनतश्चास्त्येव महद्वैलक्षण्यं वृत्त्यवृत्तिरूपः स्फुरः स्वरूपभेदः सा
धनतश्चास्त्येव महद्वैलक्षण्यं साधनं तु संप्रज्ञातस्य सजातीयत्वाद्धारणादित्रयमंतरंगं असंप्रज्ञातस्य अवृत्तिरू
पविजातीयत्वाद्बहिरंगं तथा च सूत्रं तदपि बहिरंगं निर्बीजस्येति विजातीयत्वेपि बहुधानात्मवृत्तिवारणेनोप

जी·मु· विपर्यासोऽस्मिन्ध्यानानंतरस्मिन् विद्याधारोस्ति तुरीयंपदमद्वैतैव [illegible] स्वस्मुत्तेनुभवतीत्यर्थः
वे·त· न [illegible]न्वस्त्वेवमसंप्रज्ञातसमाधिसुषुप्त्योर्महान्भेदः तत्रतत्त्वदिदृक्षोर्दर्शनसाधनत्वेनसमाध्यपेक्षायाम
५७ पिदृष्टतत्त्वस्यजीवन्मुक्तयेनालिनद्ध्येद्वारागद्वैषादिक्लेशबंधस्यसुषुप्तावपिनिवृत्तेरितिचेत् मैवं किंप्र
तिदिनंस्वतःप्राप्तकादाचित्कीसुषुप्तिर्बंधनिवर्तिका किंवाभ्यासेननिरंतरवर्तिनी आद्येपिकिंसुषुप्त
कालीनस्यक्लेशबंधस्यनिवृत्तिः किंवाकालांतरवर्तिनः नाद्यः अप्रसक्तेः नहिसुप्तानामपिसुषुप्तौक्लेशबं
57 धः अन्यथायासःप्रसज्येत् नद्वितीयःअसंभवात् नह्यन्यकालीनयासुषुप्त्याकालांतरवर्तिनःक्लेशस्य
क्षयःसंभवति अन्यथासुप्तानामपिजागरणस्वप्नयोःक्लेशस्यक्षयःप्रसज्येत् नापिसुषुप्तैर्निरंतर्यमभ्यसितुं
शक्यं तस्याःकर्मक्षयनिमित्तत्वात् तस्मात्तत्त्वविदोपिक्लेशस्यक्षयायास्त्वेवासंप्रज्ञातसमाध्यपेक्षा तस्यच
समाधेर्योगादिभिर्विवादः निरोधःप्रथमाभूमिः बालमूकादिवन्निर्मनस्त्वंद्वितीयाभूमिः तेनापिवाहंका
राहित्यंतृतीयासुषुप्तावेवमहत्तत्त्वराहित्यंचतुर्थी तदेतद्भूमिचतुष्टयमभिप्रेत्यशनैःशनैरुपरमेदित्युक्तं
अत्रचोपरमेच्छतिरहीनावृत्तिः सासाधनं महदहंकारमनोवागादीनांस्वतएव तीव्रवेगेनबहिःप्रवहतां
मूलेकर्षणेनप्रत्याहृत्यनिरोधेधैर्यमहदपेक्षितं बुद्धिविवेकःपूर्वाभूमिर्जितानवेतिपरीक्ष्यजितायामुत्तरभूमुपक्रमः

व्यवहितविप्रकृष्टवस्तुष्वयोगिप्रत्यक्षेण प्रवर्त्तते आगमानुमानाभ्यां तानि वस्तून्ययोगिभिर्निर्णीयन्ते नेच श्रा ह्यागमानुमान
जन्यप्रत्ययेन वस्तुसामान्यमेव गोचरयतः इदं तु योगिप्रत्यक्षं विशेषवस्तुगोचरत्वादुत्तमं भवत्वे तस्य च योगिप्रत्यक्षस्य
संप्रज्ञातसमाधेर्बहिरंगत्वमसि अर्थमुपकारित्वं सूत्रयति तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धीति असंप्रज्ञा २३
ग४ तसमाधेर्बहिरंगसाधनमुक्त्वा तज्ज्ञोरोधप्रयत्नस्यान्तरंगसाधनतां सूत्रयति तस्यापि निरोधे सर्वनिरोधान्निर्बीजः
समाधिरिति सोयं समाधिः सुषुप्तिसमानः सा वृत्तिचैतन्येनानुभवितुं शक्यः तदा सोऽसर्वधीरहिताहित्वात् सु
षुप्तिरेवेति न शंकनीयं मनसः स्वरूपस्य सदसत्त्वाभ्यां विशेषात् तदुक्तं गौडपादाचार्यैः निगृहीतस्य मन
सो निर्विकल्पस्य धीमतः प्रचारः स तु विज्ञेयः सुषुप्तेऽन्यो न तत्समः लीयते हि सुषुप्ते तन्निगृहीतं न लीयते
तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततमिति माण्डूक्यश्रुतावपि श्रूयते द्वैतस्याग्रहणं तु त्यमुभयोः प्राज्ञतु
र्ययोः बीजनिद्रायुतः प्राज्ञः सा च तुर्ये न विद्यते स्वप्ननिद्रायुतावाद्यौ प्राज्ञस्त्वस्वप्ननिद्रया न निद्रां नैव च स्व
प्नं तुर्ये पश्यन्ति निश्चिताः अन्यथाग्रहणतः स्वप्नो निद्रा तत्त्वमजानतः विपर्यासे तयोः क्षीणे तुरीयं पद
मश्नुत इति आद्यौ विश्वतैजसौ अद्वैतस्य वस्तुनोऽन्यथाग्रहणं नाम द्वैतरूपेण प्रतिभासः स च विश्वतैजसयो
र्वर्तमानः स्वप्न इत्युच्यते तत्त्वस्याज्ञानं निद्रा सा च विश्वतैजसप्राज्ञेषु वर्त्तते तयोः स्वप्ननिद्रयोः स्वरूपभूतयो

याग्रस्तं चित्तं कदाचित्समाहितमिव लयविक्षेपरहितं दुःखैकाग्रमवतिष्ठते नाहं शून्यं तच्चित्तं विजानीयात् समा
हितचित्तात्किंचिद्भेदेनावगाहेत् असमाहितमेतदित्यवगम्य लयविक्षेपवत्कषायस्य प्रतीकारं कुर्यात् समप्राप्ते
न ब्रह्माभिधीयते समं सर्वेषु भूतेषु तिष्ठंतं परमेश्वरमिति स्मृतेः लयविक्षेपकषायेषु परिहृतेषु परिशे
षाच्चित्तेन समं ब्रह्म प्राप्यते तत्र समप्राप्ते चित्तं कषायलयभ्रांत्या न चालयेत् रसस्वादयावद्बालयक
षायप्राप्तौ विविच्य न प्राप्तसमप्राप्तावतिप्रयत्नेन चित्तं स्थापयेत् स्थापिते तस्मिन् ब्रह्मस्वरूपभूतः

परमानंदः स्वयमाविर्भवति तथा चोक्तं सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियमिति श्रुतिश्च
भवति समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्व
यं तदंतःकरणेन गृह्यत इति ननु समाध्याविर्भूतब्रह्मानंदस्य बुद्धिग्राह्यत्वं श्रुतिस्मृतिभ्यामभिहि
ते आचार्यैस्तु नास्वादयेत्सुखं तत्रेति बुद्धिग्राह्यत्वं प्रतिषिध्यत इति चेत् नायं दोषः समाधिविरोधिनो बु
त्थानरूपस्य परामर्शस्यैव प्रतिषेधात् यथा निद्रायां दिवसे सुषुप्त्याहं जाह्नवीह्रदे निमग्नेनानुभूयमानमपि शै
त्यसुखं तदा वक्तुमशक्यं पश्चादुन्मग्नेनाभिधीयते यथा वा सुषुप्तावविद्यावृत्तिभिरतिसूक्ष्माभिरनुभू

अजितायां तु सैव पुनरभ्यसनीयेति तदा तदा विविच्यात् आत्मसंस्थमित्यादिना सार्द्धश्लोकेन चतुर्थमभ्यासो
पि स्मृतः गौडपादाचार्या आहुः उपायेन निगृह्णीयाद्विक्षिप्तं कामभोगयोः सुप्रसन्नं लये चैव यथाकामो लय
स्तथा दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं नैवानुपश्यति लये संबोधयेच्चित्तं
विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत् नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवे
त् निश्चरं निश्चलं चित्तमेकीकुर्यात्प्रयत्नतः यदा न लीयते चित्तं न च विक्षिप्यते पुनः अनिङ्गनमनाभा
सं निष्पन्नं ब्रह्म तत्तदेति लयविक्षेपकषायसमप्राप्तयश्चतस्रश्चित्तस्यावस्थाः तत्र निरुध्यमाने चित्ते विषयेभ्यो
व्यावृत्तं सत्पूर्वाभ्यासवशात्प्राग्वदि लयाय सुषुप्तये अभिमुखं भवेत् तदानीमुत्थापनप्रयत्नेन लयकारणनिवा
रणेन वा तच्चित्तं सम्यक्प्रबोधयेत् लयहेतवो निद्राशेषाजीर्णबह्वशनश्रमाः अत एवाहुः समाराध्य निद्रां
सुजीर्णोल्पभोजी श्रमत्याज्यबाधे विविक्ते प्रदेशे सदासीत निस्तृष्ण एष प्रयत्नोऽथवा प्राणरोधो निजाभ्यास
मार्गादिति लयादुत्थापिते चित्ते दैनंदिनप्रबोधाभ्यासवशाद्ग्राह्यादिकामभोगयोर्विक्षिप्येत् तदा विवेकी
जनप्रसिद्धं भोग्यवस्तुगतसर्वदुःखानुस्मरणेन शास्त्रप्रसिद्धजन्मादिरहिताद्वितीयब्रह्मतत्त्वानुस्मरणा
पूर्वकेन भोग्यवस्त्वदर्शनेन च पुनःपुनः विक्षेपाच्चित्तं शमयेत् कषायस्तु चित्तदोषस्तीव्ररागद्वेषादिवासन

योगश्चित्तवृत्तिनिरोध इति वृत्तीनामानंत्यात्तन्नि
श्री·सु· तस्कृतासोलयहेतुः अत एव योगस्य स्वरूपलक्षणं सूत्रयति वृत्तयः पंचतय्यः क्लिष्टाः अक्लिष्टा इति रागद्वेषादिक्लेशरूपा
वे·त· रोधो ऽसंभव इति शंकां वारयितुं वृत्तीः सूत्रयति वृत्तयः ऽक्लिष्टाः यथा पिंजरस्थेव क्लिष्टानामक्लिष्टानां चांतर्भावः
५६ आसुरवृत्तयः क्लिष्टाः रागादिरहिता दैववृत्तयो ऽक्लिष्टाः सहाक्लिष्टा अप्युदाहृताः नाम ध्येयतत्त्वगोचरा
तथापि क्लिष्टा एव निरोद्धव्या इति मंदबुद्धिं वारयितुं ताभिः सहाक्लिष्टा अप्युदाहृताः तत्र प्रत्यक्षानुमानागमाः प्रमाणानि
वृत्तीः विभागयितुं सूत्रयद्विमाह प्रमाणविपर्ययविकल्पनिद्रास्मृतयः तत्र प्रत्यक्षानुमानागमाः प्रमाणानि
२ विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठं ३ शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ४ अभावप्रत्ययालंबना
वृत्तिर्निद्रा ५ अनुभूतविषयासंप्रमोषः स्मृतिरिति ६ न त्वभावः प्रतीयते यस्मिं स्तमस्यावरके सति तत्प्रत्ययो
भावप्रत्ययः तमोगुणं विषयकुर्वती वृत्तिर्निद्रोच्यते अनुभूतविषयस्यासंप्रमोषस्तदनुभवजन्यमनु
संधानं स्मृतिरिति पंचविधवृत्तिनिरोधसाधनं सूत्रयति अभ्यासवैराग्याभ्यां तन्निरोध इति यथा तत्र
वेगोपेतनदीप्रवाहे सेतुबंधनेन निवार्यकुल्यायनेन क्षेत्राभिमुखं तिर्यक् प्रवाहांतरमुत्पाद्यते तथा वैराग्ये
णचित्तनद्या विषयप्रवाहे निवार्य समाध्यभ्यासेन प्रशांतप्रवाहः संपाद्यते मंत्रजपदेवताध्यानादीनां
क्रियारूपत्वेनावृत्तिलक्षणो ऽभ्यासः संभाव्यते सर्वप्रापणेयस्य स्वरूपस्य समाधेः साधकः को नामाभ्यास इ
तिशंकां वारयितुं सूत्रयति तत्र स्थितौ यत्नो ऽभ्यास इति स्थितिर्निश्चलत्वं निरोधः यत्नो मानस उत्साहः एतदेव ॥म
५६

59.

यमानमपिस्वरूपसुखं तदानींसविकल्पेनांतःकरणवृत्तिज्ञानेनगृह्यमाणमप्याकं प्रबोधकाले तु स
त्वाविस्पष्टंप्रागभवति तथासमाधौवृत्तिरहितेनसंस्कारमात्रशेषतया सूक्ष्मेणचित्तेन सुखोनुभवः
स्फुतिसयोगिविहितः महद्दिदं समाधिसुखेऽश्नन्सुखमित्येतदाहश्रो सुषुप्तितस्यसविकल्पकः प
रामश्रुतिप्रसादंनंतदेवाचार्यैःप्रतिपादिते तमेवंत्वामिप्रायेप्रकटयितुं निःसंगः प्रजयाभवेदि
त्युक्तं अनंतं सविकल्पकज्ञानंप्रज्ञातयासहसंगंपरित्यजेत् यद्वा पूर्वोक्तार्थतिमहीनावुद्धिः प्रज्ञातदात्म
केनसाधनेनसुखोस्वादनंतद्वृत्तिनाद्विरूपमासज्ञविवर्जयेत् समाधौब्रह्मानंदे निमग्नं चित्तं यदि कदा ५६
चित्सुखोस्वादनायवापूर्वलवासनाप्राबल्याद्वापद्रवेणवा निःसरेत् तदानिःसरितं चित्तं पुनर्निश्चलं भवति
तदापरब्रह्मण्यास्सहैकीकुर्यात् तत्रचनिरोधप्रयत्नएवसाधनीत्येकीभावेयदानलीयेतेचित्तमित्यनेनश्लो
केनस्पष्टीक्रियते अलिंगानमनामासमित्याभ्यांपदाभ्यांकषायसुखास्वादौप्रतिषिध्येते लयविक्षेपक
षायसुखास्वादैर्योरहितंचित्तं अविक्षेपेनब्रह्मण्येवस्थितंभवति एतदेवाभिप्रेत्यकठवल्लीषुश्रूयते यदापंचा
वतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनाविचेष्टतेतामाहुः परमांगतिं तांयोगमितिमन्यंतेस्थिरामिंद्रियधा
रणां अप्रमत्तस्तदाभवति योगोहिप्रभवाप्ययाविति उपेक्षितोयोगाद्वृत्तिवृत्तीनांप्रभवंकरोति अनुहि

जी॰मु॰ ध्येन सेवितस्य समाधेर्दृढभूमित्वं नाम विषयसुखेवासनया दुःखेवासनया नाकारयितुं अशक्यत्वं न
वे॰त॰ त्वं भगवता दर्शितं यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः यस्मिन् स्थितो न दुःखेन गुरुणापि विचा
६० ल्यते अपरलाभस्यानाधिक्यं कचवृत्तान्तेन वशिष्ठ उदाजहार कचः कदाचिदुत्थाय समाधेः प्रीतमा
नसः एकान्ते समुवाचेदमेको गद्गदया गिरा किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किं आत्म
नापूरितं विश्वं महाकल्पांबुना यथा १ सबाह्याभ्यंतरे देहे ह्यध ऊर्ध्वं च दिक्षु च इत आत्मा तथेहा
त्मा नास्त्यनात्ममयं जगत् न तदस्ति न यत्राहं न तदस्ति न यन्मयि किमन्यदभिवांछामि सर्वं संवित्म
यं ततः स्फारब्रह्मामलांभोधिफेनाः सर्वे कुलाचलाः चिदादित्यमहातेजोमृगतृष्णाजगत्स्थिः इति गु
रुणापि दुःखेनाविचाल्यत्वे शिखिध्वजस्यैव सरत्रय समाधिवृत्तान्तेनोदाजहार निर्विकल्पस
माधिस्थं तत्रापश्यन्महीपतिं राज्ञा नेतावदेतस्माद्बोधयामि परात्पदात् इति संचिंत्य चूडाला सिं
हनादं चकार सा भूयो भूयः प्रभोरग्रे वनेचरभयप्रदं न चालितो भवेद्यदा नादेन तेन स भूयो भूयः
कृतेनापि तदा सा नं प्रचालयत् चालितः पातितोप्येवं स तदा नो बुबुधे बुध इति प्रकृतवृत्तांतेनाप्येतदे
वोदाजहार इति संचिंतयन्नेव सत्कारः परवीरहा निर्विकल्पपरानंदसमाधिं समुपाययौ निर्विकल्पस राम
६०

बहिः प्रवाहशीलं चित्तं सर्वथा निरोद्धव्यमित्येवं विधउत्साह आवर्त्तमानो अभ्यास इत्युच्यते अथम अभ्यासइत्यनो
प्रवृत्तः स्वयमदृढः सन्ननादि प्रवृत्ता व्युत्थानवासनाः कथमभिभवेदित्याशंकामपवदितुं सूत्रयति स
तु दीर्घकालनैरंतर्यसत्कारसेवितो दृढभूमिरिति लोका हि मूढ स्ववचनमुदाहरंति विद्यमानाभ्य
ताः एव वेदाः स्नान ध्येनुगात एम माणाव कस्यपंच दिवसा अतीता अद्याप्यसो नागत इति तादृशा एवा
यं योगी तदा स्यात् यदा दिवसैर्वा मासैर्वा योगसिद्धिं वांछेत् तस्मात् संवत्सरैर्जन्मभिर्वा दीर्घकालं
योग अभ्यसितव्यः तथा च स्मर्यते अनेकजन्मसंसिद्धस्ततो याति परां गतिं चिरमभ्यस्यमानोपि
विच्छिद्य विच्छिद्य यदा सेवेत न हि उत्पद्यमानानां योगसंस्काराणां समनंतर भाविच्छेदकालीनैः
संस्कारैरभिभवे सति वंदनकरोहन्याय आपतेत अग्रे धावन् पश्चाल्लुप्यमानो विस्मरणशीलस्य
तवत् किमालंबेत इति तस्मान्निरंतरमभ्यसितव्यः सत्कार आदरः अनादरेणाभ्यस्यमानेव वृथा
शीलकन्याय आपतेत अकर्त्तुं कुर्वद्व्येश्चेतसि तद्धीणवासनं दूरंगतमनोकृन्तुः कथासंभवतीयथेति
अनादरे लयविक्षेपकषायसुखास्वादनानां मौर्हि हारः तस्मादादरेणाभ्यसितव्यः दीर्घकालादित्रैवि

जी॰ मु॰
वि॰ प्र॰
६१

62

तस्माच्च साक्षात्कारादप्यधिकगुणत्वमवधारयितुं हेतुदृष्टान्तस्य वैराग्यं तस्य तारतम्येन समाधेः शीघ्र
तारतम्यं सूत्रयति — तीव्रसंवेगानामासन्नः समाधिलाभ इति संवेगो वैराग्यं तद्वतां योगिनां त्रिवि
धाः मृदुसंवेगाः मध्यसंवेगास्तीव्रसंवेगाश्चेति आसन्नो लभ्योऽनेनैव कालेन समाधिर्लभ्यत इत्यर्थः तीव्र
संवेगेष्वेव समाधितारतम्यं सूत्रयति मृदुमध्याधिमात्रत्वात्ततोऽपि विशेष इति मृदुतीव्रो मध्यतीव्रो
ऽधिमात्रतीव्रश्चेति तेष्वपि उत्तरोत्तरस्य त्वरया सिद्धिर्द्रष्टव्या उत्तमोत्तमा जनकप्रह्लादादयोऽधिमात्र
तीव्रा मुहूर्तमात्रविचारेणैव हि तु समाधिलाभात् अधिमात्राधिमात्र उद्दालकादयो मृदुसंवेगाश्चेत्प्रयासे
न तल्लाभात् एवमन्येऽपि यथायोगमुदाहरणीयाः तदेवमधिमात्रतीव्रसंवेगस्य भूमावसंप्रज्ञातसमा
धौ लब्धे सति पुनर्व्युत्थानमप्राप्तं सन्मनो नाशयति मनोनाशे च वासनाक्षये कृते सति जीवन्मुक्तिः सुप्रति
ष्ठिता भवति न च मनोनाशेन विदेहमुक्तिरेव न तु जीवन्मुक्तिरिति शङ्कनीयं प्रश्नोत्तराभ्यां तन्निर्णयात् श्रीरामः
विवेकाभ्युदयाच्चित्तस्वरूपेण हि तन्मुने मैत्र्यादयो गुणाः कुत्र जायन्ते योगिनां वद वसिष्ठः द्विविधश्चित्तनाशो
ऽस्ति सरूपोऽरूप एव च जीवन्मुक्तौ सरूपः स्यादरूपो देहमुक्तिगः प्राक्तनं गुणसंभारं ममेति न हि मन्यते सुख

राम
६१

माधिस्थाग्निज्ञार्थितद्रूकावम्भो पंचवर्षसहस्राणि पीनां सोतिष्ठदेकदंष्ट्रः महात्मन् संप्रवृद्धसैतोवं विष्णुरुदा
हरन् पंचग्नं संप्रदध्यौ च ध्यानयन्तु कृकुभां गतां महतां तेन शाङ्केन चैस्म च प्रागजन्मना व सव संप्रवृत्तात्मा
तानवेशाः शनैः शनैरिति एवं वीतहव्यादीनामपि समाधिरूढानां वैराग्यं द्विविधं अपरं परं चेति
यतमानव्यतिरेकैकेन्द्रियवशीकारभेदेदपरं चतुर्विधं तत्राद्यत्रयं अपर्यायत्संज्ञान्तमीहार्थानुर्थसूत्रयति
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति स्रक्चन्दनवनितापुत्रमित्रक्षेत्रधनादयो दृष्टाः
वेदोक्तास्वर्गादयः आनुश्रविकाः तत्रोभयत्रास्यापि तत्त्वाभावे विवेकतारतम्येन यतमानादि वैरा
ग्यत्रयं भवति अस्मिन् जगति किं सारं किमसारमिति गुरुमुखाच्छास्त्रेभ्यो ज्ञानानामीत्सु योगो यतमानत्वं क्वचि
त्पूर्वं विद्यमानानां दोषाणां मध्ये ऽभ्यासमानेन विवेकेनैतावन्तः पक्वा एतावन्तोवशिष्टा इति विवेचनं व्यति
रेकः दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन तां प्रवृत्तिं परित्यज्य मनसि औत्सुक्यमात्रेणोत्त
स्यावस्थानमेकेन्द्रियत्वं वितृष्णत्वं वशीकारः तदिदमपरं वैराग्यम् [illegible] योगप्रवर्त्तकत्वेन संप्रज्ञातस्यां
तरंगं असंप्रज्ञातस्यानुबहिरंगं तत्रान्तरंगं परं वैराग्यं सूत्रयति तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति सं
प्रज्ञातसमाधिपरिपाकेन गुणत्रयात्मकात्प्रधानाद्विविक्तस्य पुरुषस्य ख्यातिः साक्षात्कार उत्पद्यते

यो॰सु॰
वै॰न॰
६२

62

ऽर्पितं सिद्धौ वा किं प्रयोजनमित्येतस्य चतुर्थप्रश्नस्योत्तरमिदानीमभिधीयते ज्ञानहेतुः १ तपो २ वि
षयाभाव ३ दुःखनाशः ४ सुखाविर्भावाः ५ इति पंच प्रयोजनानि ननु प्रमाणोत्पन्नस्य तत्त्वज्ञा
नस्य को नाम बाधप्रसंगो येन दृढत्वे हेतुरिति चेत्तदुच्यते चित्तविश्रान्त्यभावे संशयविपर्ययोः प्रसक्तेः ता
तथाहि तत्त्वविदोऽप्यवस्थाविश्रान्तेः पूर्वं संशयं विश्वामित्र उदाजहार विश्वामित्रोऽपि च तथा यथा तत्त्ववास्य
न्यत् तेयं ज्ञानवतो राघव स्वयैव सूक्ष्मया बुद्ध्या सर्वं विज्ञातवानसि भगवद्व्यासपुत्रस्य शुकस्येव मतिस्त
व विश्रान्तिमात्रमेवात्र ज्ञातज्ञेयोऽप्यपेक्षत इति शुकस्तु स्वयमेवादौ तत्त्वं विदित्वा तत्र संशयानः पि
तरं पृष्ट्वा पित्रापि तथैवानुशिष्टस्तत्रापि संशयानो जनकमुपासाद्य तेनापि तथैवानुशिष्टस्तत्रैव मु
वाच स्वयमेव मया पूर्वं ज्ञातं तत् ज्ञातं विविक्ततः एतदेव च पृष्टेन पित्रा मे समुदाहृतं भवता चैष एवार्थः
कथितो वाग्विदां वर एष एव च वाक्यार्थः शास्त्रेषु परिदृश्यते यथायं स्वविकल्पोत्थः स्वविकल्पपरिक्षया
त् क्षीयते दग्धसंसारो निःसार इति निश्चयः तत्किमेतन्महाबाहो सत्यं ब्रूहि ममाचले ततो विश्रान्तिमाप्नो

राम
६२

दुःखायवश्पन्दविद्यमानं मनो विदुः चेतसः कथिता सत्ता मयार घुकुलोद्वह अस्य नाशमिदानीं त्वं शृणु प्र
श्नविदांवर सुखदुःखदशा धीरं समान्न प्रोद्धरन्ति यं निश्वासादिव शैलेन्द्रं चित्तं तस्य मृतं विदुः आपत्कार्पण्य
मुत्साहो मदो मांद्यं महोत्सवः यं नयन्ति न वैरूप्यं तस्य नष्टं मनो विदुः चित्तनाशो निधानं हि यदा न स्यात्तदा भव
मैत्र्यादिभिर्गुणैर्युक्तं तदा सत्त्वमुदेत्यलं भूयो जन्मविनिर्मुक्तं जीवन्मुक्तस्य तन्मनः सरूपोऽसौ मनोनाशो
जीवन्मुक्तस्य विद्यते अरूपस्तु मनोनाशो यो मयोक्तो रघूद्वह विदेहमुक्तावेवासौ विद्यते निष्कलात्मकः
समग्राग्र्यगुणाधारमपि सत्त्वं प्रलीयते विदेहमुक्तावमलपदे परमपावने संशान्तदुःखमजडात्मक
मेकरूपमानन्दमंथरमपेतरजस्तमो यत् आकाशकोशतनवोतनवो महान्तः तस्मिन्पदे गलितचि
त्तलवा वसन्तीति तस्मात्सरूपो मनोनाशो जीवन्मुक्तिसाधनमिति स्थितं इति जीवन्मुक्तिसाधनमनोना
शप्रकरणं ३ केयं जीवन्मुक्तिः किं वा तत्र प्रमाणं कथं वा तत् सिद्धिरिति एतस्य प्रश्नत्रयस्योत्तरं नि

छेतव्यः अत एव श्रूयते छिद्यन्ते सर्वसंशया इति विपर्ययस्यापि निदाघउदाहरणं ऋभुः परमकरुणा
या निदाघस्य गृहमेत्य बहुधा तं च बोधयित्वा निर्जगाम बुद्धे पितृद्वय हिमवस्त्तस्य श्रद्दधानो निदाघः क
र्माण्येव परमपुरुषार्थहेतुरिति विपर्ययं प्राप्य कर्मानुष्ठाननिष्ठ अपूर्वं यज्ञः सोपि शिष्यस्य पुरु
षार्थभ्रंशं मा भूदिति कृपया गुरुः पुनरागत्य बोधयामास न तदापि विपर्ययं जहौ ततो येन तु बो
धनेन विपर्ययं परित्यज्य विश्रांतिमलभत संशयविपर्ययाभ्यामसंभावना विपरीतभावनारूपाभ्यां
तत्वज्ञानस्य फलप्रतिबंधो न तु स्वरूपे विष्णुपुराणे पराशरेण मैत्रेयं प्रति मत्रिमैत्रेयोपधैर्यं हि सुदी
र्घेणापि यत्नेन ध्यानेन शत्रवः स्यात्प्रतिबंधस्तथैव च नानाभिरपि संज्ञानैः सुदीर्घः सुदृढोपि च
प्रदध्यानेन शत्रुः स्यात्प्रतिबंधस्तु कल्मषम् भावना विपरीता या या च संशयभावना कुरुते प्रतिबंधं
सा तत्वज्ञानस्य नापरमिति तस्मादविश्रांतचित्तस्य संशयविपर्ययप्रसंगेन तत्वज्ञानस्य फलप्रति
बंधलक्षणागोष्ठधादूषणापि हि ते विश्रांतचित्तस्य तु मनोनाशेन यदा जगद्दिनप्रलीयते तदा संशय
विपर्ययोः कः प्रसंगः जगत्प्रतिभासरहितस्य ब्रह्मविदो विदेहेह यत्राहारोपि नैव स्वप्रयत्नेन परमेश्वर

त्ति चेतसा भ्रामितं जगत् ॥ जनकः ॥ नातः परतरः कश्चिन्निश्चयोऽस्त्यपरो मुने स्वयमेव त्वया ज्ञातं गुरुत
श्च पुनः श्रुतं ॥ अव्युच्छिन्नः चिदात्मैकः पुमानस्तीह नेतरः स संकल्पवशाद्बद्धो निःसंकल्पश्च मुच्यते मुने
त्वया स्फुटं ज्ञातं ज्ञेयमस्य महात्मनः भोगेभ्योऽप्यरतिर्जाता दृश्याद्वा सकलादिह प्राप्तं प्राप्तव्यमखिलं
भवता पूर्णचेतसा न दृश्ये पतसि ब्रह्मन्मुक्तस्त्वं भ्रान्तिमुत्सृज ॥ अनुशिष्टः स इत्येवं जनकेन महात्मना
विशश्राम शुकस्तूष्णीं स्वस्थे परमवस्तुनि वीतशोकभयायासो निरीहः छिन्नसंशयः जगाम शिख
रं मेरोः समाध्यर्थमनिंदितः तत्र वर्षसहस्राणि निर्विकल्पसमाधिना दश स्थित्वा शशामासावा
त्मन्यस्तिह दीपवदिति तस्माद्बुद्धितैपि तत्त्वे विश्रान्तिरहितस्य शुकराघवयोरिव संशयपङ्कश्च्यवते सचा ३६
ज्ञानमिव मोक्षस्य प्रतिबंधकः ॥ अतएव भगवतोक्तं ॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति नायं
लोकोऽस्ति न परो न सुखं संशयात्मन इति ॥ अत्र बुद्धिविपर्ययः सर्वोऽनर्थोदाह्रियते अज्ञानविपर्य
यौ मोक्षमात्रविरोधिनौ संशयस्तु भोगमोक्षयोरुभयोरपि विरोधी तत्स्वपरस्यापि विरुद्धकोटिद्वया
वलंबित्वात् यदा संसारसुखाय प्रवृत्तिः तदा मोक्षमार्गे बुद्धिस्तां निरुणद्धि यदा च मोक्षमार्गे प्रवृ
त्तिस्तदा संसारबुद्धिस्तां प्रतिबध्नाति तस्मात्संशयात्मनो न किंचित्सुखमस्तीति मुमुक्षुणा संशयः सर्वथा

रामतयाभ्यंतराणां बाह्यानां पदार्थानामभावनात् परप्रयुक्तेन चिरं प्रयत्नेनावबोधनं पदार्था

नी.मु. मारभ्य क्रमेणाभूमिचतुष्टये प्राप्तात्मावगंतव्यं भूमयश्चावशिष्टेन दर्शिता ज्ञानभूमिः शुभेच्छाख्या
वे.न. प्रथमा समुदाहृता विचारणा द्वितीया स्यात्तृतीया तनुमानसा सत्त्वापत्तिश्चतुर्थी स्यात् ततोऽसंसक्ति
नामिका पदार्थाभावनी षष्ठी सप्तमी तुर्यगा स्मृता इति स्थितः किं मूढ एवास्मि प्रेक्षेऽहं शास्त्रसज्ज
६.४ नैः वैराग्यपूर्वमिच्छेति शुभेच्छेत्युच्यते बुधैः शास्त्रसज्जनसंपर्कवैराग्याभ्यासपूर्वकं सदाचारप्रवृत्ति
२५ र्याप्रोच्यते सा विचारणा विचारणाशुभेच्छाभ्यामिंद्रियेभ्यो विरक्तता यत्र सा तनुतामेति प्रोच्यते तनु
मानसा भूमिकात्रितयाभ्यासाच्चित्तेऽर्थविरतेर्वशात् सत्त्वात्मनि स्थितिः शुद्धे सत्त्वापत्तिरुदाहृता
फ५ दशाचतुष्टयाभ्यासादसंसर्गकलाच्चया रूढसत्त्वचमत्कारा प्रोक्ता संसक्तिनामिका भूमिकापंचकाभ्या
64 सात्मा भावनी नाम षष्ठी भवति भूमिका भूमिषट्कचिराभ्यासाद्भेदस्यानुपलंभनात् यत्स्व
भावैकनिष्ठत्वं सा ज्ञेया तुर्यगागतिरिति अत्र भूमिकात्रितयं ब्रह्मविद्यायाः साधनमेव न तु विद्याको
टावंतर्भवति भेदसत्त्वबुद्धेरनिवर्तितत्वात् अत एवैतज्जागरणमिति व्यपदिश्यते तदुक्तं भूमि
कात्रितयं त्वेतद्रामजाग्रदिति स्थितं यथावद्भेदबुद्ध्येदं जगज्जाग्रति दृश्यत इति चतुर्थी भूमौ सर्व

ऽरं तेन प्राक्तना पुनर्निष्पाद्यते । अत एव श्रुतौ तेषां । आरभन्त इति नोपजनं स्मरन्निदं शरीरं स यथा प्रयो
ग्य आचरणे प्रयुक्त एवमेवायमस्मिन्शरीरे प्राणो युक्त इति उपजनं जनानां समीपे वर्तमानमिदं शरी
रं न स्मरन् ब्रह्मवित्प्रवर्तते पार्श्वस्थजनैरेव लक्ष्यते विदः शरीरं पश्यन्ति स्वयं तु निर्मनस्कत्वात्स्वदीयमि
दं शरीरमिति न स्मरति प्रयोग्यः पशुरश्वादिर्वाहने प्रयुक्तो महः पिच्छिलो यवली वर्द्धादिः स यथा स
रथिनामर्गमाचरणे प्रेरितः पुनःपुनः सारथिप्रयत्नमनपेक्ष्य स्वयमेव रथं पश्चात्कटादिकं पुरोवर्ति
ग्रामं नयति एवमेवायं प्राणो वायुः परमेश्वरेणास्मिन्शरीरे नियुक्तः सत्त्वसत्तिवाजीवप्रयत्नमनपेक्ष्य वहा
रं निर्वाहयति भागवतेऽप्यस्मर्यते देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं
दैवादुपेतमथ दैववशादपेतं वासो यथा परिकृतं मदिरामदान्धः इति वसिष्ठोऽप्याह पार्श्वस्थबोधिताः सन्तः
पूर्वाचारक्रमागतं । आचारमाचरन्त्येव सुप्तबुद्धवदुत्थिता इति सिद्धो न पश्यत्याचारमाचरतीत्युभयोः
परस्परविरोध इति चेन्न विश्रान्तितारतम्येन व्यवस्थोपपत्तेः तदेतारतम्यमभिप्रेत्य स्मर्यते । आत्मक्रीड
। आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति । अत्र चत्वारः प्रतीयन्ते ब्रह्मवित्प्रथमः ब्रह्मविद्वरो द्विती
यः ब्रह्मविद्वरीयांस्तृतीयः ब्रह्मविद्वरिष्ठः चतुर्थः तत्र एतेषु सप्तसु योगभूमिषु चतुर्थी योगभूमि

जी·मु·
वि·त·
६५

माधिप्राप्तस्य संस्कारमात्रशेषस्य चित्तस्य मनोराज्यं कर्तुं बाह्यपदार्थानुग्रहीतुं वा सामर्थ्याभा
वात् । आकाशावस्थितकुम्भवदन्तर्बहिः शून्यत्वं सर्वप्रकाशात्मस्वितानैकरसे ब्रह्मणि निमग्न
त्वेन हि असर्वत्र ब्रह्मदृष्ट्या समुद्रमध्यस्थापितजलपूर्णकुम्भवदन्तर्बहिः पूर्णत्वं तुरीयाभि
धां सप्तमभूमिं प्राप्तस्य योगिनः । स्वतः परतो वा सुत्थानमेव नास्ति ईदृशमेवोद्दिश्य देहं विनश्वर
मवस्थितमुत्थितं वेत्यादि भागवतवाक्यं प्रवृत्तं । असंप्रज्ञातसमाधिप्रतिपादकानि योगशास्त्राण्य
त्रैव पर्यवसितानि । सोयमीदृशो योगी पूर्वैराहृतः । अतो ब्रह्मविद्वरिष्ठ इत्युच्यते । न देवं पार्श्वस्थबो
धितः । सिद्धो न पश्यतीत्यनयोर्भूमिद्वये व्यवस्थितत्वान्न कोपि विरोधः । तत्रायं संग्रहः । पंचमादिभूमि ६५
त्रयरूपायां जीवन्मुक्तौ संख्याद्युमानानां द्वैतप्रतिभासाभावेन संशयविपर्ययप्रसंगाभावादुत्पन्नं तत्व ५५
ज्ञानं अबाधेन रक्षितं भवति । सेयं ज्ञानरक्षा जीवन्मुक्तेः प्रथमं प्रयोजनं । तपो द्वितीयं प्रयोजनं । योगभूमी
नां दैवतादिप्राप्तिहेतुतया तपस्त्वं द्रष्टव्यं । तदुक्तं चार्जुनभगवतोः श्रीरामवसिष्ठयोः प्रश्नोत्तराभ्याम
वगम्यते । अर्जुनः । अयतिः श्रद्धयोपेतो योगाच्चलितमानसः । अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ति२
कच्चिन्नोभयविभ्रष्टः छिन्नाभ्रमिव नश्यति । अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि । श्रीभगवानुवा

65

राम
६५

जगदुपादानस्य ब्रह्मणो वास्तवमद्वितीयसत्तास्वभावं निश्चित्य तस्मिन् ब्रह्मण्यारोपितयोर्जगच्छब्दाभि
धेययोर्नामरूपयोर्मिथ्यात्वमवगच्छति मुमुक्षोः पूर्वोक्तं जागर[illegible]पदत्रयं भूमिः स्वप्नः तदाह अ
द्वैते स्थैर्यमायाते द्वैते च प्रशमं गते पश्यंति स्वप्नवल्लोकं चतुर्थीं भूमिकामिताः विच्छिन्नशरदभ्रां
प्र४ शविलयं प्रविलीयते सत्तावशेष एवास्ते चतुर्थीं भूमिकामितः सोयं चतुर्थीं भूमिं प्राप्तो योगी ब्रह्म
विदित्युच्यते पंचम्यादयस्तिस्रो भूमयो जीवन्मुक्तेरवांतरभेदाः ते च निर्विकल्पसमाध्यभ्यासक्र
तेन विश्रांतितारतम्येन संपद्यंते पंचमभूमौ निर्विकल्पकालत[illegible] तदा स्वयमेव व्युत्तिष्ठति सोयं योगी
ब्रह्मविद्वरः षष्ठभूमौ पार्श्वस्थैर्बोधितो व्युत्तिष्ठति सोयं योगी ब्रह्मविद्वरीयान् तदेतद्भूमिद्वयं
सुषुप्तिर्गाढसुषुप्तिरिति चाभिधीयते तदाह पंचमीं भूमिकामेत्य सुषुप्तपदनामिकां शांता
शेषविशेषांशस्तिष्ठत्यद्वैतमात्रकः अंतर्मुखतया नित्यं बहिर्वृत्तिपरोपि सन् प्रशांततया नित्यं निद्रा
लुरिव लक्ष्यते कुर्वन्नभ्यासमेतस्यां भूमिकायां विवासनः षष्ठीं गाढसुषुप्त्याख्यां क्रमात्पतति भूमि
कां यत्र नासन्न सद्रूपो नाहं नाप्यनहंकृतिः केवलं क्षीणमननमास्तेऽद्वैतेऽतिनिर्भयः अंतःशून्यो
बहिःशून्यः शून्यकुंभ इवांबरे अंतःपूर्णो बहिःपूर्णः पूर्णकुंभ इवार्णवे [illegible] गाढनिर्विकल्पस

गी-भु- नास्तित्वाविलोकसंग्रहार्थं तपः प्रयुज्यते अत एव भगवानाह तृतीयाध्याये लोकसंग्रहमे
ते-त- वापि संपश्यन्कर्तुमर्हसीति संग्राह्यो लोके त्रिविधः शिष्यो भक्त आस्तिकश्चेति तत्र शिष्य
६६ स्यान्तर्मुखत्वे योगिनि गुरौ प्रामाणिकत्वबुद्ध्युत्पत्त्यर्थं तदुपदिष्टे तत्त्वे परमं विश्वासं प्राप्य चित्तं
सहसा विश्राम्यति अत एव श्रूयते यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रका
शन्ते महात्मन इति स्मर्यते च ॥ श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ज्ञानं लब्ध्वा परां शान्तिमचिरेणा
धिगच्छति अन्नप्रदानमिवासस्थानकल्पनादिना योगिनं सेवमानो भक्तस्तदीयं तपः स्वयमेवादत्ते त
66 था च श्रूयते तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामिति तदस्यापि द्विवि
धः आस्तिको नास्तिकश्चेति तत्रास्तिको योगिनः सन्मार्गाचरणादेव स्वयमपि सन्मार्गे प्रवर्तते तदु
क्तं स्मृतौ यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तत इति नास्तिको
ऽपि योगिनो द्वेषः पापान्मुच्यते इत्युक्तं तदाह भगवान् वसिष्ठः यस्यानुभवपर्यन्ता बुद्धिस्तत्त्वे प्रवर्तते
तद्दृष्टिगोचराः सर्वे मुच्यन्ते सर्वपातकैरिति अनेन प्रकारेण सर्वप्राण्युपकारित्वं योगिनो विवक्षितत्वा
त्तदुक्तं कुलं पवित्रं जननी कृतार्था वसुंधरा पुण्यवती च तेन अपारसंवित्सुखसागरेऽस्मिन् लीने

च प्राप्यपुण्यकृतांल्लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ १ ॥ अथ
वा योगिनामेव कुले भवति धीमतां । एतद्धि दुर्लभतरं लोके जन्म यदीदृशं ॥ तत्र तं बुद्धिसंयोगं लभते पौ
र्वदैहिकं । यतते च ततो भूयः संसिद्धौ कुरुनंदन ॥ श्रीरामः । एकामथ द्वितीयां वाप्यथ तृतीयां भूमिकामुत
आरूढस्य मृतस्याथ कीदृशी भगवन्गतिः ॥ वशिष्ठः । योगभूमिकया क्रांतजीवितस्य शरीरिणः
भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतं ॥ ततः सुरविमानेषु लोकपालपुरेषु च । मेरूपवनकुंजेषु
रमते रमणीसखः ॥ भुक्तेषु कृतसंभारे दुःकृते च पराकृते । भोगक्षये परिक्षीणे जायंते योगिनो
भुवि ॥ शुचीनां श्रीमतां गेहे गुप्ते गुणवतां सतां । तत्र प्राग्भावनाभ्यस्तयोगभूमित्रयं बुधः ॥ पुनः परि
पतत्पुत्रेरुत्तमं भूमिकाक्रममिति । अस्त्वेवं योगभूमीनां द्वेवलोकप्राप्तिहेतुत्वं तावता तपस्त्वं कुत इति
चेन्न श्रुतेरिति सूत्रमः । तथा च तैत्तिरीया आमनंति तपसा देवा देवता अग्र आसन् तपसा ऋषयः स्वा
विंदंतीति तत्त्वज्ञानात्प्राचीनस्य भूमिकात्रयस्य तपस्त्वेन तत्त्वज्ञानोत्तरकालीनस्य निर्विकल्पसमा
धिरूपस्य पंचम्यादिभूमित्रयस्य तपस्त्वं कैमुतिकन्यायेन सिद्धं । अत एव स्मर्यते मनसश्चेंद्रियाणां च
एकाग्र्यं परमं तपः । तज्ज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यते ॥ यद्यप्यनेन न्यायेन तपसा प्राप्यं जन्मांतरे

जी॰मु॰ अग्नेश्चतुर्मास्यानि यदतत्र स्तेव प्रवृंधाः येसंवत्सरात्मपरित्सराश्चतेचाहर्गणाः सर्ववेदसंज्ञाय

वे॰न॰ एतत्सत्रंयत्सराणांतद्देवमयंइति सर्ववेदसंसर्वस्वदक्षिणके अत्रैत चक्रेणप्रकृताहोमात्रादिपरि

६१ वत्सरांतं सर्वकालसमष्ट्यपलक्षितंयोगिनआयुर्विवक्षयते यदायुस्तत्सर्वस्वदक्षिणोपेतं सत्रमि

त्यर्थः उत्तरानुवाकेनचरमभागेनसर्वयज्ञात्मकयोगिनमुपासीनस्यत्रममुक्तिरूपंसूर्यचंद्रमसोःकार्य

कारणात्मनोब्रह्मणोस्तादात्म्यलक्षणंफलमाम्नायते एतद्वैजरामरणमग्निहोत्रंसत्रंयएवंविद्वानु

८७ दगयनेप्रमीयतेदेवानामेवमहिमानंगत्वादित्यस्यसायुज्यंसलोकतांगच्छति अथयोदक्षिणेप्रमीयतेपि

तॄणामेवमहिमानंगत्वाचंद्रमसःसायुज्यंसलोकतामाप्नोत्येतौवैसूर्यचंद्रमसोर्महिमानौब्रह्मणोवि

द्वानभिजयति तस्माद्ब्रह्मणोमहिमानमाप्नोति तस्माद्ब्रह्मणोमहिमानमित्युपनिषदित्ति जरामरणोव

धिकंयद्योगिचरितमस्ति तदेतद्वेदोक्ताग्निहोत्रादिसंवत्सरसत्रांतकर्मस्वरूपमित्येवमुपासीनोभवना

तिशयेनसूर्यचंद्रमसोःसायुज्यंतादात्म्यंप्राप्नोति भाव नामांद्योनसमानलोकंप्राप्यतस्मिंल्लोकेसू

र्यचंद्रमसोःविभूतिंअनुभूयततऊर्द्धंसत्यलोकेचतुर्मुखस्यब्रह्मणोमहिमानंप्राप्नोति तत्रोत्पन्नत

राम
६१

परेब्रह्मणि यस्य चेत्तद्वृत्ति न केवलं योगिनः पुण्यस्तोय व्यवहारस्यैव तपस्त्वं किंतु सर्वस्यैव लौकि
कव्यवहारस्यापि तथा चैतत्तैत्तरीयाः सपूर्णवोपासमामनंति येनानुवाकेन विदुषो महिमानमामनं
ति तस्मिंश्चानुवाके पूर्वभागेन योगिनो यज्ञावयवा यज्ञांगत्वेनाम्नाताः तस्यैवं विदुषो यज्ञस्यात्मा यजमानः
श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्नि
र्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीदिति अत्र दानं द
क्षिणेति पदमध्याहर्तव्यं ग्र प्रवत्तपो दानमार्जवमहिंसा सत्यवचनमिति वा अस्य दक्षिणा इति श्रु
तेरेवमाम्नातत्वात् उक्तानुवाके न मध्यमभागेन योगिव्यवहारस्य जीवनकालस्य ज्योतिष्टोमा
त्मकयज्ञरूपत्वेनाम्नाताः यावद्ध्रियते सा दीक्षा यदश्नाति तद्ध
विः यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यत्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं त
दाहवनीयः या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं [illegible] प्रातरत्ति
तत्समिधं यत्प्रातर्मध्यंदिनं सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च

जी·मु· मेये विसंवदन्ते किंनायोगिचरित्रे आद्ये पिन तु योगी परशास्त्रप्रमेयं दूषयति तमेवैकं विजानीथ आत्मानं
वे·त· अन्या वाचो विमुंचथ नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् इत्यादिश्रुत्यर्थतात्पर्यवत्वात्
६८ नापि स्वशास्त्रप्रमेयं प्रतिवादिनो प्रसमर्थयते पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः परं
ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेदिति श्रुत्यर्थपरत्वात् यदा प्रतिवादिनमपि स्वात्मतया वीक्षते त
दा विजिगीषयाः का कथा नापि लोकायतिकव्यतिरिक्ताः सर्वे पि तीर्थिको मोक्षमंगीकुर्वन्यो गिचार
68 त्रे विसंवदितुमर्हन्ति आर्हतबौद्धवैशेषिकनैयायक शैववैष्णवशाक्तसांख्ययोगादिमोक्षशास्त्रेषु
प्रमेयस्य नानाविधत्वे पि मोक्षसाधनस्य यमनियमाद्यष्टांगयोगस्यैकविधत्वात् तस्माद्विसंवादेन सर्व
संमतो योगीश्वरः एतदेवाभिप्रेत्य वसिष्ठ आह यस्येदं जन्म पाश्चात्यं तमाश्वेव महामते विशंति विद्या वि
मला मुक्ता वेणुमिवोत्तमं आर्यता हृद्यता मैत्री सौम्यता मुक्तता ज्ञता समाश्रयंति तं नित्यमंतःपुरमिवां
गनाः पेशलाचारमधुरं सर्वे वांछंति तं जनाः वेणोः मधुरनिध्वानं वने वनमृगा इव मुमुक्षिवत्सशामा
भाववृत्तिना स्थितः सदा जाग्रत्ययेन चेतसा कलान्वितो विधुरिव सदा बुद्धैर्निषेव्यते मुक्तः सद्वृत्तिहस्तरः

राम
६८

त्वज्ञानसंतत अर्द्धसत्यज्ञानानंदस्वरूपस्य परब्रह्म। णोमहिमानंकैवल्यंप्राप्नोतीत्युपनिषदित्युनेनग्रंथोक्तवि
द्याया स्तस्य तिपादकग्रंथस्य चोपसंहारः क्रियते तदेवंजीवन्मुक्तिस्तपोरूपं द्वितीयप्रयोजनं सिद्धं विसंवादा
भावस्तस्य तृतीयप्रयोजनं नयवत्वंतर्मुखेवास्य व्यवहारमपश्यतियोगीश्वरे लौकिकस्तीर्थिकोवाकश्चि
द्विसंवदतेलौकिको विसंवादो द्विविधः कलहरूपो निंदारूपश्च तत्र क्रोधादिरहितेनयोगिना सहकथं
नामलौकिकः कलहायते तद्वाहित्यं हि समर्थीतं क्रुध्यंतं न प्रतिक्रुद्धेदाकृष्टः कुशलंवदेत् अतिवादांस्ति
तिक्षेत नावमन्येतकंचनेति ननुजीवन्मुक्तेः प्राचीनो विद्वत्संन्यासस्ततोप्राचीनंतत्वज्ञानं तस्मादपिप्राचीनो
विविदिषासंन्यासः अत्रैतेक्रोधादिराहित्यधर्माः कथंस्मृताइतिचेत् बाढं अतएवजीवन्मुक्तस्यक्रोधा
दयः शंकितुमप्यशक्याः अत्यर्वाचीनपदे विविदिषासंन्यासेपियदाक्रोधादयोनसंति तदोत्तमपदेतत्वज्ञा
नेकुतस्तेस्युः कुतस्तरांविद्वत्संन्यासेकुतस्तमांचजीवन्मुक्तौ अतोनयोगिनासहलौकिकस्यकलहः संभ
वतिनापिनिंदारूपो विसंवादः शंकनीयः निंद्यत्वस्यानिश्चितत्वात् तथाचस्मर्यते यंनसंतंनचासंतंना
नवहुश्रुतं(श्रुतं नसुवृत्तं नदुर्वृत्तं वेदकश्चित्सवैयतिः इति सदसत्वेउत्तमाधमजातिरिति लौकिकोपिकिंशास्त्रप्र

जी॰मु॰
वि॰त॰
६९

69

क्रमेषु हि रागादिपर्यन्तेषु तत्तत्रागतगुरोष्टानं देषु श्रोत्रियस्य चाकामहतस्येति श्रुतेः सद्रूपेणा चि-
द्रूपेणानंदरूपेण च सर्वत्रावस्थितं स्वात्मानमनुसंदधतः सर्वभोक्तृरूपत्वमस्तीत्यभिप्रेत्यैव श्रूयते
अहमन्नमहमन्नादः इति कर्तृकत्वं तु स्मर्यते ज्ञानाग्निर्दग्धकर्माणं तस्यैकतत्त्वस्य योगिनः नैव किं-
चित्कर्तव्यमस्तीति चेन्न सत्वविदु यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः आत्मन्येव च संतु-
ष्टस्तस्य कार्यं न विद्यते इति प्राप्तप्राप्तव्यता श्रूयते अभयं वै जनक प्राप्तोऽसीति तस्मात्तत्सर्वमभव-
दिति ब्रह्मविद्ब्रह्मैव भवतीति च नन्वेतौ द्वौ दुःखविनाशसुखाविर्भावौ तत्त्वज्ञानेनैव सिद्धत्वान्न जी-
वन्मुक्तिप्रयोजनतामर्हतः मैवं स्फुटस्फुरद्धितयोस्तयोरत्र विवक्षितत्वात् यथा तत्त्वज्ञानं पूर्वमेवोत्पन्न-
मपि जीवन्मुक्तौ स्फुटीभवति एवमेतावपि स्फुटीभवतः नन्वेवं जीवन्मुक्तेः पंचप्रयोजनत्वे सति ७४
समाहितो योगेश्वरो लोकव्यवहारं कुर्वतस्तत्त्वविदोऽपि श्रेष्ठ इति वक्तव्यं तच्च रामवशिष्ठयोः प्रश्नोत्तराभ्यां
निराकृतं श्रीरामः भगवन् भूतभव्येश कश्चित् जातसमाधिकः प्रबुद्धइव विश्रांतो व्यवहारपरोऽपि सन्
कश्चिदेकांतमाश्रित्य समाधिनियमस्थितः तयोस्तु कतरः श्रेयान्निति भगवन्वद वशिष्ठः इमं गुणसमा-

मात्तरीवशमं यांति विषमा विप्रदूतिंच विश्वासमिह भक्तानि सर्वाणि प्राप्नुवन्ति तथाचिपुत्रवद्दृष्टेषु मुय
५२ जैकेषु न्ययेषु च यर्लोकसुखगाढं प्रमुप्रामवानिवराजन्नद्इति तदेवमवाधं जीवन्मुक्तेर्विसंवादाभावरूपं तृतीयंप्र
योजनं सिद्धं दुःखविनाशसुखाविर्भावरूपे चतुर्थपंचमप्रयोजने विद्यानंदात्मकेन ब्रह्मानंदगतेन चतु
र्थाध्यायेन निरूपिते तदुभयमत्र संक्षिप्योच्यते आत्मानंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्क
स्यकामायशरीरमनुसंज्वरेदित्यादिश्रुत्या दुःखस्य हि कस्य विनाश उक्तः एतंहवावनतपति किमहंसा
धु नाकरवं किमहं पापमकरवमित्यादिश्रुत्या तयोः आमुष्मिकहेतुपुण्यपापचिंतारूपस्य दुःखस्य विनाश
माहुः सुखाविर्भावस्त्रिविधः सर्वकामावाप्तिः कृतकृत्यत्वं प्राप्यप्राप्यत्वं चेति सर्वकामावाप्तिस्त्रेधा सर्वसाक्षित्वं आप्नु५
सर्वत्राकामहतत्वं सर्वभोक्तृरूपत्वं चेति हिरण्यगर्भादिस्थावरांतेषु देहेषु अनुगतसाक्षिचैतन्यमहंक स॰
पंयद्ब्रह्मानंदस्वाहमस्मीति जानतः स्वदेहवत्परदेहेष्वपि कामसंश्लिष्टत्वमस्ति तदेतदभिप्रेत्य श्रूयते सोऽश्नु
ते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति लोके मुक्तेषु भोगेष्वकामहतत्वं यत्तत् सर्वकामप्राप्तिरित्युच्य
ते तथाच सर्वभोगे दोषदर्शिनिस्तत्त्वविदः सर्वत्राकामहतत्वादस्ति सर्वकामावाप्तिः अतएव सर्वभोगान्

अथपरमहंसोपनिषत्प्रतिपादितः तांचोपनिषदमनूद्य व्याख्यास्यामः तत्रादौ विद्वत्संन्यास ३

जी॰मु॰ पालयन्नयं मनोनाशरूपसमाधिः प्रशस्त एव तस्माद्योगिनामस्य श्रेष्ठत्वात् पंचप्रयोजनोपेतायां जी
वे॰त॰ वन्मुक्तेर्न कोपि विघ्न इति सिद्धं ॥ इति श्रीस्वरूपप्रमाणसाधनप्रयोजनैर्जीवन्मुक्तिनिरूपितप्रकरणं ४
अथ तदुपकारिणं विद्वत्संन्यासं निरूपयामः विद्वत्संन्यासं योग्यं प्रश्नमवतारयति अथ योगिनां पर
१० महंसानां कोयं मार्गस्तेषां का स्थितिरिति नारदो भगवंतमुपगत्योवाचेति यद्यप्यपृथगन्वयेहित आ
नंतर्यप्रतियोगी न कोप्यत्र प्रतिभाति तथापि पूर्वस्या पौर्वात्र विद्वत्संन्यासस्तेस्मिन्विदितत्वो लोकव्य
70 वहारे विक्षिप्यमाणो मनोविश्रांतिकामयमानोधिकारी अतस्तादृगधिकारसंपत्त्यानंतर्यमथशब्दार्थः
केवलयोगिनं केवलपरमहंसं च वारयितुं पदद्वयमुक्तं केवलयोगी तत्वज्ञानाभावेन त्रिकालज्ञानाकाश
गमनादिषु योगैश्वर्यं चमत्कारं व्यवहारेष्वासक्तः स्वयमविशिष्टेस्मिन्नेपयुक्ते ततः परमपुरुषार्थाद्भ्रष्टो भव
ति अस्मिन्नर्थे ऋचं पूर्वमेवोदाहृतं तेसमाधावुपसर्गा व्युत्थाने सिद्धय इति केवलपरमहंसस्तु तत्वविवेके
नैश्वर्ये सत्यप्यतां बुद्ध्वा विरज्यति तदप्युदाहृतं चिदात्मनद्रूमाइत्स्य प्रस्फुरंतीह शक्तयः इत्यस्याश्चर्यजालेषु
नाभ्युदेति कुतूहलमिति विरक्तोप्यसौ ब्रह्मविद्याद्रोहो विधिनिषेधानुल्लंघयति निस्त्रैगुण्ये पथि विचर
तां को विधिः को निषेध इति तथा च शुकालवः श्रीशालमेवं निंदति सर्वब्रह्म वदिष्यंति संप्राप्ते च कलौ युगे नानु

राम
१०

हारमनात्मत्वेनपश्यतः अंतःशीतलतायासौसमाधिरितिकथ्यते दृश्यैर्मनसंबंधस्तेनिश्चितःशीतलः क
श्चित्संव्यवहारस्थः कश्चित्ध्यानेमनस्थितः द्वावेतौरामसुसमावंतःश्चेत्परिशीतलौ अंतःशीतलताया
स्यात्तदनंततपःफलंइति अत्रदृष्टः अत्रवासनाक्षयरूपत्वेनशीतलत्वमवरूपंसंपादनीयमिति
जी॰वि॰४ एवंप्रतिपाद्यते ननुतदनंतरंभीर्विनोक्तमनोनाशश्चक्षयेऽपि तंनिवार्यतेशीतलत्वंतत्स्थायाः प्रशमनंइत्येतत्
दृश्यैमनसंयोस्त्वयमेवस्पष्टीचकार अंतःशीतलतायांतुलब्धायांशीतलंजगत् अंततृष्णोपतप्तानां
दावदाहमयंजगदिति ननुसमाधिनिद्राव्यवहारप्रपंचाचात्रोपलभ्यते समाधिस्थानंकस्यचित्तत्वश्चेद् तन्मे॰५
नितंचलं तत्रस्वप्नसुसमाधानेसमम् उन्मत्ततांइवे उन्मत्ततांउत्तस्थस्यचैतद्दृशीयावासनं तदस्योन्मत्तत्व
त्वंतुसमंब्रह्मसमाधिनेति भेवं अत्रहिसमाधिप्राप्यभावमेवागाकस्यवासनानिद्यते इयमत्रवचनव्य
क्तिः यद्यपिव्यवहारात्समाधिः प्रशस्तस्तथाप्यसौसवासनश्चेत् तदानिर्वासनाव्यवहाराद्धर्मा
वसवासनसमाधिः यदिसमाहितव्यवहर्तारावुभावप्यतत्वेसौसवासनोचतदासमाधेरुत्तमलोकप्रा
प्तिहेतुपुण्यत्वेनप्राप्तृत्वंप्रयद्दान्तू मोक्षाननिश्चो निर्वासिनोच तदपिवासनाक्षयरूपां जीवन्मुक्तिंयरि

श्री·मु· नचैतावतासंतताभावः शंकनीयः इत्यभिप्रेत्य बाहुल्यमेव प्रतिषिध्यते ननु बाहुल्यमिति लिंगव्यत्ययः छांदसः
वे·त· नन्वयं मार्गो दुर्लभतरश्चेत्तर्हि तदर्थप्रयासो न कर्तव्यः तेन प्रयोजनाभावादित्याशंक्याह यद्येको भवति
७१ स एव नित्यपूतस्य सः स एव वेदपुरुष इति विदुषो मन्यंत इति मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति न्यायेन यत्र क्वापि यदा कदाचित् योगी परमहंसो यः कश्चि
त्संभवेत्तर्हि स एव नित्यपूतस्यो भवति नित्यपूतः परमात्मा अपहतपाप्मेति श्रुतेः एवकारेणैव
71 केवलयोगी केवलपरमहंसो व्यावर्त्यते केवलयोगी नित्यं पूतं न जानाति केवलपरमहंसो जानन्नपि
चित्तविश्रांत्यभावाद्बहिर्मुखो ब्रह्मणि न तिष्ठति वेदप्रतिपाद्यः पुरुषो वेदपुरुषः विद्वांसो ब्रह्मानुभव
चित्तविश्रांतिप्रतिपादकशास्त्रपारंगताः योगिनः परमहंसस्य ब्रह्मनिष्ठत्वं सर्वे जना मन्यंते यथोक्तं वि
द्वांसस्तु तद्व्यसहमानाः ब्रह्मत्वमेव मन्यंते तथा च स्मर्यते दर्शनादर्शने हित्वा स्वयं केवलरूपतः य
स्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित्स्वयं एतेन प्रयोजनाभावः शंकितुमपि शक्यते नित्यपूतस्य वेद पुरु

तिष्ठति मे त्रैलोक्यविभ्रमादरपरायणोद्भूत्ति योगिनि परमहंसे दोषद्वयं नास्ति अत्र योग्यस्यातिशयः प्रश्नोत्तराभ्यां
दर्शित श्रीराम एवं स्थितेपि भगवन् जीवन्मुक्तस्य सन्मतेः २ अपूर्वोतिशयः कोसौ भवत्यात्मविदां वर वषि
ष्ठः ज्ञस्य कस्मिंश्चिदप्येषा भवत्यतिशयेन धीः नित्यतृप्तः प्रशांतात्मा सआत्मन्येव तिष्ठति मंत्रसिद्धैस्तपः
सिद्धैर्योगसिद्धैश्च भूरिशः कृतमाकाशयानादि तत्रैकस्यापूर्वता एक एव विशेषोस्य न समो मूढबुद्धि का४
भिः सर्वत्रास्थापरित्यागान्निरागममलं मनः एतावदेव खलु लिंगमलिंगमूर्तेः संशांतसंसृतिचिरभ्रम
निर्वृतस्य तज्ज्ञस्य यन्मदनकोपविषादमोहलोभापदामनुदिनं निपुणं तनुत्वं इति अनेनातिशयेनोपेता
नां द्विपदुपरहितानां मार्गस्थितीष्वृते देशभावादिरूपो हि व्यवहारो मार्गश्चित्तोपरमरूप अंतरो ध
र्मस्थिति भगवान् चतुर्मुखो ब्रह्मा यथोक्तं प्रश्नस्योत्तरमवतारयति तं भगवानाहेति वक्ष्यमाणो मार्गो श्रुत्य
तिशयमुत्पादयितुं तं मार्गं प्रशंसयति योयं परमहंसमार्गो लोके दुर्लभतरो न तु बाह्यस्य इति यः दृष्टः सोपा
ति योजना अथ मिलत्तरे ग्रंथे रहस्यमाह आशाछादनादिस्वशरीरोपभोगेन लोकोपकारे एव च निरपेक्षो मु
क्तो मार्गः परामृश्यते तादृशास्य परमकाष्ठाप्राप्तस्य वैराग्यस्यातिदुश्चरत्वात् तस्य मार्गस्य दुर्लभतरत्वं ॥॥

जी॰मु॰ वैदिकव्यवहारस्य हेयत्वे श्रुते विद्विषोऽपि सन्ति विश्रान्तिसिद्ध्यै विद्वत्संन्यासं चिकीर्षति तत्तत्प्रतिबन्धकत्रमिति चेत्सत्यम्
वे॰त॰ पन्यासः पूर्वमेव विविदिषासंन्यासं कृतवान् तत्त्वविदितवता विद्वत्संन्यासं चिकीर्षितः कलत्रपुत्रादिप्रसंगा
७२ भावात् नन्वयं विद्वत्संन्यासः किमिति संन्यासवत्प्रैषोच्चारादिविधियुक्तप्रकारेण संपादनीयः किंवा जीर्ण
वस्त्रत्यागवदुक्तआमादि प्रागवल्लौकिकत्यागमात्ररूपः नाद्यः तत्त्वविदः कर्तृत्वराहित्येन विधिनिषेधानधि
कारात् अत एव स्मर्यते ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्व
72 विदिति न द्वितीयः कौपीनदण्डाद्याश्रमलिंगविधानश्रवणात् नैष दोषः प्रतिपत्तिकर्मवदुभयरूपत्वो
पपत्तेः तथाहि ज्योतिष्टोमे दीक्षितस्य दीक्षांगनियमानुष्ठानकाले कण्डूयितुं हस्तं प्रतिषिध्य कृष्णविषाणां
[illegible] षाणा वि[illegible] हितत्वं कण्डूयेत वाचयमानो मानुकः प्रजाः स्युरिति कृष्णविषाणया कण्डूयनेदृतिच
तस्याः कृष्णविषाणायाः समाप्ते नियमप्रयोजनाभावादूर्ध्वमशक्यत्वाच्च त्यागः स्वत एव प्राप्तः तं च त्या
गप्रकारं वेदो विदधाति नीत्वा सुद हिरण्यस्य चत्वाले कृष्णविषाणां प्रास्यतीति तदिदं प्रतिपत्तिकर्म लौकि
कं वैदिकं चेत्युभयरूपं एवं विद्वत्संन्यासोऽप्युभयरूपः न च तत्त्वविदः कर्तव्याभावात्तदभावः शंकनीयः ॥

७२

यत्वंचमुक्तो विमुक्तव्यमन्यर्थात्का स्थितिरिति अत्रोत्तरं सूचयति महापुरुषोयच्चित्तंतत्सर्वदामय्येवाव
तिष्ठते तस्मादहंचतस्मिन्नेवावस्थीयतइति वेदेति कर्मज्ञानकर्माधिकारिषु श्रेष्ठेषुमध्येयोगिनः परम
हंसस्यात्यंतमुत्तमत्वात्महापुरुषत्वंसचमहापुरुषोयच्चित्तंस्वकीयंतत्सर्वदामय्येवावस्थापयति संसा
रगोचरात्स्वीयचित्तवृत्तीनामभ्यासवैराग्याभ्यांनिरुद्धत्वात् अत्रभगवान्प्रजापतिः शास्त्रसिद्धंपर
मात्मानंस्वानुभवेनपरामृशन्मय्येवेतिव्यपदिशति यस्माद्योगीचित्तंमय्येवस्थापयति तस्मादहम तै५
पिपरमात्मस्वरूपेणतस्मिन्नेवयोगिनि आविर्भूतोवस्थितोस्मिनेतरेषुज्ञानिषुतेषामविद्यावृतत्वात्
तत्ववित्स्वपि प्रायोयोगिषुवातच्चित्तवृत्तिनिरोधाभावात् नाहमाविर्भावः इदानींकोयंमार्गइत्यपेक्षायांमार्गमु
पदिशति असौस्वपुत्रमित्रकलत्रबंध्वादीन् शिखायज्ञोपवीतेस्वाध्यायंचसर्वकर्माणिच संन्यस्यायंब्र
ह्मांडंचहित्वाकौपीनंदंडमाच्छादनंचस्वशरीरोपभोगार्थायचलोकस्योपकारार्थायचपरिग्रहेदिति योग्र
हस्थः पूर्वजन्मसंचितपुण्यपुंजेपरिपक्वेसतिमातापितृभ्रात्रादीनि मित्त्रेनविविदिषासंन्यासरूपंपरम
हंसाश्रममधीकृत्यैवश्रवणादिसाधनान्यनुष्ठायतत्वंसम्यगवगच्छति ततोगृहस्थप्राप्तिर्लोकिक

जी.मु. त्यपशुग्रहक्षेत्रादिलौकिकपरिग्रहादिविशेषाः संगृह्यंते स्वाध्यायं चेतिचकारेणतदर्थनिर्णयोपयु
वे.टि. क्तानिपदवाक्यप्रमाणशास्त्राणि वेदोपबृंहणादीनीतिहासपुराणादीनि च समुच्चिनोति उत्सृज्य
७३ निर्वर्तिमात्रप्रयोजनानां काव्यनाटकादीनां त्यागः कैमुतिकन्यायसिद्धः सर्वकर्माणीतिशब्देनलौ
किकवैदिकनित्यनैमित्तिकनिषिद्धकाम्यानि संगृह्यंते पुत्राद्यित्यागेनैहिकभोगः परिहृतः सर्वकर्म
त्यागेन चामुष्मिकभोगश्चित्तविक्षेपकारिणोपरिहृता । प्रणवमित्यस्य छांदसो विभक्तिव्यत्ययेनेदं ब्रह्मां
डमितियोजनार्थं ब्रह्मांडत्यागो नाम तत्प्राप्तिहेतोर्विराडुपासनस्य त्यागः ब्रह्मांडं चेतिचकारेणासूत्रा
73 त्मप्राप्तिहेतोर्हिरण्यगर्भोपासनस्य तत्त्वज्ञानहेतुत्वेनाश्रवणादीनां समुच्चयः स्वपुत्रादिहिरण्यगर्भोपा
सनांतमैहिकामुष्मिकं च सुखसाधनं सर्वं प्रैषमंत्रोच्चारणेन परित्यज्य कौपीनादिकं परिग्रहणीयादा
च्छादनं चेतिचकारेणपादुकादीन्समुच्चिनोति तथा च स्मृतिः कौपीनयुगलं वासः कंथां शीतनिवा
रिणीं पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहमिति स्वशरीरोपभोगो नाम कौपीनेन लज्जाव्यावृत्तिः

चिदात्मन्यारोपितस्य कर्तृत्वस्य विद्ययापोहितत्वेपि चित्तच्छायापेतांतःकरणोपाधौ विक्रियासहस्रयुक्ते
स्वतः सिद्धस्य कर्तृत्वस्य यावत् द्वन्द्वभावितत्वानपोहितत्वात् नचज्ञानामृतेनेत्यादिस्मृतिविरोधः सत्यपि ज्ञा
नेविश्रांतिरहितस्य तत्स्वाभावेन विश्रांतिसंपादनलक्षणलोककर्तव्यशेषसद्भावेन कृतकृत्यत्वाभावात् ननु तत्
त्वविदोपि विध्यंगीकारे सति तेनादृष्टेन देहांतरमारभ्येत मैवं तस्यादृष्टस्य चित्तविश्रांतिप्रतिबंधनिवा
रणलक्षणस्य दृष्टफलस्य संभवे सति अदृष्टफलकल्पनाया अन्याय्यत्वात् अन्यथा श्रवणादिविधिष्वपि त
त्वज्ञानोत्पत्तिप्रतिबंधनिवारणरूपं दृष्टफलं मुक्त्वा जन्मांतरहेतुत्वं परिकल्प्येत तस्माद्विध्यंगीकारेदोषा
भावाद्विविदिषुरिव विद्वानपि गृहस्थो नांदीमुखश्राद्धोपवासजागरणादिविधिमनुसृत्यैव संन्यसेत् यद्यप्य
त्राष्टश्राद्धादिकं नोपदिश्यते तथाप्यस्य विद्वत्संन्यासस्य विविदिषासंन्यासविकृतित्वात् प्रकृतिवद्विकृतिः कर्त
व्येति न्यायेन तदीयाः धर्माः सर्वेप्यत्र प्राप्नुवंति यथाग्निष्टोमस्य विकृतिषु षोडश्यतिरात्रादिषु तदीयधर्मप्राप्ति
स्तद्वत् तस्माद्विद्वत्संन्यासवदत्रापि प्रैषमंत्रेणापुत्रमित्राद्यित्यागसंकल्पेत् वंध्यादीनित्यादिग्रन्थेन भ

श्री·मु· दंडस्यैवेणावत्वा दिलक्षणामाच्छादनस्यकं थात्वा दिलक्षणां चपरी क्षितुं दंडादिकं संपादयितुं चरद्वि

तुंच चित्तेस्याहत्तेसति चित्तवृत्तिनिरोधलक्षणो योगोन सिद्ध्येत् तत्र न युक्तेन हिंवर विधानायकं न्याया

वै·त· द्वन्द्वाहइति न्यायात् आह्लादनाद्यभावे शीतादिबाधायाः कः प्रतीकार इत्साशंक्याह नशीतेनचोष्णे

७४ न दुःखेन च सुखेन मानावमाने च द्वन्द्वमावर्जमिति निरुद्धाशेषचित्तवृत्तेर्योगिनः शीतेनाहितत्त्व

नीत्यभावात् यथा लीलायामसक्तचित्तस्य बालकस्याच्छादनादिरहितस्यापि हेमन्तशिशिरयोः प्रा

74 तःकाले शीतं नास्ति तथा परमात्मन्यसक्तस्य योगिनः शीताभावः धर्मकाले उष्णाभावः तथैवावगन्तव्यः

वर्षाभावसमुच्चयार्थश्चकारः शीतोष्णयोर प्रतीतौ तज्जन्ययोः सुखदुःखयोर भाव उपपन्नः निदाघे

शीतं सुखजनकं हेमन्ते दुःखजनकं उष्णे विपर्ययं उष्णे द्रष्टव्यः मानः पुरुषान्तरेणासंपादितः सत्का

रः अपमानस्तिरस्कारः यदा योगिनात्मव्यतिरिक्तपुरुषान्तरमेव न प्रतीयते तदा मानावमानौ

दूरादपेतौ चकारः शत्रुमित्ररागद्वेषादिद्वन्द्वाभावं समुच्चिनोति इषद्वन्द्वमिथः क्षुत्पिपासे शोकमोहौ जरामर

णे चैतेषां त्रयाणां द्वन्द्वानां क्रमेण प्राणमनोदेहधर्मत्वात् आत्मतत्त्वाभिमुखस्य योगिनस्तद्वन्द्वेन पुरस्तः

राम
७४

दंडेन गोसर्पाद्युपद्रवपरिहारः आच्छादनेन शीतादिपरिहारः चकाराभ्यां डुकाभ्यामुच्छिष्टदे
शस्पर्शादिदुपद्रवपरिहारः समुच्चिनोति लोकस्योपकारो नाम दंडादिलिंगेन तद्विमुक्त
मार्गप्रभृति परिज्ञायतद्धुचितामिंदनमिक्षाप्रदानादिप्रवृत्त्या सुकृतसिद्धिः चकाराभ्यामत्र मर्या
दायाः शिष्टाचारआम्नायाः परिपालनं समुच्चिनोति कौपीनादिपरिग्रहस्यानुकूलत्वम
भिप्रेत्य मुख्यत्वं निषेधति नचैनमुख्योऽस्तीति यः कौपीनादिपरिग्रहमात्रतदप्यस्य योगिनः प
रमहंसस्य मुख्यः कल्पो न भवति किंत्वनुकूल्यमेव विविदिषासंन्यासिनस्तु दंडग्रहणं मुख्यमिति
मत्वा दंडवियोगस्य निषेधः स्मर्यते दंडात्मनोस्तु संयोगः सर्वदैव विधीयते नदंडेन विना गच्छेदि
षुक्षेपत्रयं बुधइति प्रायश्चित्तमपि दंडेनाष्टप्राणायाममिष्टं तत्स्मर्यते दंडत्यागे च शतं चरेदिति योगि
नः परमहंसस्य मुख्यकल्पं प्रश्नोत्तराभ्यां दर्शयति कोयं मुख्य इति चेदयं मुख्यो नदंडेन शिखं न यज्ञो
पवीतं नाच्छादनं चरति स परमहंस इति न शिखमिति छादनं सोलिंगत्वलयोनुसंधेयः यथा विविदिषुः
परमहंसः शिखायज्ञोपवीताभ्यां रहितो मुख्यः तथायोगा दंडाच्छादनाभ्यामपि रहितः सन्मुख्यो भवति

ज्ञा·मु· वद्रूपतेयतस्तद्रूपयद्भूतामिति पूर्वोपि स्वकीयेवपुस्तादिदानीं स्वात्मचैतन्यात् पृथक्भूतत्वेन कुत्रापि

वे·त· वावलोक्यते यथा सुहृत्तुः स्पर्शनभीत्या प्रायदेहं दूरस्थितो वलोकयति तथायं योगी तादात्म्यभ्रांतिउदय

७५ भीत्या सावधानं देहं चिदात्मनः सकाशाद्भिन्नं तरं विविनक्ति यतः कारणात्तद्गुरूपदेशागमानुभ

वैरपध्वस्तं चिदात्मनः सकाशाद्भिराकृतं ततश्चेतनस्य वियुक्तस्य देहस्य शववत्स्पन्दतयाद्रूपमानत्वात्तस्य

पिदेहे निंदादित्यागो घटतइत्यभिप्रायः नन्वात्मनो दिग्भ्रमः सर्पादिवदर्शनेन विनश्यति यथा कदाचि

75 दनुवर्तते न चाकदाचिदात्मनि देहात्मत्वसंशयो ह्यनुवृत्तो निंदादिलेशोपुनः पुनः प्रसज्येतेत्याशंक्याह

संशयविपरीतमिथ्याज्ञानानां योहेतुस्तेन नित्यनिवृत्तइति आत्मकर्तृत्वादिधर्मोपेतस्तद्रहितो वा इत्यादि

कं संशयज्ञानं देहादिरूपएवात्मेति विपरीतज्ञानं एतदुभयं कर्तृत्वभोक्तृत्वविषयं मिथ्याज्ञानं तु भो

गाभिमतमात्रं विविधं तेन चानेकविधं संकल्पप्रभवान्कामानित्यत्रस्पष्टीकृतं तस्य हेतुः चतुर्विधः

चि२ अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति सूत्रणात् अनित्येपि गिरिनदीसमुद्रादौ

नित्यत्वभ्रांतिरेका अशुचौपुत्रभार्यादिशरीरे शुचित्वभ्रांतिर्द्वितीया दुःखे कृषिवाणिज्यादौसु

रा·म

७५

न च स्त्वेवं समाधिदृष्ट्या यो शीताद्युभावः सुखालदृष्ट्या योऽनुनिंदादिक्लेशाः संसारिणामिवैनं वा धनाद
वैस्याह्यं वचाह निंदागर्वमत्सरदंभदर्पेर्ष्याद्वेषयुक्तैः स्वदुःखकामक्रोधलोभमोहहर्षासूयाहंकारादीन्
हित्वेति विविधैर्युक्तैः स्वभिन्नान्यायादितदोषोक्तिर्निंदा अन्येभ्योऽधिकोऽहमिति चित्तवृत्तिर्गर्वः विद्या
धनादिभिः परस्य सदृशो भवामीति बुद्धिर्मत्सरः परेषामग्रेऽन्यथा नादिप्रकटनं दंभः मत्सरेण नादिषु बुद्धि
र्दर्पः धनाद्यभिलाषइच्छा शत्रुवधादिषु बुद्धिर्द्वेषः अनुकूलदुःखादिलाभे बुद्धिः स्वास्थ्यं सुखं न द्विपर्य
यदुःखे योषिदाद्यभिलाषः कामः कामतार्थविघातः [illegible] तज्जन्यो बुद्धिक्षोभः क्रोधः
लब्धस्य धनस्य त्यागासहिष्णुत्वं लोभः हितेष्वहितबुद्धिः अहितेषु हितबुद्धिर्मोहः चित्तगतसुखाभिव्यंज
कानुवर्षविकासादिहेतुर्हर्षः परकीयगुणेषु दोषत्वारोपणमसूया देहेंद्रियादिसंघातेष्वा
त्मत्वारोपणमहंकारः आदिशब्देन भोग्यवस्तुषु ममकारसमीचीनत्वादिबुद्धयो गृह्यंते चकारोऽयथो
क्तनिंदादिविपरीतस्तुत्यादिकं समुच्चिनोति एतान्सर्वान्निंदादीन् हित्वा पूर्वोक्तवासनाक्षयाभ्यासेन प
रित्यज्य अवतिष्ठत इति शेषः ननु विद्यमाने स्वदेहे तत्परित्यागो न संभवतीत्याशंक्याह स्ववपुः कुणपमि

बी·मु·   वास्थितिर्भवति तस्माद्योगिनो ब्रह्मानुभवप्रकारं दर्शयति तं शांतमचलमद्वयानंदविज्ञानघनमेवास्मि
वे·त·   तदेव मम परमं धामेति तमित्यादिपदत्रयं द्वितीयाप्रथमार्थे द्रष्टव्या यः परमात्मा शांतः क्रोधादिविहि
७६   परहित अचलो गमनादिक्रियारहितः सगतसजातीयविजातीयद्वैतशून्यः सच्चिदानंदैकरसः
स एवाहमस्मि तदेव ब्रह्म तत्त्वं मम योगिनः परमं धाम वास्तवं स्वरूपं यत्कर्तृत्वभोक्तृत्वादितत् न
पुनः एतस्यमायाकल्पितत्वात् यद्वियोगिनः पूर्वाश्रमे प्रसिद्धा आचार्यपितृमातृभ्रात्रादयः कर्मि
76   णः अज्ञानजाः शिखायज्ञोपवीतसंध्यावंदनादिरहितेन मया संदिग्धत्वमारोप्य व्यामोहयेयुः तदानींव्या
मोहाद्यनुत्पत्तये योगिनो वर्तमानं निश्चयं दर्शयति तदेव च शिखा तदेवोपवीतं च परमात्मनो रेकत्वज्ञा
नेन तयोर्भेद एव विभञ्जनः सा संध्येति यद्वेदांतवेद्यस्य परब्रह्मणो ज्ञानं तदेव कर्माणि भूतत्वात् शिखा
यज्ञोपवीतस्थानीयं अन्ये च मंत्रद्वयलक्षणो कर्माणि भूतेन च कारणात्समुच्चयेते शिखायज्ञसाधनैः
कर्मभिस्सह त्यक्त्वा त्यक्ता इति श्रुतेः सर्वेऽज्ञानिनो केवलं भूते विषयानंदस्य सर्वस्य ब्रह्मानंदलेशत्वा
त् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः एतदेवाभिप्रेत्याथर्वशिखाकार हो

राम
७६

खल्वभ्रांतिस्तृतीया गौणमिथ्यात्मनि पुत्रभार्यादौ ऽन्नमयादिके ऽन्नात्मनि मुख्यात्मत्वभ्रांतिश्च
तुर्या एतेषां संशयादीनां हेतुर् द्वितीयब्रह्मात्मतत्वावरकमज्ञानं तद्वासना च तज्ज्ञानं योगिनः प
रमहंसस्य महावाक्यार्थावबोधेन निवृत्तं वासना तु योगाभ्यासेन निवृत्ता उदाहृतायां हि भ्रांतावज्ञाने
निवृत्ते पि वासनायाः सद्भावात् यथापूर्वं भ्रांतिव्यवहारः योगिनस्तु भ्रांतिहेतुद्वयरहितस्य तु तः संश
यादीन्यनुवर्तेरन् तमेव मनुवृत्य भावमभिप्रेत्यानेन हेतुद्वयेन योगी नित्यनिवृत्त इत्युक्तं सत्यामपि ऽज्ञा
नतद्वासना निवृत्तौ निवृत्ते विनाशाभावात् नित्यत्वं दृष्टांतस्मिन् नित्यत्वे हेतुमाह नित्यबोध इति सर्व
नामत्वात् प्रसिद्धार्थवाचीत तत्र शब्दो ऽत्र सर्ववेदांतप्रसिद्धं परमात्मानमाचष्टे तस्मिन् परमात्मनि नित्यो
बोधो यस्य योगिनः सोयं तन्नित्यबोधः योगी हि विनाशप्रतीतं कुर्वीतेति श्रुतिमनुसृत्य चित्तविक्षेपान् यो
गेन परिहृत्यैनं तेर्यथापरिमात्मविषयमेव प्रतीतं करोतीति ऽप्रतो बोधस्य नित्यत्वात् बोधविनाशान योः
ज्ञानतद्वासनयोर्निवृत्तिर्निवृत्तिरित्यर्थः बुध्यमानस्य परब्रह्मणस्तार्किकैराशंकनीयस्य त्वं शंकां वारयति त
स्वयमेवावशिष्यत इति यद्वेदांतवेद्यं परं ब्रह्मास्ति तत्स्वयमेव न तु स्वस्मादन्यद्वि ऽस्वेनं निश्चित्य योगी

जी॰मु॰ योऽसावात्मनि निर्गुणः ये यमेकत्वबुद्धिः सेयमुभयोरात्मानोः संधौ जायमानत्वात्संध्येत्युच्यते अहोरात्रयो
: संधावनुष्ठेया क्रिया यथा संध्या तद्वत् एवं च सति योगाभ्यासात्तदैकत्वमात्मोहितुं शक्यः कोऽयं मार्ग इति प्र
वि॰ प्र॰ श्नस्योत्तरं सपुत्रमित्रकलत्रादिकं नामुक्तं काष्ठेति तिरिति तस्य महापुरुषः इत्यादिना संक्षेपेणोत्तरमुक्त्वा संक्षे
७१ पेण विपरीतं तदुक्तमादिनात्तदेव प्रपंच्य दृष्टान्तेनोपसंहरति सर्वान्कामान्परित्यज्याद्वैते परमे स्थितिरिति क्रो
धलोभादीनां कामपूर्वकत्वात् कामपरित्यागेन चित्तदोषाः परित्यज्यन्ते एतदेवाभिप्रेत्य वाजसनेयिभिराम्ना
७७ तं अथो खल्वाहुः काममय एवायं पुरुष इति अतो निष्कामस्य योगिनश्चित्तस्याद्वैते निर्विघ्ना स्थितिरुत्पद्य
ते ननु दंडग्रहणादिविधिवलेनैव तला विविदिषासंन्यासिनो योगिनं दंडी दृहत्तं परमहंसं नामुपगच्छन्तीत्याशंक्या
ह ज्ञानदंडो धृतो येन एकदंडी स उच्यते काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः स याति नरकान्घो
रान्महारौरवसंज्ञिकान् इति हि ज्ञानवैराग्यप्रधाना त्रिगुणवर्जितः भिक्षामात्रेण यो जीवेत् स पापीयान्
तितिक्षा इदं मंत्रं ज्ञात्वा यः परमहंस इति यः परमहंसस्य योगिन एकदंडः स द्विविधः ज्ञानदंडः काष्ठदं
डश्चेति यथा त्रिदंडिनो वा दंडो मनोदंडः कायदंडश्चेति त्रिविधस्तद्वत् वाग्दंडोऽथ यो मनुना समर्थ्यते वाग्
दा॰म
७१

पनिषद्यामनेनेति सशिखंवपनंकृत्वा बहिःसूत्रंत्यजेद्बुधः यदक्षरंपरंब्रह्मतत्सूत्रमितिधारयेत्
सूचनात्सूत्रमित्याहुः सूत्रंनामपरंपदं तत्सूत्रंविदितंयेनसविप्रोवेदपारगः येनसर्वमिदंप्रो
तंसूत्रेमणिगणाइव तत्सूत्रंधारयेद्योगीयोगवित्तत्वदर्शिवान् बहिःसूत्रंत्यजेद्विद्वान्योगमुत्तम
मास्थितः ब्रह्मभावमिदंसूत्रंधारयेद्यःसचेतनः धारणात्तस्यसूत्रस्यनोच्छिष्टोनाशुचिर्भवेत् सूत्र
ब्र५ मंतर्गतंयेषांज्ञानयज्ञोपवीतिनां तेवैसूत्रविदोलोकेतेचयज्ञोपवीतिनः ज्ञानशिखिनोज्ञाननिष्ठाज्ञा
नयज्ञोपवीतिनः ज्ञानमेवपरंतेषांपवित्रंज्ञानमुच्यते अग्नेरिवशिखानान्यायस्यज्ञानमयीशिखा स
शिखीत्युच्यतेविद्वान्नेतरेकेशधारिणः कर्मण्यधिकृतायेतुवैदिकेब्राह्मणादयः तैरिदंधार्यमिदंसूत्रं
क्रियांगंतद्धिवैस्मृतं शिखाज्ञानमयीयस्यउपवीतंचतन्मयं ब्राह्मण्यंसकलंतस्यइतिब्रह्मविदोविदुः
इदंयज्ञोपवीतंतुपरमंयत्परायणं सविद्वान्यज्ञोपवीतीस्यात्सयज्ञस्तंयज्विनंविदुः इति तस्माद्योगि
नः शिखायज्ञोपवीतेविच्छिन्ने नैवसंध्यापिविद्यते यः शास्त्रगम्यःपरमात्मायश्चाहंप्रत्ययगम्यो
जीवात्मातयोरेकत्वज्ञानेनमहावाक्यजन्येनयत्प्रतिपत्तितोभेदोविशेषेणभग्नस्तंपुनर्भ्रांत्यानुद

जा॰मु॰
वे॰न॰
७८

स्नात्वा स हेषुते भोजयंति । अथ च जितुलं घटो वर्ज्जो वर्ज्जो विवेकमन्त्रं त्वा सर्वं स भक्षाति तेन प्रसवायं प्राक्षेलिना
नूतेषेतोसत्करी चातुर्वर्ण्येक्षरे द्रूक्षमिणादीनि नावचानितानि ज्ञानि निष्ठयानि । अयं तु ज्ञानवर्जित
दुतिपुत्रोऽक्षनरकः । अन्नकवतानहोनस्यपते मिह्मानियममाहमनुः नचोत्पातनिमित्ताभ्यां ननक्ष
त्रांगविद्यया नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् एककालं चरेत् भैक्ष्यं न प्रसज्येत वि
स्तरेः भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जते इति ज्ञानाभ्यासेन प्रतिषेधं समर्थये एकवारं द्विवा
रं वा भुंजीत परमहंसः येन केन प्रकारेण ज्ञानाभ्यासी भवेत् स देहेति एवं स तितक्षानदंडधारदे
कुर्योर्येन् तारतम्यमुक्तमाश्रमरूपेत हिद मवगम्यो मंत्रानं दंडे यो धारयति स एव मुख्यः परमहंस
द्रूसम्मुपयोतव्यः नन्मुख्यपरमहंसस्य संन्यासो मा भूत् काष्ठदंडनिवेधन इत्याचार्यो सर्वाकोह
षीत्याशवचाह । आशांबरो निर्नमस्कारो न स्वधाकारो न निंदानस्तुतिर्यादृच्छिको भवेद्भिक्षुर्नावा
हनं न विसर्जनं न मंत्रं न ध्यानं नोपासनं च न लक्ष्यं नालक्ष्यं न पृथक् नापृथक् नाहं न त्वं न च सर्वं चा
निकेत स्थितिरेव स भिक्षुः सौवर्णादीनां नैव परिग्रहेत् न लोकं नावलोकयेदिति । आबाधादिष्वा

राम
७८

वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव च यस्यैते नियता बुद्धौ स त्रिदंडीति चोच्यते त्रिदंडमेतन्नि
क्षिप्य सर्वभूतेषु मानवः कामक्रोधौ तु संयम्य ततः सिद्धिं नियच्छतीति नेयं स्वरूपं दक्षः स्मृतिः
वाग्दंडोथ मनोदंडः कर्मदंडस्तथैव च यस्यैते नियता दंडाः स त्रिदंडीति स उच्यते वाग्दंडे मौनमाति
ष्ठेत् कर्मदंडे त्वनीहतां मानसस्य तु दंडस्य प्राणायामो विधीयते इति कर्मदंडोल्पभोजनमिति
स्मृत्यंतरपाठः ईदृशं त्रिदंडत्वं परमहंसस्याप्यस्ति न केवलं दंडमित्यपि पितामहोपि स्मृतिः यतिः
परमहंसस्तु तुर्याख्यः श्रुतिचोदितः यमैश्च नियमैर्युक्तो विष्णुरूपी त्रिदंडभृत् इति एवं सति मौ
नादीनां वाग्निग्रहरूपमनोहेतुत्वात् वाग्दंडत्वं तथैव ज्ञानस्य कायदमनहेतुत्वात् ज्ञानस्य दंडत्वं अपि ज्ञान
दंडेनैव परमहंसेन धृतः स एव मुख्यः दंडीत्युच्यते मानसस्य ज्ञानदंडस्य कदाचित्त्रिविधेयत्वा
त् स्मृतिः प्रमादेनैव तिलनिवारणार्थं सस्मारकः काष्ठदंडो धार्यते न केवलं काष्ठदंडधारणमनुधावि
मात्रेण पुरुषार्थसिद्धिमभिप्रेत्य काष्ठदंडेनैव परमहंसेन धृतः स पुरुषो बहून् विधयातनोपेतान् घो
रान् महारौरवमामकं नरकान्प्राप्नोतीति तत्र हेतुरुच्यते परमहंसविषये दृष्ट्वा ज्ञानित्वं प्रतीतार्थं सर्वे जनाः

जी.मु. किंतुवाचं नच्छ्वाचंतत्स्वद्दार्थांतद्यथकुत्तत्त्वंतद्यथकृ स्वदेहमितरदेहं वा आत्मीयमिति व्यवहारार्हः प
वे.त. रदेहं नेत्यस्त्वमिति व्यवहारार्हः ल श्वानं वा चण्डालमिति उभयविधिवेत्तत्वेनोपेतमन्यत् जगत्सर्वमिति व्यवहारा
७६ र्हं मिमेतात्तृणो विकल्पो नको पियो गिनो ह्यितद्वीय चित्तस्य ब्रह्मणि विश्रान्तत्वात् अत एव समिद्धो रवि
केत स्थितिरेवं हि नियत निवासार्थं कं चित्तमठं संपादयेत् तदानीं ग्राममध्ये वसति तदीयमहानिद्र
७३ द्रोचित्तविहितेन एतत्सर्वं अभिप्रेत्य गौडपादाचार्या आहुः नस्कृतिर्निर्नमस्कारो नस्वधाकार एव च च
लाचलानिकेतन्स्याद्यतिर्यादृच्छिको भवेदिति यथामठोनसंगृहीतस्तथा सुवर्णरजतादीनां भिक्षा
चमनादिपात्राणामेकमपि न परिगृह्णीयात् तदाह यमः हिरण्मयानि पात्राणि कार्ष्णायसमया
ये ४ नि च यतीनां तान्यपात्राणि वर्जितानि भिक्षुकस्येति मनुरपि अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि
च तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे अलाबुं दारुपात्रं वा मृन्मयं वैणवं तथा एतानि यतिपा
त्राणि मनुः स्वायंभुवोऽब्रवीत् बोधायनोऽपि स्वयमाहृतपर्णेषु स्वयं शीर्णेषु वा पुनः भुंजीत न वटाश्व
त्थकरंजानां च पर्णके आपद्यपि न कांस्येषु मलाशी कांस्यभोजिनः सौवर्णराजतताम्रेषु मृन्मयेषु त्रपुसीसयोः इति

त्ता एवांबरं वस्त्रमाच्छादनं यस्यासावाशांबरः यत्तु स्मृतिवचनं जानोरूर्ध्वमधो नाभेः परिधायैकमं
बरं द्वितीयमुत्तरं वासः परिधाय स्नानं दद्यादिति तद्विद्वद्योगिविषयं अत एव पूर्वं तत्र तत्र नमुक्तोऽस्तीत्यु
क्तं यत्तु स्मृत्यंतरे यो भवेत्पूर्वसंन्यासी तुल्यो वै धर्मतो यदि तस्मै प्रणामः कर्तव्यो नेतराय कदाचनेति त
स्याप्यन्यविषयत्वात् नास्य नमस्कारः कर्तव्योऽस्ति अत एवाह्वालक्षणे निर्नमस्कारमस्वधाकार इति भिक्षु
दाहृत्तं यथा प्रयोगादित्तीर्थेषु श्राद्धं नास्माल्लं प्राप्तः स्वधाकारो निषिध्येत पूर्वत्र निंदागर्वेत्यादिवाक्यैः पे
: कृत्या श्याल्पनिंद्या लोकेभ्यो निवारितः अत्र तु स्व कर्तव्ये परविषये निंदास्तुती निषिध्येते यदृच्छिकं निर्बंध
रहितं न कंचिदपि व्यवहारे निर्बंधं कुर्यात् यस्तु देवपूजायां निर्बंधः स्मर्यते भिक्षाटनं जपः शौचं स्नानं ध्या
नं सुरार्चनं कर्तव्यानि षडेतानि सर्वथा नृपदंडवदिति तस्याप्यविद्योगिविषयत्वमभिप्रेत्य नावाहनमित्याद्यास्ना
तेसमष्टसमस्तं ध्यानं नैरंतर्येण गानुस्मरणमुपासनमिति तयोर्भेदः यथा योगिनः स्तुतिनिंदा च्छिन्ने किंकर्य
वहाराभावः यथा च देवपूजादिधर्मशास्त्रव्यवहाराभावः तथा चल चित्तादिस्नानशास्त्रव्यवहारोऽपि नास्ति
यस्माद्विद्वैतन्यमस्ति तद्विदंतरश्चमसी ति वाक्ये तत्पदेन लक्ष्ये देहादिविशिष्टं तु चेतनं तत्स्यं न भवति

श्री·मु·
वे·त·
१०
80

दूर्जनमाह ऽज्ञाबाधक इति चेदाबाधिको ऽस्त्विव यस्माद्द्विजस्तु हिरण्यं स्तेनत्वं चेत् स ब्रह्महा भवेत् य
स्माद्द्विजस्तु हिरण्यं स्तेनस्पृष्टं चेत् सपो ऽकसो भवेत् यस्माद्द्विजः हिरण्यं स्तेन ग्राह्यं चेत् स आत्महा
भवेत् तस्माद्द्विजस्तु हिरण्यं स्तेन न स्पृष्टं च न स्पृष्टं च न ग्राह्यं चेदिति ऽप्राकारो ऽभिव्याप्त्यर्थे ऽत्रा इष
दर्थे ऽभिव्याप्तावपि ऽभिहितत्वात् ऽभिव्याप्तो बाधको ऽत्यन्तबाधकः तस्य सद्भावं प्रतिज्ञाय हिरण्ये
स्वहितत्वाविधिबाधकत्वमुच्यते स्तेनाभिलाषप्रयुक्तेनादौ ये हिरण्यं दिदृक्षं स्यात्तदानीं सद्वा
भिद्रुर्ब्रह्महा भवेत् हिरण्याभिक्रान्तं संपादनार्थं ह्यायो सर्वदा प्रयत्नमानस्तेहुयर्थेपरिहाराय प्रपंच
मिथ्यात्वप्रतिपादकान् वेदान्तान् दूषयित्वा न सत्यत्वमालंबते ततः शास्त्रसिद्धमद्वितीयब्रह्म तेन मि
ध्यान्यां हतमिव भवति तस्मात् सो ब्रह्महा भवेत् तथा च स्मर्यते ब्रह्म नास्तीति यो ब्रूयात् द्वेष्टि ब्रह्मविदं
च यः ऽभूतब्रह्मवादी च त्रयस्ते ब्रह्मघातिकाः ऽभिलाषपूर्वकं हिरण्यस्य ऽवेक्षणं सदा द्विजो प्रति
न तात्यो ऽकसो ऽन्नेषु सद्दृष्टो भवेत् पातित्यं च स्मर्यते पतत्यसौ ध्रुवं विप्रः स्वयोनेर्मिथ्याद्वैधं भवेत् धीपूर्वं
रेतउत्सर्गाद्विजस्य संग्रह एवेति ऽभिलाषपुरःसरं हिरण्यं हीनं चेत्तदा मिद्वंद्वे हि द्विजयादि सा हि राम

राम
१०

तथा न लोकमिति लोकं जनं शिष्यवर्गेण न गृह्णीयात् तदाह मनुः एक एव चरेन्नित्यं सिद्ध्यर्थमसहायकः सिद्धि-
मेकस्य संपश्यन्न जहाति न हीयते इति मेधातिथिरपि आसनं पात्रलोभश्च संचयः शिष्यसंग्रहः दिवास्वा-
पो वृथालापो यतेर्बंधकराणि षट् एकाहात्परतो ग्रामे पंचाहात्परतः पुरे वर्षाभ्योन्यत्र यत् स्थानमास-
त ४ नं तदुदाहृतं उक्तानामासनादिपात्राणां मध्ये एकस्यापि संग्रहः भिक्षोर्भैक्ष्यभुजश्चापि पात्रलोभः स उच्यते गृही-
तस्य तु दंडादेर्द्वितीयस्य परिग्रहः कालांतरोपभोगार्थं संचयः परिकीर्तितः शुश्रूषालाभपूजार्थं यशोर्थं
वा परिग्रहः शिष्याणां न तु कारुण्यात् स ज्ञेयः शिष्यसंग्रहः विद्या दिनं प्रकाशत्वादविद्या रात्रिरुच्यते
विद्याभ्यासे प्रमादो यः स दिवास्वाप उच्यते आध्यात्मिकीं कथां मुक्त्वा भैक्ष्यचर्यां सुरस्तुतिं अनुग्रहमप्र
प्रश्नात् वृथालापः स उच्यते लोकं शिष्यजनरूपं न गृह्णीयात् इत्येतावदेव न भवति किंतु तस्य लोकस्या-
वलोकं दर्शनमपि न कुर्यात् तस्य बंधहेतुत्वात् न चेत्यनेनान्यदपि स्मरति निषिद्धं न कुर्यादित्यभिप्रेतं तत्र
निषिद्धं मेधातिथिर्दर्शयति स्थावरं जंगमं बीजं तैजसं विषमायुधं षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषव-
त् रसायनं क्रियावादं ज्योतिषं क्रयविक्रयं विविधानि च शिल्पानि वर्जयेत्परदारवदिति योगिनो लौकिकं
वैदिकं व्यवहारं गलानियानि बाधकानि संततिं तेषां वर्जनमभिहितं अथ यथाप्रोक्तेतराभ्यामत्यंतबाधकं प्रदर्शयति

जी॰मु॰
वि॰त॰
८१

82

योर विदेहपितस्तेस ततामुष्मिकविषयरागो पित्यागो भवति ऐहिकसुखस्पृहायुक्तस्तद्दर्शनेनानु
मिनोति आमुष्मिकसुखे रागवान् भवति तस्मादैहिके निःस्पृहस्यामुष्मिके रागाभावो युज्यते एवंस
तिसर्वत्रलोकद्वयेपि यो शुभाशुभावनुकूलप्रतिकूलौ विषयौ तयोरनभिस्नेहः एतन्मुद्दिश्य हित
स्याप्युपलक्षणं ताद्दृशो विद्वान् शुभं का द्वेष्टि किंचिदपि पुरुषं न द्वेष्टि शुभकारिणं च द्वेष्टा
मोदं न प्राप्नोति द्वेष्यमेव द्वितीयः प्रमाणान्तरमन्येन सर्वदा वर्तिष्यते तस्य सर्वदा मिथ्यायोगतः
प्रवृत्तिरूपरमते द्वितीयोपरतेन कदाचिदपि निर्विकल्पसमाधेर्विघ्नो भवति तेषां कोऽस्थितिरिति
प्रश्नस्य संक्षेपविस्तारात्मा युक्तः पूर्वमुक्तं तदेवात्र पुनरपि हि रूप निर्विकल्पसमाधिप्रसंगेन स्पष्टीकृतं अयथावि
द्वन्द्वं स्यामसमुपसंहरति यस्तु लोनिर्दैकबोधस्तद्ब्रह्माहमस्मीति निश्चयतो भवति यद्वा सर्वदा तेषु दृ
र्तीनिर्दैकबोधः परमात्मेति निरूपितं तद्ब्रह्माहमस्मीत्येवं सर्वदानुभवन्नयं योगी परमहंसः कृतक
त्यो भवतीति तथा च स्मर्यते ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः नैवास्ति किंचित्कर्तव्यमस्ति स्प ३
चेन्न स तत्त्वविदिति जीवन्मुक्तिविवेकेन बंधहार्दं निवारयन् पुमर्थमखिलं देयाद्विद्यातीर्थमहे
श्वरः जीवन्मुक्तिप्रमाणप्रकरणं प्रथमं १ वासनाक्षय द्वितीयः २ मनोनाश तृतीयः ३ स्वरूप

राम
८१

संगं चिदात्मानं हंत वानुभवेत् असंगात्मपोहरत्वात् मनो हिरण्यादिदुःखं प्रति भोक्तृत्वेन प्रतिपन्नैः तस्मात्
चान्यथा प्रतिपन्नैः सर्वपापरूपत्वं समर्पितं योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते किं तेन न कृतं पापं
चौरेणात्मापहारिणेति किं चात्मघातिनः सुखलेशेनापि रहिता बहुविधदुःखेनावृता लोकाः श्रू
यंते श्रुतौ असुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जना इति
दृष्टं चेत्येनेन चकारेणाश्रुतं च समुच्चयते स्पृष्टं चेत्येनेन कथितस्य समुच्चयः घ्रातं चेत्येनेनाव्यवहृतं चे
ति समुच्चयः दर्शनस्पर्शनग्रहणादभिलाषपूर्वकं हिरण्यादेरुक्तत्वात् तथाकथनं तद्दायकक्रिया हि व्यव
हारा अपि प्रसवाय हेतवः इत्यर्थः यस्मात्साभिलाषहिरण्यादर्शनादयो दोषकारिणस्तस्माद्दुरा
हिरण्यादर्शनादयो वर्जनीया इत्यर्थः हिरण्यवर्जनस्य फलमाह सर्वेकामा मनोगता व्यावर्तंते दुःखे
नोद्विग्नः सुखे निस्पृहः रागोरागे सर्वत्र शुभाशुभयोरनभिस्नेहः नहि हिरण्यमादत्ते न सर्वेषामिंद्रिया
णां तिरूपरमते य आत्मन्येवात्मतुष्टो यतेरिति पुत्रभार्यागृहक्षेत्रादिकामानां सर्वेषां हिरण्यमूलत्वात्
हिरण्यपरित्यागेन सति तत्कामा मनोगता मनस्यवस्थानात् व्यावर्तंते व्यावृत्ता भवंति कामनिवृत्तेरात्मलाभ
मेप्राप्नोति सुखदुःखे यथाकृष्टा स्पृहेन भवतः एतच्च स्थितप्रज्ञप्रस्तावे प्रपंचितं ऐहिकयोः सुखदुःखयोः स्व

जी·मु·
वे·त·
८२

साधनप्रयोजननिरूपणं चतुर्थं ४ विद्वत्संन्यासनिरूपणं पंचमं ५ इति श्री
विद्यारण्यस्वामीकृतजीवन्मुक्तिविवेकः ५ श्रीराम श्रीकृष्ण श्रीनरसिंहः

राम
८२

83